सा. २०२८

सा ~~४५२~~ आ. नं ~~२०६~~

द० नं० २७३६

आरक्षित नं०

(आरक्षित पुस्तक)

सा. 2025

नाटकम्—
२१. सिद्धार्थ-परिवर्जनम् विश्वनाथकेशवः छत्रे १७१-१८६

विनोद कणिका—
२२. मूर्खः कः ? श्रीसंतकुमार मीतलः २३२
समाचाराः— २३३-२३४

FORM IV

1. Place of Publication	.. Sadhu Ashram, Hoshiarpur
2. Periodicity of its Publication	.. Quarterly.
3. Printer's Name	.. Sh. DEV DATTA Shastri.
Nationality	.. INDIAN.
Address	.. P.O. Sadhu Ashram, Hoshiarpur.
4. Publisher's Name	.. Sh. DEV DATTA Shastri.
Nationality	.. INDIAN.
Address	.. Sadhu Ashram, Hoshiarpur.
5. Editor's Name	.. Dr. VISHVA BANDHU
Nationality	... INDIAN.
Address	P. O. Sadhu Ashram, Hoshiarpur.
6. Names and addresses of individuals who own the newspaper and partners or shareholders holding more than one percent of the total capital.	V. V. R. Institute Society, ..Sadhu Ashram, Hoshiarpur.

I, DEV DATTA SHASTRI, hereby declare that the particulars given above are true to the best of my knowledge and belief.

Date : 23-12-1969.

DEV DATTA SHASTRI
Publisher

सूचना

यैः खलु ग्राहकैः स्वीयं विश्वसंस्कृतस्य गतवर्षस्य
प्रवर्तमान-वर्षस्य च ग्राहकता-शुल्कम्
इदानीं पर्यन्तं न प्रेषितं ते तत्
शीघ्रं प्रेष्य पत्र-सवर्द्धनेन
संस्कृतम् अपि संवर्द्धयन्तु ।

सा.२०२८ अं०२६०३

विश्व-संस्कृतम्

विश्व-ज्योतिः सदा शुभ्रं संस्कृतं विश्वम् आचरत् ।
साहित्यस्य सतः सिद्धचा उदितं विश्व-संस्कृतम् ॥

वर्षम् ६ } माघः, वैसाखः २०२५-२६ (फरवरी, मई १९६९) { अङ्कः २; ३

शाश्वती वाक्

इह चेद् अशकद् बोद्धुं प्राक् शरीरस्य विस्रसः ।
ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते ॥१॥

यथाऽऽदर्शे तथाऽऽत्मनि यथा स्वप्ने तथा पितृलोके ।
यथाऽप्सु परीव ददृशे तथा गन्धर्वलोके
छायातपयोर् इव ब्रह्मलोके ॥२॥

इन्द्रियाणां पृथग्भावम् उदयाऽस्तमयौ च यत् ।
पृथग् उत्पद्यमानानां मत्वा धीरा न शोचति ॥३॥

इन्द्रियेभ्यः परं मनो मनसः सत्वम् उत्तमम् ।
सत्त्वाद् अधि महानात्मा महतोऽव्यक्तमुत्तमम् ॥४॥

अव्यक्तात् तु परः पुरुषो व्यापकोऽलिङ्ग एव च ।
यं ज्ञात्वा मुच्यते जन्तुर् अमृतत्वं च गच्छति ॥५॥
(कठोपनिषद् (२.३,४-८)

संस्कृतम्

इन्द्रदत्तउनियाल:*

एकं द्विधा यत्प्रथमं विलोक्यते
ततो विकाशाद् विविधं प्रकाशते।
मूलं न यस्याऽद्य कुतोऽपि लभ्यते
परं स्वयं मूलमिवात्र दृश्यते॥

आद्यन्तहीनं सुमहत्प्रभावं,
प्रभावतां यत् निखिलं निधानम्।
यच्चातिरम्यं न च सर्वगम्यं
न प्राप्यते यद्धि विना विधानम्॥

यद् वर्णहीनं न तु वर्णहीनं
सुवर्णनं यस्य कृतं सुविज्ञैः।
लब्ध्वा यदानन्दममन्दमत्र
प्राप्नोत्यजस्रं हि रसज्ञ-लोकः॥

सूक्ष्मातिसूक्ष्मं च विशालरूपं
रूपं पुराणं न च यस्य प्राप्तम्।
प्राज्ञोऽपि यस्येह न पारमेति
ब्रह्मेव तत् संस्कृतमद्य नौमि॥

---

*उपसम्पादकः।

साहित्यदर्पणे पदगत-विधेयाऽविमर्श-दोषः

विश्वनाथभट्टाचार्यः*

गुरुपादकृपापुण्याल् लब्धसिद्धान्तपद्धतिः ।
दर्पणार्थपरिष्कारं विदधे विदुषां मुदे ॥

वाक्ये विधेयस्य विशेष्य-भागस्याऽविमर्शः प्रधानतया विचार-विरहो विधेयाऽविमर्शो नाम काव्ये नित्य-दोषः । एतस्य दोषस्य नामान्तरम् अविमृष्टविधेयांश इति । अविमृष्टः प्राधान्येनाऽगणितो वाक्ये रसाद्यननुगुण-समासनादिना न्यग्भावेनोपादानाद् विधेयांशोऽनुवाद्यपर्यवसान-भूमिर् यस्मिन् तत्त्वम् इति हृदयम् । रसादि-प्रतीति-विलम्बश् चाऽत्र काव्यापकर्षणबीज इति विदितम् एतद् विदितवेदितव्यानां शेमुषीजुषाम् ।

सोऽयं विलम्बः क्वचित् सकृद् असकृद् वाप्य् अनुचित-समसनेन, क्वचिच्चोद्देश्यविधेययोः पौर्वापर्य-विपर्ययेण संभवति । तत् सकृत् प्रयुक्ते दुष्ट-समासे पद-दोषत्वम्, अनेकस्मिन् दुष्ट-समासे, अनूद्य-विधेयपौर्वापर्य-वैपरीत्ये च वाक्य-दोषत्वम् इति विधेयाऽविमर्शो द्विधेत्यास्तां तद्विस्तु विस्तरः ।

अधुना वाक्य-दोष-प्रकारान् अपहाय सुप्सुपादि-घटितेषु पददोषस्थलेष्व् अपि प्रकृतं नञ्समासमात्रम् अधिकृत्य माननीयेषु अनूचान-वृन्दारकेषु वन्दारुभिर् अस्माभिः किञ्चिद् इह प्रपञ्च्यते ।

प्रस्तुतस्य नञ्तत्पुरुष-समासगतस्य विधेयाऽविमर्श-दोषस्योदाहरण-तया 'अमुक्ता भवता नाथ मुहूर्तमपि सा पुरे'ति वाक्यं 'सा आनन्द सिन्धुः'···क्षणम् अप्य् अमुक्तेति प्रकाशोदाहरणं मनसि कृत्वा साहित्यदर्पण-कृतोपन्यस्तम् । अस्मिन् दर्पणोदाहरणे "अमुक्ते"ति पदस्य 'न मुक्ते'ति

*एम्. ए., पि-एच्. डी. ; विश्वभारती-विश्वविद्यालय-विद्याभवन-संस्कृताध्यापकः

लौकिक-विग्रह-वाक्ये मुक्तेतिपदान्तर्गतेन नञ्-समभिव्याहृत-पदार्थ ताऽवच्छेदकेन क्रियांशेन विधिभूतेन सुचिना साक्षात्-सम्बद्धत्वेनाऽत्यन्ता-भाव-वाचिनो विधेय-भूतस्य नञः प्रसज्य-प्रतिषेधार्थ-समर्पकत्वम् इति अनुचिते नञ्-तत्पुरुषसमासे कृते सति उत्तर-पदार्थप्राधान्याभ्युपगमाद् मुक्तेति समासचरमावयवस्य प्राधान्ये जाते पूर्वावयवस्य नञो विवक्षित-विधेयत्वेऽपि पर्युदासवद् अनुवाद्यत्व-प्रतीति-कारितयोपसर्जनीभावापत्तेर् मुख्याया विधेयतायां न स्फुटतया प्रतीतिः स्फुरति । अतो न मुक्तेति व्यपेक्षा-सामर्थ्यम् एवोचितम् इत्य् एतावती दर्पण-तात्पर्ये न काचिद् विप्रतिपत्तिः ।

परन्तु प्रकाश-दीपिकाकारस्य तदीय-प्रपितामहानुज-सूनोश् चण्डी-दासस्य विचार-सरणिं मनसि निधाय यद् दर्पण-कारेण नञः पर्युदास-वृत्तिम् 'आश्रित्यासूर्यम्पश्या राजदारा,' 'अश्राद्ध-भोजी ब्राह्मण' इत्यादीनि विधेयाऽविमर्शदोष-प्रत्युदाहरणानि व्याकृतानि, तच्चिन्त्यम् ।

सूर्यं न पश्यन्ति ये त इति उपपदतत्पुरुष-समासस्य लौकिक-विग्रहवाक्ये प्रसज्य-वृत्तेर् नञः क्रियांशेन सकर्मकेण दृशिना साक्षाद् अन्वयो, दृशि-कर्मणा सूर्येण तु दृशिद्वारक एव परोक्षः । एवं सति नञ्-विशिष्टे उपपदे असूर्य-शब्दे एकार्थीभाव-सामर्थ्याभावेऽपि "असूर्यललाटयोर्दृशितपोः" इति पाणिनीय-प्रयोग-लिङ्गाद् असमर्थ-समासोऽभ्युपेयः । असमर्थ-समास-समाश्रयण-बलाद् दृशिना साक्षाद् अन्वितं सौत्र-प्रयोग-ज्ञापितं पद-साधन-दशायां स्वतः प्रसज्य-वृत्तिं नञं परोक्षतया सम्बद्धं दृशिकर्म कथम् अपि न पर्युदासयितुम् ईष्टे । अतः सूर्यं न पश्यन्ति ये त इति नञ्समनन्तरम् एव क्रिया-पदोपादानाद् नञः प्रसज्य-प्रतिषेधार्थाभिप्रायकं लौकिक-विग्रह-वाक्यम्—न तु न सूर्यम् इत्यादि कर्म-व्यवधायकम् ।

ननु क्रियांशम् उपमृद्य कर्त्रंशेनैव नञ् घटयितुं शक्य इति चेन् ? न; अन्तर्भूत-कैमुत्याभ्युपगमाद् जहद्-अजहत्-स्वार्था भक्तिम् आदाय तात्पर्यार्थोपपत्तौ पार्यन्तिक-गुप्ति-रूप-पर्युदाससत्त्वेऽपि पद-साधन-दशायां क्रियांशेनैव नञः साक्षात् सम्बन्धम् आश्रित्य प्रसज्यवृत्तित्वम् इति महाभाष्य-सिद्धान्त-भङ्गापत्तेः ।

न च 'न सूर्यं' इति स्थिते असूर्यं इति प्रथमतः समर्थं नञ्-समासं कृत्वा तद्-अनन्तरम् असूर्यं पश्यन्ति ये त इत्य् उपपद-तत्पुरुषः कार्य इति वाच्यम्, तथा सति पर्युदासलभ्यः सूर्यभिन्न-पदार्थ-दर्शनकारित्व-रूपो विवक्षा-विरुद्धोऽर्थः प्रसज्येत ।

न चाऽपि न सूर्यम्पश्या इति स्थिते नञ्-समासेनाऽसूर्यम्पश्या इति वक्तुम् उपपद्यते—खशोऽनुपपत्तेः ।

अत एवाऽसमर्थ-समाससिद्धे असूर्य-शब्दे उपपदे दृशेः कर्तरि खश् समास-सत्त्वेऽपि नञः प्रसज्य-वृत्तित्वं चेति सिद्धान्तः ।

एवं श्राद्धं न भुङ्क्ते यः स इत्य् उपपद-तत्पुरुष-समासस्य लौकिक-विग्रह-वाक्ये इन्द्रिय-साध्ये राग-प्राप्ते विषये सति परिसंख्याऽनुकूलाद् अव्यवहितप्रयोगात् प्रसज्यवृत्तेर् नञः क्रियांशेन भुजिनैव साक्षात् सम्बन्धे सिद्धे भुजि-कर्मणा श्राद्ध-शब्देन परोक्षाऽन्वयेन असमर्थ-समासमात्र-समाश्रयणाद् नञ्-विशिष्टे अश्राद्ध-शब्दे उपपदे भुजेर् 'व्रते' इति सूत्रेण कर्तरि णिनिः । उपपदधातु-प्रत्यय-समुदायेन पार्यन्तिक-व्रतरूपपर्युदासबोधेऽपि पद-साधन-दशायां भुजिनैव साक्षाद् अन्वय-योग्यत्वाद् असमर्थ-समासाभ्युपगमेन नञः प्रसज्य-वृत्तित्वं न बाध्यते । इत्थम् अश्राद्धभोजीति पदम् उपोढप्रत्ययस्वरम् अन्तोदात्तम् इति सिद्धान्तः ।

ननु श्राद्धं भोक्तुं शीलम् अस्येति कर्तरि ताच्छीलिकं णिनिम् आदायोपपद-तत्पुरुषेण श्राद्धभोजीति पदं निष्पाद्य ततो न श्राद्ध-भोजीति नञ्-तत्पुरुषेण अश्राद्धभोजीति पदं व्याकर्तव्यम् इति चेन् ?—न; परिसंख्यानुकूलस्य 'व्रते' इति णिनिविधायक-सूत्रस्यैव मूलच्छेदापत्तेः, कुसृष्ट्या व्याख्यानाद् आद्युदात्तत्वापत्तेश् च ।

न च न श्राद्धम् इति स्थिते अश्राद्धम् इति प्रथमतो नञ्-समासं विधाय ततोऽश्राद्धं भुङ्क्ते यः स इत्युपपद-तत्पुरुषेण अश्राद्धभोजीति पदं व्युत्पाद्यम् इति वाच्यम्—परिसंख्या-हानेः, ताच्छीलिक-णिन्यनुपपत्तेश् च ।

न चाऽत्र कर्त्रंशेनैव नञः सम्बन्ध इति वाच्यम्। परिसंख्याया एव विवक्षितत्वात् तदनुकूल एव क्रियांशमात्रगामी प्रसज्यवृत्तिर् नञ्, असमर्थसमासो, व्रतबोधको णिनिश् चेति त्रितयस्यैव सन्निधानेनेष्टसिद्धिः। ताच्छीलिको णिनिर् नैवात्र कथम् अपि घटते।

तथापि नञः पर्युदासलाभार्थं कर्त्रंशेनैवेति सम्बन्धम् उद्भावयितुं दुराग्रहश् चेत्—तर्हि 'अपुनर्गेयाः श्लोका' इति वाक्ये नञः कर्त्रंशाभावे कर्मांशेन सम्बन्धाऽनङ्गीकारात् पर्युदासो न सिध्यति, प्रसज्य-प्रतिषेधस् तु दुर्वारः। सिद्धान्त-पक्षे पुनर् न गेया इति लौकिक-विग्रह-वाक्याद् असमर्थ-समास-बलात् क्रियांशमात्र-गामिनो नञः प्रसज्यवृत्तित्वं सुसाधम्।

न च प्रकृतस्य दर्पणोदाहरणस्य 'अमुक्ते'ति पदे नञः कर्त्रंशाभावे कर्मांशेनाऽन्वयाद् विधेयाऽविमर्शदोष इति वाच्यम्। अमुक्तवान् भवान् नाथ मुहूर्तम् अपि तां पुरेति वाच्यान्तरेण कर्त्रंशेनापि सम्बन्धे विधेयाऽविमर्श-दोषस्य दुष्परिहरत्वात् तत्रापि नञः प्रसज्य-वृत्तित्वं वक्तुं शक्यम्।

न चामुक्तेति पदे असूर्यम्पश्येत्यादि-शिष्ट-प्रयोग-दर्शनात् प्रसज्य-प्रतिषेधोऽसमर्थ-समासश् चेति वक्तुम् उचितम्—ज्ञापक-विधेः सार्वत्रिकत्व-विरहात्।

तस्मात् 'स्थूणा-निखनन-न्यायेन' व्यासेधाम—असूर्यम्पश्येत्यादि-पदेषु असमर्थ-समासेन नञः प्रसज्यवृत्तित्वं न व्याहन्यत इति न दोषः। अमुक्तेति पदे प्रत्युत समर्थ-समासो विधेय-भूतस्य नञः प्रसज्यवृत्तित्वं बाधत इति नञ्-तत्पुरुषसमासघटित-पदगत-विधेयाऽविमर्शदोषो भवत्य् एवेति शम्।

कविराजः श्रीमल्लोलिम्बराजः

ब्रह्मानन्दत्रिपाठीः*

आराध्यः कविराजोऽयं भिषग्भिः कविभिर्मुदा ।
इत्याशावलमाश्रित्य निबन्धस्तन्यते मया ॥

एषा भरतवसुमती एकतो महापुरुषैः पवित्रीकृता, अपरतो व्यासवाल्मीकि-कालिदासादिभिः स्वकीय-काव्यकुसुमनिचयैश्च चिरं समर्चिताऽद्याऽपि राजते, एतादृशेष्वेव महा-कविष्वन्यतम उल्लाघलाघवः श्रीमल्लोलिम्बराजोऽपि वरीवर्ति, स्वान्तः सुखाय काव्य-रचना-व्यसनितां गतानां प्राचीन-कवीनां पद्धतिम् अनुसरता कविवरेणाऽपि स्वकीय-रचनासु क्वापि किम् अपि न तथोल्लिखितं येनैतस्य देशकालादिसूचना सम्यक् लभ्येत । वैद्यजीवनस्याधस्तनं पद्यं स्मारयति यद् एतस्य पितुर् नाम 'दिवाकर' इत्य् आसीत् । यथा—

दिवाकरप्रसादेन रोगाऽऽरोग्यसमीहया ।
समासेन वयं कुर्मः काव्यं सद् वैद्यजीवनम् ॥ इति ।

चमत्कारचिन्तामणाव् अपि तादृग् एव पद्यम् चक्षुषोर् अग्रे परिस्फुरति । अमुष्य ग्रन्थेष्व् अन्याभ्यः संहिताभ्यो वाग्भट-संहितायाः प्रभावो विशेषेण निरीक्ष्यते, इदम् एव ग्रन्थकर्त्रापि "वाग्भटस्य मतम् अस्ति समस्तम्" स्वीकृतम् । अतः कवेर् अस्य कालनिर्णये किमपि सक्षमा वयम् इत्थं वक्तुं पारयामो यद् एष विद्वान् वाग्भटात् परवर्तीति । वैद्यावतंसे कारवेल्लस्य गुणादिवर्णना-वसरेऽस्याधस्तनं पद्यं संकेतयति यद् अनेन स्वजनुषा महाराष्ट्राऽध्वनिः समलङ्कृता। तद् यथा—

जाम्बूनदीयां प्रतिमां यदीयां वक्षस्थले वामदृशो वहन्ति ।
अशेषशाकावलि-मण्डनत्वं तत्कारवेल्लं न लभेत कस्मात् ॥

---

*एम. ए. साहित्याचार्यः, आयुर्वेदाचार्यः, ज्योतिषाचार्यः ।

महाराष्ट्र-देशवासिन्यः सुन्दर्यः स्वर्णमयं कारवल्लं कण्ठाभरणतां नयन्तीति प्रसिद्धिः। तथा च महाराष्ट्र-भाषायां लिखितेन रत्नकलाचरितेनाऽपि कवेर् दाक्षिणात्यत्वं सिद्ध्यति। हरिविलास-काव्यस्य प्रतिसर्गान्तं लिखितेन "श्रीसूर्यसूनुहरिभूमिभुजोनियोगात्" इति पद्यांशेन सूर्यसूनुत्वं हरिहर-नरेशाश्रितता चाऽस्य प्रकटीभवति। किन्त्व् अद्यावधि कोऽयं हरिहरनरेशः कुत्रत्यो वेति न सम्यङ् निर्णयो जातः। मन्ये बीजापुर-राजधान्याः परिसरे एतन्नामकः कश्चित् सामन्तः स्याद् यस्य नाम राज्ञां वंशावल्यां न परिगणितः स्यात्।

गुर्जरभाषायां लिखिते महाजनमण्डलाभिधे पुस्तके लेखकः श्रीमल्लोलिम्बराजस्य समयः १६३४ ईशवीयवत्सरं स्वीकरोति, एष समयः प्रमाणान्तरैर् अपि प्रमाणीभवति। तेनेदम् अपि ज्यलेखि, अयं पुण्यपत्तनात् (पूना) १० क्रोशदूरस्थित जुन्नर-ग्रामवासीति। श्रूयते यत् पण्डितप्रवरस्याऽस्य परिणयः कस्याप्य् अज्ञातनामधेयस्य यवनराजस्य मुरासा कन्यया सह समजनि, विवाहानन्तरम् अनेन विपश्चिता तस्या नाम रत्नकला इति निरधारि। उपरि लिखिते उभे अपि नामनी वैद्य-जीवने द्रष्टुं सुलभे। अनुमीयते यत् कामिनी-स्नेह-स्निग्ध-मनसा कविपातशाहेन विवाहानन्तरं प्रथम-प्रथमं वैद्य-जीवनम् एव निरमायि। तस्यैकादशः श्लोको दृष्टान्तरूपेणात्र ब्रह्मणा समुपस्थाप्यते—

महीन्द्रमहिलात्रपाप्रदपदारविन्दे तथा
पयोनिधिपयस्तती जलधरैरुपात्ता यथा।
मम प्रकृति-नीरसा नृपभिषग्भिरंगीकृता
भविष्यति सरस्वती रसवती 'मुरासा' पतेः॥ स्पष्टम्।

पद्येनाऽनेन सप्तशृङ्ग्याः कृपापात्रस्य शुष्क-जीवनं यापितवतो लोलिम्बराजस्य प्राक् प्रकृतिर् नीरसाऽऽसीद् इति विज्ञायते। किन्तु लावण्य-पूर्णायाः सौन्दर्यगर्वोद्धुरायाः मुरासायाः सङ्गमेन सा रूक्षाऽपि प्रकृतिः प्रकामं सरसतां गता। एतद्-अतिरिक्तं मुरासानामोल्लेखः क्वापि नैवावलोक्यतेऽस्य ग्रन्थेषु। ऐतिहासिक-ग्रन्थानाम् अवलोकनेन परिज्ञायते यद् एष सङ्गीत-विद्यायाम् अपि पारङ्गत आसीत्, किन्तु सङ्गीत-विषये कोऽपि ग्रन्थोऽस्य नाद्यावधि लभ्यते।

सम्प्रत्य् अस्य महाकवेः—वैद्यावतंसः, वैद्यजीवनम्, चमत्कारचिन्तामणिः, हरिविलासकाव्यम्, रत्नकला-चरितं चेति ग्रन्था समुपलब्धा भवन्ति ।

रचनायाः पौर्वापर्यक्रमः--सप्तशृङ्ग्या वरं प्राप्यायं संगीत-रसिको जात इति श्रूयते । परं तद्-विषयः कोऽपि ग्रन्थः परिचिन्वताऽपि मया नादर्शि । अतः परं वैद्यावतंसाभिधो लघु-निघण्टुर् निरमायि । विवाहानन्तरं वैद्यजीवनम् चमत्कार-चिन्तामणिश् च । एतेषां निर्माणानन्तरं लोलिम्बराजः प्रियया वियुक्तो बभूव, तस्या विरहव्यथा-व्याकुलितेन कविना रत्नकला-चरितं समुद्ङ्कितम् अन्ते निर्विण्णेन तेन हरिविलासाऽख्यं काव्यम् अकारि ।

वैद्यावतंसोऽयं लघुनिघण्टुः किंवा सर्वेषाम् आयुर्वेदीयनिघण्टूनां सारांशः । अस्मिन् दैनिकोपयोगि-पदार्थानां संग्रहो वर्णनं च कृतम् अस्ति । यथा प्रतिज्ञातं कविना--

यत्प्रसिद्धमिह वर्तते फलं शाकमन्यदपि तन्निरूप्यते ।
अप्रसिद्धकथनं हि निष्फलं ग्रन्थविस्तरभयान्न लिख्यते ॥ इति ।

वैद्यजीवनम्—ग्रन्थेऽस्मिन् अध्याय-रूपाः पञ्च विलासाः । श्लोक-संख्या प्रायः २०५ विद्यते । प्रायः शब्दो हस्तलिखित-पुस्तकेषु पाठभेदम् अवलोक्य प्रयुज्यते । अस्मिन् ज्वरादि-रोगम् आरभ्य वाजीकरणान्तं स्वानुभूता शास्त्र-सम्मता च चिकित्सा वर्णिताऽस्ति । अस्यायुर्वेद-विषयस्य व्याख्यानम् अपि काव्यरचना-व्यसनितां प्रकटयति ।

चमत्कारचिन्तामणिः—अत्राऽपि वैद्य-जीवनवत् पञ्च विलासाः । श्लोक-संख्या २४१ विद्यते । अस्मिन्न् अपि चिकित्सा-विषयः समुज्जृम्भते । मन्ये वैद्यजीवनस्य रचनाद् अतृप्तेन कविराजेनाऽस्य निर्माणं कृतं स्यात् ।

रत्नकलाचरितम्--स्व-प्रेयस्याः स्वर्ग-गमनेन विरहकातरीभूय संस्कृत-च्छन्दस्सु ८५ पञ्चाशीति पद्यानि लिखितानि । तेषु केवलं कवेर् वियोग-जन्यो विलाप एव एवाऽस्ति . तद् यथा—

मजविण घडि कोठे जासिनां तू रसाले ।
न पुसत परलोका केविगेलीस बाले ॥ इत्यादिः ।

तस्यैवानुवादः—

मा विहाय क्षणं नान्यद् गमनं तेऽभवत् प्रिये ।
अपृष्ट्वा त्वं कथं स्वर्गमद्य याता कृशोदरि ॥ इत्येवं क्रियते ।

हरिविलास-काव्यम्—काव्यम् इदं पञ्चसर्गात्मकम् । अस्मिन् श्रीकृष्णस्य बाल-लीला नन्दगृहागमनाद् आरभ्य उद्धव-सन्देश-पर्यन्तं वर्णिताः सन्ति । एतद् विभिन्नालंकारैर् अलंकृतम् प्रसाद-माधुर्यादि-गुणैः परिपूर्णं विलसति । अत्र प्रतिसर्गं बहुविधच्छन्दसां समावेशः परिदृश्यते । प्रसङ्गेऽस्मिन् ग्रन्थान् निर्मथ्य सुभाषितात्मकं नव-नवनीतम् उद्धृत्य पाठकेभ्य उपहारीकुर्वन् आत्मनः सन्तोषम् अनुभवामि । तत्र प्रथमं प्रसङ्गात् प्राप्तम् एकं संवादात्मकं पद्यम् प्रस्तूयते—यद्यपि ऐतिहासिक-दृष्ट्या पद्यम् इदं प्रामाणिकतां नैव भजते तथाप्य् अस्य हृदयाऽऽवर्जकता बलान् मुखरीकरोति—अत्र भोजराजः लोलिम्बराजं प्रति कथयति—

भो लोलिम्बकवे ! कुरु प्रणमनं किं स्थाणुवत् स्थीयते,
कस्मै भोजनृपाल ! बालशशिने, नायं शशी वर्तते ।
किं तद् व्योम्नि विभाति चास्तसमये, चण्डद्युतेर्वाजिनः,
पादत्राणमिदं जवाद् विगलितं खे राजतं राजते ॥

अत्र कवेः प्रत्युत्पन्न-मतित्वं सचेतसां मनांसि हठाद् आवर्जयति । हरिविलासे रासक्रीडा-संसक्त-हृदया राधिकादयः सहसा तिरोहितं नयनानन्दकरं नन्द-नन्दनं परिचिन्वन्त्यः प्रोन्नतं चन्दन-वृक्षम् आपृच्छन्ति—

भो भो भूरुह ! ते दिशो दश गताः शाखाः शिरश्चाम्बरं,
गोपः कोऽपि तमालकोमलरुचिः कच्चिन्न दृष्टस्त्वया ।
इत्थं ताभिरुदाहृते बत बलाद् वक्तुं वचोऽनीश्वरो
मूर्ध्ना वायुचलेन चन्दनतरुः प्रत्युत्तरं दत्तवान् ॥ हरिविलासे ।

पद्यम् इदं समुपवर्ण्य कविः कालिदासादीन् अतिशेते । शकुन्तलायाः पतिगृहगमन-समये कण्वः वृक्षादीन् सूचयति यद् एषा जिगमिषति, किन्तु ते न किम् अप्य् उत्तरम् अददुः । काकतालीय-न्यायेन कोकिला-रवम् आकर्ण्य कथयति—

अनुमतगमना शकुन्तला तरुभिरियं वनवास-बन्धुभिः ।
परभृतविरुतं कलं यतः प्रतिवचनीकृतमेभिरात्मनः ॥ इति ।

कालिदासीये शाकुन्तले जडानां जडत्वं तथाविधम् एव चित्रितम्, किन्तु लोलिम्बराजीयेऽस्मिन् पद्ये एतावद् वैशिष्ट्यं यत् तासां करुणयाऽवरुद्ध-कण्ठोऽपि चन्दनतरुः वायुचलेन मूर्ध्ना (नैव दृष्ट इत्याकारकं) प्रत्युत्तरं दत्तवान्। अस्यैव काव्यस्याऽन्तिम-पद्ये कवेः गर्वोक्तिम् अनुशीलयन्तु—

सुजनैः कुजनैरपि रत्नकलारमणस्य कवेः कविताश्रवणात्।
मुरलीरणितं भ्रमरीभणितं, रमणीरणितं, तृणवद् गणितम् ॥ इति।

एषा न केवला गर्वोक्तिः अपितु वास्तविकता। साहित्य-रसिका नूनम् अभ्यस्यन्तु महाकवेः अस्य काव्यानि। न केवलं साहित्य एव, अपितु आयुर्वैदिकग्रन्थ-रचनाऽवसरेऽपि तादृश्य एव साहित्यनिर्झरिणी पाठकान् सिञ्चन्ती विलसति। अत्र वैद्यावतंसीये आद्यान्तिमे मङ्गलाचरणे प्रसङ्गाद् उदाहियेते—

अनुकृतमरकतवर्णा शोभितकर्णा कदम्बकुसुमेन।
नखमुखमुखरितवीणा मध्येक्षीणा शिवा शिवं कुर्यात् ॥

अधरन्यक्कृतबिम्बा जितशशिबिम्बा मुखप्रभया।
गमने सुखदविलम्बा, विपुलनितम्बा शिवा शिवं कुर्यात् ॥

कविना पद्य-द्वयेन स्वाभीष्ट-देवता सप्तशृङ्गी अभिष्टुता। इतः परं 'चमत्कारचिन्तामणेः' पद्यानि समास्वादयन्तु। तत्र मङ्गलाचरणे अक्षरं पद्यम् प्रस्तौति—

नमामि मानिनं रामं निर्ममं राममारमम्।
नुन्न राम मनो मानं नर नारी मनोरमम् ॥ इति।

अर्थः—राज्यं परित्यज्य वनं गच्छन्तं स्वाभिमानिनं, परशुरामस्याभिमान-नाशकं नरनारीमनोरमं रामं नमामि। रामा चासौ मा: लक्ष्मीः तस्या रमणं बलरामं नमामि। द्वितीयोदाहरणे वाजीकरणयोग्या स्त्री प्रस्तूयते—

रहसि गलितलज्जा बाह्यदेशे सलज्जा,
कुचभरनमिताङ्गी चन्दनक्षालिताङ्गी।
मृदुतरमुपयान्ती श्रोणिवक्षोजभारात्,
द्रढयति कमलाक्षी कस्य कामं न कामः ॥ इति।

अन्ते आयुर्वेदमयेऽपि 'वैद्यजीवने' साहित्य-रसास्वादम् आस्वादयन्तु। अस्मिन् ग्रन्थे कविना स्वकीय-कवित्व-शक्तेः पराकाष्ठा प्रादर्शि। सम्पूर्णेऽस्मिन् ग्रन्थे उपमाकूटध्वन्यन्तर्लापिका-बहिर्लापिका-कर्तृगुप्त-क्रियागुप्तादि-काव्यगत-विशेषतानां प्राकाम्यं विद्यते। तद् यथा—

येषां न चेतो ललनासु लग्नं मग्नं न साहित्यसुधासमुद्रे।
ज्ञास्यन्ति ते किं मम हा प्रयासान् अन्धा यथा वारवधूविलासान्॥ इति।

रावणस्य सुतो हन्याद् मुखवारिजधारितः।
श्वसनं कसनं चापि तमिवानिलनन्दनः॥

अर्थस् त्व् इत्थम् अवगन्तव्यः—रावणसुतः अक्षः=बिभीतकः मुखे धृतः श्वासकासान् तथा जयति यथा हनूमान् अक्षम् अजयत्।

बहिर्लापिका—

भिन्दन्ति के कुञ्जरकर्णपालिं किमव्ययं वक्ति रते नवोढा।
सम्बोधनं नुः किमु रक्तपित्तं निहन्ति वामोरु वद त्वमेव॥ इति।

अर्थश् चेत्थम्—कुञ्जराणां कर्णपालिं के भिन्दन्ति सिंहाः, नवोढा रते किमव्ययं वक्ति, न इति। नृशब्दस्य सम्बोधनं किम् नः। अर्थात् सिंहाननः= वासककाथः रक्तपित्तं हरति।

क्रियागुप्तः—

कफाद् भवति भो भीरुच्छिन्नाक्काथो मधूदरः।
अस्यार्थो लभ्यते नैव तन्वङ्गि तव मध्यवत्॥ इति।

अर्थः—मधुमिश्रितः गुडूची-क्काथः कफम् अत्तीति कफाद्=कफनाशको भवति। हे तन्वङ्गि! तव मध्यवद् वस्त्राच्छन्नकटि-प्रदेशवद् अस्यार्थो नैव लभ्यते।

कर्तृगुप्तः—

पित्तातिसारो धान्याम्बु बिल्वाब्दानां निरुध्यते।
केनात्र ज्ञायते कर्त्ता पण्डितेन त्वया विना॥ इति।

अर्थः—अत्र रत्नकलाया लोलिम्बराजं प्रति प्रश्नः—धान्याम्बुबिल्वाब्दानां केन जलेन पित्तातिसारो निरुध्यते। त्वया पण्डितेन विना केन कर्त्ता ज्ञायते। श्लेषम् उदीरयति—

यो भजेत्समधुश्यामां हे हेमकलशस्तनि।
विषमेषु व्यथास्तस्य न भवन्ति कदाचन॥ इति।

अर्थः—हे हेमकलशस्तनि ! सम्बोधनम् , यः विषमज्वरी मधुना सह त्रिवृता क्वाथं सेवते स तस्मान् मुक्तो भवति । द्वितीयोऽर्थः—सम्बोधनम्पूर्ववत्, यः कामज्वरी मधुपानमत्तां षोडशीं युवतिं भजेत् तस्य कामपीडाः कदाचन न भवन्तीति । विषमेषु=विषमज्वरेषु, किंवा विषमाः पञ्च इषवो यस्य सः कामः ।

विरोधाभासः—

मम द्वयं विस्मयमातनोति तिक्ताकषायो मुखतिक्तताघ्नः ।
निपीडितोरोजसरोजकोषा योषा प्रमोदं प्रचुरं प्रयाति ॥

अर्थः—मम लोलिम्बराजस्य वस्तुद्वयं विस्मयकारि तिक्ता (कुटकी) कषायः मुखकटुत्वनाशकः । प्रभावातिशयाद् इति समाधानम् । अपरं निपीडितोरोजकोषा योषा प्रियेण स्तन-युगल-पीडिता स्त्री प्रचुरं प्रमोदं प्रयाति । आनन्दानुभूतित्वात् । पतिपत्न्योः प्रश्नोत्तर-प्रकारः—

प्राणेश्वर ! प्रियतमे ! वद, किं वदामि ?
तत् कान्त ! तत् किमु ? मृगाक्षि ? यदग्निकारि ।
सम्यक् शृणु प्रणयिनि ! प्रणयिन् ! शृणोमि
खादेत् सनिम्बुरससैन्धवशृंगवेरम् ॥ इति ।

चिकित्सायां धर्म-परायणता —

नारायणं भजत रे ! जठरेण युक्ता
नारायणं भजत रे ! पवनेन युक्ताः ।
नारायणं भजत रे ! भवतीति युक्ता
नारायणात् परतरं नहि किञ्चिदस्ति ॥

अर्थः—रे बुभुक्षिता विश्वम्भराऽऽख्यं नारायणं भजत । मन्दाग्निनाऽभिभूता भाव-प्रकाशोक्तं नारायण-चूर्णं सेवध्वम् । वात-व्याधीनां शान्तये नारायणतैल-सेवनं कुरुत । मोक्षेच्छुका जलशायिनं नारायणम् उपासत ।

ईदृग्विधैर् गुण-गणैर् अलंकृतोऽप्य् अयं कवि-वरेण्यः समय-चक्रस्यावर्तैस् तिरोहितो नैव आयुर्वेद-विषये नाऽपि साहित्य-विषये न च सङ्गीत-विषये साम्प्रतिकैर् विद्वद्भिर् उररीक्रियते । समागमिष्यति समयः, यदाऽस्य महाकवेः काव्यामृतं पिपासवोऽपि साहित्यका भुवि भावुका भविष्यन्ति । कविश् चाऽयं ख्यातिं गमिष्यति ।

षड्दर्शन-समन्वयः

ए. एस्. वेंकटाचलम्*

गताङ्काद् अग्रे

अथ साङ्ख्ययोगस्वरूपम्—

प्रवृत्तिस्तु ततः साङ्ख्य-योगयोरिति कथ्यते ।
आद्यस्य कपिलः कर्ता द्वितीयस्य पतञ्जलिः ॥४४॥

अस्ति सङ्ख्यावतामेवं निर्णयोऽद्यभिचारतः ।
रसाध्याय-युतं पूर्वं सिन्धुपादान्वितः परः ॥४५॥

भौतिकं दैविकं चैव तथाऽऽध्यात्ममिति त्रिधा ।
विभक्तं सकलं वस्तु जगत्यस्मान्न किञ्चन ॥४६॥

ज्ञानं ज्ञेयं तथा ज्ञाता सदाऽध्यक्षे विराजते ।
तत्खलु त्रिपुटीभानं कदा केन निवार्यते ॥४७॥

स्व-प्रकाशं ननु ज्ञानं ज्ञेयं च विषयादिकम् ।
ज्ञाता च पुरुषस्साक्षी कूटस्थोऽक्षर उच्यते ॥४८॥

विरागेण यदा रागस्समासक्तः तदा किल ।
सृष्टिर्भवति तत्त्वानां भूतादेश्च ततः परम् ॥४९॥

पञ्चविंशतितत्त्वानां गणना यत्र जायते ।
सा सङ्ख्या कथिता सद्भिः तदीयं साङ्ख्यमुच्यते ।५०॥

यदा तेषां जगत्यन्तर् ज्ञानं सङ्ख्यानमिष्यते ।
ये समश्नुवते साङ्ख्यास्त इमां भूमिमेव च ॥५१॥

विलोमे चानुलोमे च तत्त्वतो गणना भवेत् ।
पृथगेव विगृह्णाति तानि सर्वाणि पूरुषः ॥५२॥

---

*पण्डितः, संस्कृतविभागे; मैसूर ।

पुरुषो यौगिकः शब्दः शेते पुरि समन्ततः ।
निर्मलोऽपि सदा ज्ञानी प्राकृतान् भजते गुणान् ॥५३॥

विकरोति स्वकं भावं सुख्यत्यपि च दुःख्यति ।
सुखं दुःखं विजानाति दुःखं च सुखमित्यपि ॥५४॥

विवेकं सम्परित्यज्य चित्तधर्मैर् निबध्यते ।
भावनां सहजां सर्वां विवर्तयितुमीहते ॥५५॥

वेत्त्यात्मानं शरीरं तु कार्यं सर्वं करिष्यति ।
बुद्ध्या सदाभिमानी सन् पञ्चभूतेषु मुह्यति ॥५६॥

इयं सुनिश्चलात्माशीः चेतनस्य सदा मता ।
मा न भूवं च भूयासमिति नीतिविदो विदुः ॥५७॥

किञ्च मे न मनाग् दुःखं सुखमस्त्विति वाञ्छति ।
चेष्टते विविधो जन्मी तत्परं नाधिगच्छति ॥५८॥

वैष्णव्या माययाच्छन्नो नाना योनीर्विभाव्य च ।
गहने जन्मकूपेऽयं पारं नैति निमज्जति ॥५९॥

तत्र वा वासना कर्म निदानं बोभवीति हि ।
तद्दाम्ना च समाबद्धः ततो मुक्तिस्तु दुर्लभा ॥६०॥

संयोगो ह्यविवेकस्य बन्धहेतुरुदीर्यते ।
विवेकस्तदभावो हि मोक्षहेतुर्निगद्यते ॥६१॥

अविवेकोऽपृथग्भावो विवेकः पृथगात्मता ।
समेषां खलु तत्त्वानामिति तत्त्वविदां मतम् ॥६२॥

तत्क्षये समनुप्राप्ते कृपया परया गुरोः ।
तत्त्वत्वग्भ्यो विना भूत्वा भुङ्क्ते राज्यं स्वकीयकम् ॥६३॥

ख्याधातोर्ज्ञानमर्थस्तु सम्यित्यन्वर्थबोधकः ।
तत्फलं प्रकृतिस्सत्वं भिद्यते पुरुषादिति ॥६४॥

सङ्ख्याऽऽत्मविषया बुद्धिः साङ्ख्यास्तद्वन्त इत्यपि ।
समामनन्ति विद्वांसो युक्तियुक्तमिदं वचः ॥६५॥

प्रभूतानां च तत्त्वानां क्रमो यश्च निरूपितः ।
तेषां तेनैव सर्वेषां लयोऽप्यभिमतः खलु ॥६६॥

एकैकं सम्परित्यज्य विगृह्य च पुनः पुनः ।
तानि सर्वाणि सन्तीर्य पुरुषः शिष्यते परः ॥६७॥

सैषाऽद्य कालिकावस्था मोक्षस्यार्धा समीरिता ।
साङ्ख्येनैव सुसाधेयं, शिष्टं सायुज्यमुत्तरम् ॥६८॥

योगिनां तन्मनीषेति योगेनैव निपूर्यते ।
ज्ञेयत्वं ज्ञातृतां हित्वा ज्ञानधर्मं समश्नुते । ६९॥

योगो युक्तिस्समाधानं जीवात्मपरमात्मनोः ।
स्थित्युद्भवस्वरूपज्ञा इत्थमाहुर्मनीषिणः ॥७०॥

यदा हि पुरुषस्तादृक्स्वरूपे प्रतितिष्ठति ।
तदा सोऽहं भवेद्ब्रह्मो नित्यः सर्वगतश्शुचिः ॥७१॥

कला ज्ञानस्य जीवोऽयं समटाट्य समन्ततः ।
आसाद्यान्ते कलानाथं स्वगेहे सुविराजते ॥७२॥

बाह्यत्वात् प्रकृतेस्साङ्ख्यं बाह्याङ्गमिति चक्षते ।
पुरुषस्यान्तरङ्गत्वादान्तरो योग उच्यते ॥७३॥

अङ्गत्वमङ्गिता चैवं रूपितस्साङ्ख्ययोगयोः ।
मेयप्रमाणयोर्ज्ञानं पुरुषस्य समीरितम् ॥७४॥

प्राक्, ततः प्रकृतेर्भेदः सम्पाद्यस्सार्वकालिकः ।
मत्वा न्यायात्तयोरेवं रूपणं ननु युज्यते ॥७५॥

इति साङ्ख्ययोग-स्वरूप-समासनिरूपणम् ।

अथ मीमांसानिरूपणम्—

अस्त्येवं पूर्वमीमांसा जैमिन्यादिप्रवर्तिता ।
बोधिका कर्मरूपस्य युक्ता द्वादशलक्षणैः ॥७६॥

निःश्रेयसस्य शेषात्मा धर्म एव विचार्यते ।
तदनुष्ठानतस्सर्वे मुक्तास्स्युर्नात्र संशयः ॥७७॥

(क्रमशः)

करुणविप्रलम्भो नाम शृङ्गारः

श्रीनिवासः*

सन्ति हि करुण-विप्रलम्भनाम्नः शृङ्गारस्य विषये प्राचाम् अर्वाचाम् आचार्याणां काश्चिद् विप्रतिपत्तयः। तत्र केचन नास्त्य् एव करुणविप्रलम्भो नाम कश्चिच् शृङ्गार-भेद इति मन्यन्ते। अपरे करुणविप्रलम्भाख्यं भेदं महता संरम्भेण साधयन्ति। भरतमुनिना, आनन्दवर्द्धनेन, धनञ्जयेन, मम्मटेन च न गणित एव कश्चित् करुण-विप्रलम्भो नाम विप्रलम्भ-भेदः[1]। रुद्रटेन काव्यालङ्कारे, भोजराजेन च सरस्वतीकण्ठाभरणे, शिङ्गभूपालेन च रसार्णवसुधाकरे, कविराजविश्वनाथेन च साहित्यदर्पणे महता कण्ठेनोद्घोषितः करुणविप्रलम्भाख्यो भेदः[2]। ततश् च विचारणीयम् एतज् जायते यत् करुणाद् विप्रलम्भाच् च विविक्तं किम् अस्य स्वरूपम्? किञ् चाऽस्य क्षेत्रम्? साहित्य-शास्त्रे कथम् अस्य निरूपणं जातम्? कथञ् च रस-सिद्धैः कवीश्वरैः स्वकाव्येषु स्वीकृतः। नाऽत्र विप्रतिपत्तिर् यत् करुणः सर्वैर् एवाऽऽचार्यैः स्वीकृतः। तस्य स्थायिभावः शोकः। स च शोक इष्ट-नाशाद् अनिष्टप्राप्तेर् वा जायते। तत्र चेष्टनाशस्यायम् अर्थो यद् इष्टस्य जनस्य धनादेर् वा नाशः विलोपः, तस्य पुनर्लाभस्य सम्भावनाया अप्य् अभावः। तथा च इष्टो यो बन्धुबान्धवादिः, यस्य नाशो जायते, अथवाऽनिष्टो वध-बन्धनादिर् एव करुणस्यालम्बनविभावताम् आपद्यते। नष्टस्य बन्धुबान्धवादेर् दाहादिकं तु रसस्याऽस्योद्दीपन-विभावः। अत्र च रोदन-प्रलापादयोऽनुभावाः चिन्ता-दैन्य-विषादादयश् च सञ्चारि-भावाः। एतैर् विभावानुभाव-सञ्चारिभिः सहृदय-हृदय-स्थितः शोको नाम स्थायिभाव आस्वाद्यताम् आनीय-

---

*एम्. ए पी-एच्. डी., प्राध्यापकः, संस्कृतविभागे; कुरुक्षेत्र-विश्वविद्यालयः, कुरुक्षेत्रम्।

---

१. नाट्यशास्त्रम् (बड़ौदा १९५६), पृ० ३०३; ध्वन्यालोकः, २,१३ वृत्तिः। दशरूपकम्, ४,५०; काव्यप्रकाशः, ४,२९ वृत्तिः।

२. काव्यालङ्कारः १४,१; सरस्वतीकण्ठाभरणम्, परि ५; रसार्णवसुधाकरः। द्वितीयोल्लासः; साहित्यदर्पणः, ३,२०९।

मानः करुणो रस इति राद्धान्तः[१]। इष्ट-नाशाद् यः शोक उद्भवति तस्य कुमारसम्भवे रति-विलापः, रघुवंशो चाऽजविलापो निदर्शनम्। यश् चाऽनिष्टावाप्तेर् जायते तदर्थं रत्नावलीनाटिकायां सागरिकाया बन्धन-जन्यः शोक उदाहरणत्वेनोपस्थापयितुं शक्यते[२]।

अस्य च रसस्य ये रोदन-प्रलापादयोऽनुभावाः, चिन्ता-दैन्य-विषादादयश् च सञ्चारिणो भावास् ते विप्रलम्भशृङ्गारेण रति-भाव-ध्वनेर् विरह-पक्षेणाऽपि च संवदन्ति। अत एव यत्र क्वचिद् रसान्तरे सत्य् अपि करुण इव प्रतीयते। तथा हि—अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के कण्वस्य यः स्नेहसमुद्भवः सन्तापस् तत्र करुणस्य प्रसङ्ग इव प्रतिभाति। किन्तु न तत्रेष्ट-नाशो न चाऽनिष्टावाप्तिः। तस्मात् कण्व-हृदयस्थं विरह-दुःखं शोक एव वक्तुं न शक्यते। तत्र तु पुत्रीं प्रति स्नेहः (रतिभावः) एव सुतराम् अनुभूयते। तादृशश् च रति-भावो भाव-ध्वनित्वेन गणितो मम्मट-प्रभृतिभिः 'रतिर्देवादिविषया व्यभिचारी तथाञ्जितः'[३]। अन्यैस् तु[४] विश्वनाथ-प्रभृतिभिर् यैर् वात्सल्यरसः पृथग् रसत्वेनाङ्गीकृतस् तत्र वात्सल्य-रस एवाऽभिमतः स्यात्। ततश् च पुत्र्या वियोगोपस्थिति-जन्यं दुःखम् एव तत्र वर्ण्यते। तच् च वात्सल्य-रसस्य विरह-पक्षे पुत्र-विषयक-रति-भावस्य विरह-पक्षे वा निक्षिप्यत इत्य् अन्यद् एतत्। इत्थं च राम-कथाऽऽश्रितेषु काव्येषु राम-वनगमनाऽवसरे यो दशरथस्य विलापो वर्णितस् तत्राऽपि पुत्र-विषयक-रति-भावस्य वियोग-पक्ष एव मन्तव्यः। यदि तु तत्र रामस्य पुनर्दर्शनाऽऽशाऽपि निवर्त्तते इति मन्यते तदा तु करुणस्यैवाऽयं सन्दर्भः स्यात्। कण्वस्य दुःखानुभूतौ तु न निवर्त्तत एव पुनर्मिलनस्याऽऽशेति प्रकरणाद् अवगम्यते।

विप्रलम्भस् तु शृङ्गारस्य भेदः। यत्र चाऽन्योन्यानुरक्तयोर् यूनोः परस्परम् अनुरागो वर्ण्यते तत्रैव शृङ्गारो भवितुम् अर्हति। शृङ्गारस्य चाऽऽचार्यैर् अनेके प्रकाराः प्रदर्शिताः। तथा हि—भरतमुनिः शृङ्गारस्य सम्भोगविप्रलम्भौ द्वौ भेदौ प्रतिपादयति[५]। ध्वनिकारस् तु विप्रलम्भ-

---

१. साहित्यदर्पण, ३,२२२–२२६।
२. दशरूपकावलोकः, ४,८१–८२।
३. काव्यप्रकाशः, ४,३५।
४. साहित्यदर्पणः, ३,२५१।
५. नाट्यशास्त्रम्, अ० ६ पृ० ३०३।

स्याऽप्य् अभिलाषेर्ष्याविरह-प्रवासाख्यान् चतुरो भेदान् कथयति[१]। मम्मटश् च शापज-विप्रलम्भम् अप्य् अधिकं प्रपञ्चयति[२]। दशरूपक-कृतो धनञ्जयस्य त्व् एतस्मिन् विषये नवीनोद्भावना। ततश् च शृङ्गारस्य प्रथमतस् त्रयो भेदाः, सम्भोगः, अयोगः, विप्रयोगश् च। भेद-त्रय-करणे च धनञ्जयस्य योऽभिप्रायः सः धनिकेन संक्षेपतो वर्णितः[३]। तस्याऽयम् आशयो यद्यपि भरतादिभिर् विप्रलम्भ-शब्देनाऽयोगो विप्रयोगश् च द्वाव् अपि भेदौ संगृहीतौ तथाऽपि तन् न युक्ति-युक्तं प्रतिभाति। विप्रलम्भ-शब्दस्य हि वञ्चना-रूप एव मुख्योऽर्थः। यत्र च नायिकायै सङ्केतं दत्त्वाऽपि नायको यथासमयं नाऽऽयाति तादृशी वञ्चनैव साहित्य-शास्त्रे विप्रलम्भ-शब्देनोच्यते। तेनाऽयोग-विशेषो विप्रयोग-विशेष एव च विप्रलम्भ उच्यत इति यावत्। न चैवं सामान्यतः कृत्स्न एवाऽयोगो विप्रयोगश् च विप्रलम्भ-शब्दस्य वाच्यो भवितुम् अर्हति। तदर्थं तु विप्रलम्भ-शब्दस्य प्रयोग औपचारिक एव स्यात्। तच् च न युक्तम्। अतश् च विप्रलम्भ-शब्देन द्वाव् अपि न वक्तव्यौ प्रत्युत अयोग-शब्देन पूर्वरागोऽभिलाषो वा वाच्यः, विप्रयोग-शब्देन तु परस्परम् अनुरक्तयोर् नायक-नायिकयोर् विश्लेषः। विप्रयोगश् च द्विविधो मानविप्रयोगः, प्रवासविप्रयोगश् च। मानविप्रयोगोऽपि द्विविधः प्रणय-मानजः, ईर्ष्या-मानजश् च। प्रवास-विप्रयोगश् च त्रिधा भवति कार्यात्, संभ्रमात्, शापाच् च[४]। शृङ्गारस्योपरितने त्रिधा विभागे च केवलं शारदा-तनयेनैव धनञ्जयस्य मतम् अनुस्रियते[५]। अन्यैस् तु पारिभाषिक इव विप्रलम्भशब्दः स्वीक्रियते, अयोगविप्रयोगौ द्वाव् अपि चाऽनेन पदेन संगृह्येते। तथा च "परस्परानुरक्तयोर् अपि विलासिनोः पारतन्त्र्यादेर् अघटनं चित्तविश्लेषो वा विप्रलम्भः" इति नाट्यदर्पणे रामचन्द्रगुणचन्द्रौ[६]; "यत्र तु रतिः प्रकृष्टा नाभीष्टम् उपैति[७] विप्रलम्भोऽसौ" इति साहित्यदर्पणे विश्वनाथः। भोजराजेन[८] विश्वनाथेन[९] च विप्रलम्भस्य चत्वारो भेदाः

---

१. ध्वन्यालोकः, २,१३ वृत्तिः।
२. काव्यप्रकाशः, ४,२९ वृत्तिः।
३. दशरूपावलोकः, ४,५०।
४. दशरूपकम्, ४,५७–६४।
५. भावप्रकाशनम्, पृ० ८५।
६. नाट्यदर्पणः, ३,१६६।
७. साहित्यदर्पणः, ३,१८७।
८. सरस्वतीकण्ठाभरणम्, परि० ५।
९. साहित्यदर्पणः, ३,२०९।

प्रदर्शिताः—पूर्वरागः, मानः, प्रवासः, करुणश् च। विश्वनाथेन तु दशरूपकम् अनुसरता प्रवासस्य भेद-त्रयम् अपि संकलितम्—कायजः, शापजः, संभ्रमजश् च।

इत्थम् च परस्परानुरक्तयोर् नायक-नायिकयोर् परस्परम् अभिलाषः (पूर्वरागः) अथवा मानात् प्रवासाद् वा यो वियोगस् तस्य काव्यात्मकं वर्णनं सहृदयान् विप्रलम्भ-शृङ्गारम् आस्वादयति। तत्र च रतिः स्थायिभावः, नायक-नायिके आलम्बनविभावौ, चन्द्रिकादय उद्दीपनविभावाः, रोदन-प्रलापादयोऽनुभावाः, विषादादयश् च सञ्चारिणः। इत्य् अस्मिन् विषये तु प्रायः समेषाम् ऐकमत्यम् इव। किन्तु विद्यतेऽत्र किञ्चिद् विवादास्पदम्। तथा हि—महाकवीनां काव्येषु तादृशान्य् अपि वर्णनानि समुपलभ्यन्ते यत्र नायकस्य नायिकाया वैकतरस्य मरणेऽपि पुनः सङ्गमाशा सम्भवति; यथा कादम्बर्याम्—पुण्डरीकः प्राणान् त्यजति। महाश्वेता च 'हा नाथ, जीवित-निबन्धन, आचक्ष्व क्व माम् एकाकिनीम् अशरणाम् अकरुणं विमुच्य यासि' इत्येवंविधं मुक्तार्तनादा विलपति। ततश् च तरलिकां वदति 'अयि, उत्तिष्ठ निष्ठुरहृदये, कियद् रोदिषि। काष्ठान्य् आहृत्य विरचय चिताम्। अनुसरामि जीवितेश्वरम्।' अत्रान्तरे च झटिति चन्द्रमण्डल-निर्गतो महापुरुष-लक्षणोपेतो महाप्रमाणः पुरुषो महाश्वेताम् आश्वासयति—'वत्से, महाश्वेते, न त्याज्यास् त्वया प्राणाः पुनर् अपि तवाऽनेन सह भविष्यति समागमः' इति। स च पुण्डरीक-शरीरेण सहैव गगन-तलम् उत्पतति[1]।

अत्र सन्दर्भे यद्यपि पुण्डरीकः परलोकं गतः, अत इष्टनाश इव प्रतिभाति तथापि पुनः प्राप्तेर् आशा विद्यत एव। अतश् च विचारणीयम् एतद् यद् अत्र करुणो व्यङ्ग्यो विप्रलम्भो वा। चर्चितश् च विविधरूपेण बुधैर् अयं विषयः। 'कादम्बर्यां तु प्रथमं करुणः, आकाशसरस्वतीवचनाद् ऊर्ध्वं प्रवास-शृङ्गार एवेति[2] दशरूपावलोके धनिकः[2]। अत्र च रस-द्वयम् एवेति युक्त्या प्रतिपादयन् धनञ्जय आह—

मृते त्वेकत्र यत्रान्यः प्रलपेच् छोक एव सः।
व्याश्रयत्वान् न शृङ्गारः प्रत्यापन्ने तु नेतरः॥[3]

---

१. द्र., कादम्बरी (पण्डितपुस्तकालयः, काशी १९५९), पृ० ३४७–३४९।
२. दशरूपावलोकः, ४,६७।
३. दशरूपकम्, ४,६७।

अयम् अभिप्रायः—यदा तु पुण्डरीकस्य प्राण-त्यागे महाश्वेता प्रलपति तदा शोक एव तात्पर्य-विषयः। यतो हि तत्र रति-भावस्यालम्बन-भूतः पुण्डरीको नाशम् उपगत इत्य् अवसीयते। ततश् च रति-भावो नोदेतुं प्रभवति। रति-भावाऽभावे च कथं नाम शृङ्गारः? आकाशवाणी-श्रवणानन्तरं तु पुण्डरीकस्य पुनरुज्जीवनाशा पुनः सङ्गमाशा च महाश्वेताया हृदये सञ्चारं लभेते। तत्र च प्रवास-विप्रयोगो नाम शृङ्गार एव, न तत्र करुण-रसस्य सम्भावनाऽपि।

विश्वनाथस् तु दशरूपकस्य मतम् 'इत्य अभियुक्ता मन्यन्ते' इत्य् एवं पूर्व-पक्षत्वेन क्षिपन्न् अस्मिन् सन्दर्भे करुण-विप्रलम्भं नाम विप्रलम्भस्य भेदान्तरं व्याचष्टे[1]। तस्य च मते करुण-विप्रलम्भस्याऽयं विषयः—

यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर् लभ्ये।
विमनायते यदैकस्ततो भवेत् करुणविप्रलम्भाख्यः॥[2]

अयं भावो यत्र नायक-नायिकयोर् एकतरो नायकः, नायिका वा परलोकं गच्छति परं तेनैव शरीरेण पुनर् लब्धुं शक्यते, जीवितस् तु प्रियजन-शोक-व्याकुलचित्ततया विलापं कुरुते, काव्य-निबद्धे तादृशे वर्णने करुण-विप्रलम्भो नाम रसः। अत्र तु प्रवासविप्रलम्भाद् इयान् विशेषो यद् अत्र प्रत्युज्जीवनावधिकं मरणम् अपि वर्ण्यते। अतश् च शोक-संवलितो रतिभावोऽत्र स्थायी।

रसार्णवसुधाकरकृत् तु करुणविप्रलम्भस्य स्वरूपम् इत्थं वर्णयति—

द्वयोर् एकतरस्य मरणे पुनर् उज्जीवितावधौ।
विरहः करुणोऽन्यस्य सङ्गमाशा-निवर्तनः॥
करुणभ्रमकारित्वात् सोऽयं करुण उच्यते।[3]

अयम् अत्र भावः—यत्र नायक-नायिकयोर् एकतरस्य मरणं जायते। परं मरणेऽपि तस्य पुनरुज्जीवनस्य कश्चिद् अवधिर् निश्चीयते। तद्-अवधिपर्यन्तं तु सङ्गमस्याऽऽशा निवर्तत एव। तादृशो यो विरहः स एव

---

१. साहित्यदर्पणः, ३,२०९ वृत्तिः।

२. साहित्यदर्पणः, ३.२०९।

३. रसार्णवसुधाकरः, द्वितीय उल्लासः।

करुण-विप्रलम्भ-शब्दभाक्। यतो हि स विरहः करुणस्य भ्रमं जनयति ततः करुण-शब्देनोच्यते। एवं यत्र करुणत्वाभावेऽपि करुणभ्रमः स विप्रलम्भ एव करुणविप्रलम्भ इति फलितम्।

सम्भवति चाऽत्र शङ्का—अत्र करुणो विप्रलम्भश्च द्वौ रसौ क्रमशोऽनुभूयेते, आहोस्वित् करुणविप्रलम्भाख्य एक एव रसः? कथं नाऽत्र द्वाव् एव रसौ दशरूपक-रीत्याऽनुमन्तव्यौ? एकरसस्वीकारे वा किं विनिगमकम्? अत्र वदामः। यथाऽनेकस्य शब्दालङ्कारस्याऽर्थालङ्कारस्य वा भेदैनकत्राऽवस्थाने संसृष्टिर् नामाऽलङ्कारः पृथग् एव स्वीक्रियते, यथा च द्वयोर् ध्वन्योः संसर्गेऽपि ध्वनि-संसृष्टिर् नाम प्रभेदश् चारुताऽतिशयम् आवहति, इति सहृदयानां हृदय-संवादः; तथैवात्राऽपि रस-द्वयस्यैकत्र समवस्थाने, एकस्मिन् रसेऽन्यस्य भ्रमे वा रसान्तरम् एव वरीय इति युक्तम् उत्पश्यामः।

क्वचित् तु तादृशम् अपि वर्णनम् उपलभ्यते यत्राऽन्यतरस्य मरणे पुनर्जन्मतः कर्म-विपाकस्य च विश्वासानुसारेण परस्मिन् जन्मनि सङ्गमाशा सम्भवति। किं तत्रापि करुणविप्रलम्भ एव रसः? नेति ब्रूमः। तादृशे तु सन्दर्भे करुण एव। यतो हि 'पुनर्लभ्ये' इत्यस्य पदस्य स्वारस्यम् अस्मिन् जन्मनि पुनः प्राप्ताव् एव। यस्य शरीरस्य मरणं प्राप्यते तस्मिन् एव पुनः प्राणसञ्चारे च 'पुनरुज्जीवनम्' इत्यस्य पदस्य पर्यवसानम्। तथा चोक्तं—'पुनरलभ्ये शरीरान्तरेण वा लभ्ये तु करुणाख्य एव रसः'[1]।

अर्हन्ति चाऽत्र प्रसङ्गे स्थलान्तराण्य् अपि विचारम्। यथा—अभिज्ञानशाकुन्तलस्य पञ्चमेऽङ्के महाराज-दुष्यन्तः शकुन्तलां प्रत्याचष्टे, पुरोहितस् तु दुष्यन्तम् अनुशास्ति 'अत्रभवती तावद् आप्रसवाद् अस्मद्-गृहे तिष्ठतु' इत्यादिः। स च शकुन्तलया सह स्वगृहं प्रतिष्ठते। शकुन्तला तु भूमिं शरणं याचते—'भगवदि वसुहे, देहि मे विवरम्' इति। परावृत्तेषु च कण्व-शिष्येषु 'सा निन्दन्ती स्वानि भाग्यानि बाला बाहूत्प्रेक्षं क्रन्दितुं च प्रवृत्ता'; तत्राऽनन्तर एव विस्मय-करम् एतद् घटितम्—'स्त्रीसंस्थानं चाप्सरस्तीर्थमाराद् उत्क्षिप्यैनां ज्योतिरेकं जगाम'। दुष्यन्तस् तु पुरोहिताद् आकर्ण्याऽपि तद् वृत्तं गजनिमीलिकया पुरोहितम् आह—किं वृथा तर्केणान्विष्यते विश्राम्यतु भवान्'। इत्य् एवं च निवेदयन्न् अपि पर्याकुलचित्तः शयन-गृहं प्रति याति हृदयं च विरहसंतापम् अनुभवति—

---

१. साहित्यदर्पणः, ३,२०९ वृत्तिः।

कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम् ।
बलवत् तु दूयमानं प्रत्याययतीव मां हृदयम् ॥[1]

अस्मिन्न् अपि सन्दर्भे किमु विप्रलम्भ आस्वादनीयः, आहोस्विद् अन्यः कश्चिद् रस इति विकल्पः । अत्र तावत् शकुन्तला लोकान्तरं गतेति सुनिश्चितम् इव प्रतिभाति । इयांस् तु विशेषो यद् अत्र जीवन्ती सा गता । यथा च कादम्ब्यां महाप्राणः पुरुषः पुण्डरीकम् उत्थायाऽऽकाशम् उत्पतति तथैवाऽत्राऽपि स्त्री-संस्थानं ज्योतिः शकुन्तलाम् आदाय गच्छति । परम् अत्र न काचिद् आकाश-सरस्वती तादृशी श्रवण-गोचरा या शकुन्तलायाः पुनः सङ्गमं सूचयेत् । यदि त्व् एवं मन्यते यद् 'बलवत् तु दूयमानं प्रत्याययतीव मां हृदयम्' इति वचनात् शकुन्तलायाः पुनः प्राप्तिर् अत्र सूच्यते । यतो हि कालिदासस्य काव्ये व्यञ्जनायाः प्राधान्यम् । तेन चोक्तम्—'सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरण-प्रवृत्तयः'[2] । अत्र च प्रत्याख्यातायाम् अपि शकुन्तलायां तस्या विरहाद् दूयमानं दुष्यन्तस्य हृदयम् एव सूचयति शकुन्तलाया ग्राह्यतां तस्याश् च पुनः प्राप्ति-सम्भावनाम् । अद्धा, अस्मिन्न् अपि सन्दर्भे करुण-विप्रलम्भो रसः स्वीकार्यः । परं रसार्णवसुधाकरस्य मते तु न तथाऽप्य् अत्र करुण-विप्रलम्भः, स हि "द्वयोर् एकस्य मरणे" इत्य् आह । अतः शापज-प्रवास-हेतुको विप्रलम्भ एवाऽत्र सुवचः ।

भवभूतेर् उत्तररामचरितस्य द्वितीयेऽथ तृतीयेऽप्य् अङ्के किं करुण-विप्रलम्भ आहोस्वित् करुणः, विप्रलम्भो वेति सन्देहः । तत्र हि शम्बूक-वृत्त-प्रसङ्गेन रामो जनस्थानं प्रति याति । तत्र च विगतस्य जीवनस्य स्मरति । रामस् तु सीताविरह-व्याकुलः सन्तापम् अनुभवति विलपति चाऽऽत्मनोऽनुकूलम् । तथा च तत्र करुणो रस इति प्रथमः कल्पः । तथा हि—परित्यक्तां सीतां रामो नष्टाम् इव मन्यते । न च सीतायाः पुनः प्राप्तेर् आशाऽपि मनसि शिष्यते । एवञ् चेष्टनाशात् समुत्पन्नः शोक एव तत्र स्थायी । एतच् चाऽत्र प्रतीयते यद् इष्ट-जनस्य वस्तुतो नाशः (मृत्युः) नाऽपि स्यात् परं भ्रान्त्यादिना नाशोऽध्यवसीयेत तदाऽपि शोकः समुद्भवति ।

---

१. अभिज्ञानशाकुन्तलम्, ५,३१ ।
२. तत्रैव, १,२२ ।

न चात्र करुण-भ्रमकारित्वाद् रसार्णवसुधाकररीत्या करुण-विप्रलम्भ एव रस इति वाच्यम्, तत्र 'मरणे पुनर् उज्जीवितावधौ सङ्गमाशानिवर्तनः' इति वचनाद् एव नाऽत्र करुण-विप्रलम्भस्यावकाशः। अत्र हि सीताया मरणं वर्ण्यते, न च पुनर् उज्जीवनस्याऽपि कश्चिद् अवधिः प्रतीयते। अत एव नाऽत्र विप्रलम्भस्याऽपि शङ्का कार्या। विप्रलम्भे हि रतिः स्थायिभावः। तत्र च सुतरां पुनः सङ्गमस्याऽऽशा। तथा चोक्तं साहित्यदर्पणे—

शोकस्थायितया भिन्नो विप्रलम्भादयं रसः।
विप्रलम्भे रतिः स्थायी पुनः सम्भोगहेतुकः॥[1]

तथाऽपि करुण-विप्रलम्भ एवाऽत्र रस इत्य् अन्ये।

अन्येषु च तादृशेषु महाकवि-निबद्धेषु सन्दर्भेष्व् अनयैव रीत्या रस-विवेचनं द्रष्टव्यम्।

एतच् चाऽत्राऽभिहितं भवति। करुणस्य, विप्रलम्भस्य, करुण-विप्रलम्भस्य चाऽस्ति विविक्तो विषयः। इष्टनाशाद् अनिष्टावाप्तेर् वोत्पन्नः शोको यत्र स्थायिभावः, तत्र हि करुणस्याऽवकाशः। यत्र तु नायक-नायिकयोः परस्परम् अनुरागः, एकतरस्य तु कस्माद् अपि कारणाद्, मानात् प्रवासाद् वा, पुनः सङ्गम-हेतुको विश्लेषः, तत्र विप्रलम्भ एव केवलः। नायक-नायिकाभ्यां भिन्नयोः स्नेह-युक्तयोर् जननी-पुत्र-प्रभृत्योस् तु विश्लेषे रति-भावस्य वियोगपक्ष एव, न तु करुणः। तत्रेष्टनाशस्यैवाऽभावात्। यदीष्टो जनः, इष्टं धनादिकं वा तथा विलुप्यते येन तस्य पुनः प्राप्तेर् आशाऽपि नोदेति तर्ह्यनिष्टनाशः शक्यते वक्तुं नाऽन्यथा। यत्र तु नायक-नायिकयोर् एकतरस्य मरणानन्तरं तस्य पुनर् उज्जीवनं पुनः सङ्गमाऽऽशा च निश्चीयते तत्र करुण-विप्रलम्भ-शृङ्गारः। अयं च रसो न केवलं करुणाद् एवाऽधिकं हृदयं द्रावयति, अपि तु मान-प्रवास-जन्याद् विप्रलम्भाद् अप्य् अधिकं सहृदयानां हृदयस्य द्रुति-कारणं जायते। अतश् च माधुर्येऽप्य् अन्यान् रसान् अतिशेते, इति सर्वम् अवदातम्।

---

१. साहित्यदर्पणः, ३,२२६।

एको रसः करुण एव

ओंकारप्रसादत्रिपाठी*

संस्कृतसाहित्ये नव रसाः कथिताः। साहित्यदर्पणे विश्वनाथेनोक्तम्—

शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानकाः ।
बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः ॥

एतेषु किल रसेषु शृङ्गारो रसः सामान्यतया 'रसराज' इति व्यवह्रियते, परन्तु महाकविर् भवभूतिस् तु करुण-रसाद् अन्यस्य कस्यचन रसस्य स्वतन्त्र-सत्ताम् एव नाङ्गीकरोति। तन्-मते करुणरसो हि महान् एको जलराशिर् यस्याऽन्ये शृङ्गारादयो रसा विवर्त-सदृशा विद्यन्ते। 'अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदीरितः' इति वेदान्तवाक्यानुसारं कस्याऽपि पदार्थस्यातात्त्विकोऽन्यथाभावो विवर्त इति कथ्यते। यथा जले आवर्त-बुद्बुद-तरङ्गादयो जायन्ते, कतिपय-कालम् अवतिष्ठन्ते, तत्पश्चात् तस्मिन्न् एव जले विलीना भवन्ति। एवम् एव निदान-भूते करुण-रसेऽपि सर्वे रसा यथावश्यकं, यथासमयं यथानिमित्तं चोद्भूयाऽन्ततः करुणत्वेनैवाऽवशेषतां व्रजन्ति। तथा च भवभूतिः—

एको रसः करुण एव निमित्तभेदाद्
भिन्नः पृथक् पृथगिवाश्रयते विवर्तान्।
आवर्तबुद्बुदतरङ्गमयान् विकारा-
नम्भो यथा सलिलमेव हि तत्समस्तम्[1] ॥

---

*एम. ए. व्याकरणाचार्यः, काव्यतीर्थः, साहित्यरत्नम्, प्रधानाचार्यः, श्रीमन्नूलाल-संस्कृत-महाविद्यालय, अतर्रा (बाँदा) उ० प्र०।

---

१. उत्तरामचरितम्, ३,४७।

वस्तुतो दुःखाद् एव प्राणि-जगत आरम्भो दुःखे चैव परिणतिर् जायते। माया-बन्धत एव च जगत आरम्भः। यत्र च मायालेशो न तत्पदं पूर्ण-सुखाय कदाचित् कल्पते। सुखं, हास्यादिकं तु तथाविधकल्पनया जनैर् मध्येजीवनम् आरोप्यते। जन्म-समये यादृशम् असह्यं दुःखम् अनुभूयते तादृशं मरण-कालेऽपि। अतोऽनुमीयते यत्किल आदाव् अन्ते च दुःखस्यैवाऽवस्थितिः, मध्ये जीवन-सञ्चालनाय प्रसभम् अस्माभिर् अवस्तुनि वस्त्वारोपवद् वस्तुनोऽसुखत्वे सुखत्वारोपो विधीयते।

आत्म-परानुभवोदये सति कस्याऽपि वस्तुनः कस्याश्चिद् वा व्यक्तेर् दीर्घकालीन-वियोगोऽभावो वा करुणस्य बीजम्। अभावस्याऽनुभवे तद्-वस्तु-लाभार्थं सर्वस्याऽपि हृदये प्रगाढा वेदना जागर्त्ति। यथा हि लौकिके जीवने विलोक्यते, यो हि यादृग् अभावानुभूतिमान् असौ तावन्तम् एवोद्योगं पुरुषार्थं तल्लाभाय प्रकुरुते। अस्या एवाऽभावानुभूतेर् अवरोधार्थं, निवारणार्थं महात्मानः संसारतो वीतरागा भूत्वा पुरा आरण्यका भवन्ति स्म, अद्यापि च यथाशक्ति चेष्टन्ते। उत्तररामचरिते महाकवि-भवभूतिनोल्लिखितम्—

एते हि हृदयमर्मच्छिदः संसारभावा येभ्यो बीभत्समानाः संत्यज्य सर्वान् कामानरण्ये विश्राम्यन्ति मनीषिणः।

परम् एतत् कार्यं सुतराम् एव कठिनम्।

साहित्य-संसारेऽपि वियोगी यद्वा अभावस्य गाढानुभूतिमान् कश्चित् प्रथमः परमोत्कृष्टश् च कविः कथ्यते। हिन्दी-साहित्ये आधुनिक-काव्यस्य महाकविः श्रीसुमित्रानन्दनपन्त एतद्विषये यद् उक्तवाँस् तस्याऽयम् एवाऽशयो यद् वियोगी प्रथमः कविर् भवति, तस्याऽन्तर्मर्म-व्यथा-स्फुटितं गीतं निर्झरझर-सदृशं चारु, ललितं, मनोज्ञं, स्वच्छं च भवति।

इदं लोकान्तःप्रविष्टं कारुण्यं महर्षिवाल्मीकि-हृदये नितराम् आकस्मिक-रूपेण महता वेगेन च प्रादुर् आसीत्। तदनुभूतिः स्वयम् एव मूर्तिमती भूत्वा छन्दोमय्या वाचा सुव्यक्ताऽभूत्। ततः प्रभृति स

लोक आदिकवि-प्रतिष्ठां लेभे। न केवलम् असौ छन्दसां नूतनाविष्कारेणादि-कवित्वम् आसादितवान् अपि तु जगत्यन्तर्हितस्य वेदना-भावस्य स्वकीय-तीव्र-संवेदन-द्वारा सम्यग् अनुभूति-पूर्वकं सर्वाङ्गपूर्ण-साफल्येनाभि व्यक्ती-करणात् प्रथम-कवि-प्रख्यातिं प्राप्तवान्।

ध्वनिकार आनन्दवर्धनस् तद् एव तत्त्वं ध्वनिं काव्यस्यात्मानं च प्रतिपादितवान्—

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौञ्च-द्वन्द्व-वियोगोत्थः शोकः श्लोकत्वमागतः॥
ध्वन्यालोकः प्रः ३०।

वस्तुतो वाल्मीकेर् हृदि कौञ्च-द्वन्द्व-वियोगोत्थः करुणस्य स्थायिभावः शोक एव—

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत् क्रौञ्च-मिथुनादेकमवधीः काममोहितम्॥

इति श्लोकत्वेन परिणतो भूत्वा करुणस्य निर्झरिणीं रामायणमयीं रचनां कार-यामास।

करुण-कविश् च समन्ततः करुणाभावम् अवलोकते। एतावतैव भवभूतिः श्रीरामस्य करुण-रसं यदि पुटपाक-प्रतीकाशं प्रतिपादयति तदा सीतां तु करुणस्य शरीरिणीं मूर्तिम् एव प्रदर्शयति। अयं करुण-रसः साहित्ये समेत्य शोक-सन्ताप-दायिनीं पदवीम् अपास्य ब्रह्मानन्दायते-तराम्।

श्रयत विश्व-शुभंकर-संस्कृतम्

हरिश्चन्द्र रेणापुरकरः*

शृणुत भोः ! प्रिय-भारत-बन्धवः !
प्रणयिनः प्रणयं मम हार्दिकम् ।
हृदि भवेद्यदि भारतमङ्गलं
श्रयत विश्वशुभंकर-संस्कृतम् ॥१॥

उपनिषच्छ्रुतिशास्त्र-पुराण-भृद्
विगत-भारत-वैभव-बोधकम् ।
विमल-भारत-संस्कृति-दर्पणं
श्रयत विश्व-शुभंकर-संस्कृतम् ॥२॥

सुरगणैरभिनन्दत-वन्दितं
कविशिरोमणि-वृन्द-समर्चितम् ।
मुनिवरैश्च तपोबल-वर्धितं
श्रयत विश्व-शुभंकर-संस्कृतम् ॥३॥

मधुर-नाट्य-कथा-रस-पूरितं
सरस-मञ्जुल-काव्य-विशोभितम् ।
गहन-दर्शन-तत्त्व-विमण्डितं
श्रयत विश्वशुभंकर-संस्कृतम् ॥४॥

भरतखण्डमखण्डमिदं पुनः
खलु विधायक-धायक-सूत्रकम् ।
विततमाहिमवज्-जलधेः समं
श्रयत सर्वशुभंकर-संस्कृतम् ॥५॥

---

*राजकीय-महाविद्यालयः, गुलवर्गा (मैसूर राज्यम्) ।

विविध-जाति-गिरा परिभूषितं
रुचिर-वर्ण-विभावित-भारतम् ।
विघटनाद् यदि वाञ्छथ रक्षितुं
श्रयत सर्वशुभंकर-संस्कृतम् ॥६॥

विगत-भारत-दीर्घ-युगान्तरे
भवति याऽखिल-वाङ्मय-वाहनम् ।
अपि च तर्कण-चिंतन-साधनं
भवितुमर्हति सैव हि राष्ट्रवाक् ॥७॥

ननु विहाय वरां सुर-भारतीं
भरत-राष्ट्र-गिरोच्चपदेऽपराम् ।
प्रचलितां निदधीमहि चेद् गिरां
कलह-कारणतां ननु तद् व्रजेत् ॥८॥

प्रबल-दुश्चलितं ननु भाषिकं
भरतदेशविखण्डन-सूचकम् ।
यदि निवारयितुं कलहं स्पृहा
श्रयत विश्वशुभंकर-संस्कृतम् ॥९॥

विविध-शास्त्र-गताऽऽङ्ग्ल-पदावलीं
रचयितुं सुकरं निजभाषया ।
गहन-भाव-निबन्धन-पेशलं
श्रयत विश्वशुभंकर-संस्कृतम् ॥१०॥

उपरतामपि वाग्लतिकां पुनर्
ह्यमर-निर्जर-जीवन-दायकम् ।
सकल-भूतल-वाक्-प्रभवं महत्
श्रयत विश्वशुभंकर-संस्कृतम् ॥११॥

पुराणेषु सरस्वतीप्रतिमास्वरूपनिरूपणम्

मुहम्मद इसराइल खाँ*

सरस्वती संस्कृत-साहित्ये युगान्तरेषु देवी-रूपेण मूर्तिमत्तां लब्धवतीत्य् अत्र नास्ति संदेह-लवः। वैदिक-काले तस्या यद् अपि भौतिकं रूपम् उपलभ्यते तन् नाऽद्येवास्ति[1]। ब्राह्मण-काले सा वाण्या सह तादात्म्यं लब्धवती-'वाग् वै सरस्वती'[2]। परं पौराणिके युगे तस्या मूर्तिवत्तेयं परां कोटिं गताऽऽसीत्। इदम् एव कारणम् अस्ति यत् पुराणेषु तत्-प्रतिमा-निर्माण-सम्बन्धिनो नैके विधय उपलभ्यन्ते। एतेषां विधीनाम् अवलोकनम् एव प्रकृत-लेखस्य विषयः।

सरस्वत्या मूर्ति-निर्माण-विधिः

पुराणेषु न केवलं सरस्वत्या अपितु नैकदेव-देवीनां प्रतिमा-निर्माणसम्बन्धि-विधानानि यत्र तत्रोपलभ्यन्ते। अत्राग्नि-मत्स्य-विष्णु-धर्मोत्तरपुराणानां विशिष्टं महत्त्वम्। अग्निपुराणस्य नवचत्वारिंशत्तमाध्यायाद् आरभ्य आ-पञ्चपञ्चाशत्तमाध्यायं मूर्ति-विधानम् एव वर्तते। नव-चत्वारिंशत्तमेऽध्याये ब्रह्मणो मूर्तिनिर्माण-प्रक्रियया सह इदम् अपि स्पष्टीकृतं

*संस्कृतविभागः, अलीगढ़ विश्वविद्यालय अलीगढ़।

१. ऋग्वेदः, १,३,१२; २,४१,१६; ३,२३,४; ५,४२,१२; ४३,११; ६,५२,६; ७,३६,६; ९६,१-२; ८,२१,१७-१८; ५४,४; १०,१७,७, ४६,९; ७५,५ इत्यादयः।

२. शत. ब्रा० २,५,४,६; ३,१,४,९,१४; ९,१,७,९; ४,२,५,१४; ६,३,३; ५,२,२,१३; १४; ३-४,३; ५,४,१६; ७,५,१,३१; ९,३, ४,१७; १३,१,८,५. तै० ब्रा० १,३,४,५; ८,५,६; ३,८,११,२. ऐ० ब्रा० २,२४; ३,१-२; ३७; ६,७. ताण्डय ब्रा० १६,५,१६. गो० ब्रा० २,१,२०. शां० ब्रा० ५,२; १२,८; १४,४.

यत् सरस्वत्या मूर्तिम् ब्रह्मणो वाम-भागे सावित्र्याश् च दक्षिण-भागे स्थापयेत्—'आज्यस्थाली सरस्वती सावित्री वामदक्षिणे'[1]।

इत्थम् एव मत्स्यपुराणस्य २५८-६४ अध्यायेष्व् अप्य् अयम् एव विधिः प्रतिपादितः[2]। अत्राऽपि सरस्वती-प्रतिमायां ब्रह्मणो मूर्ति-सादृश्यम् अनुलक्ष्यते। विधानम् अस्ति यद् ब्रह्माणी (=सरस्वती ब्रह्मणः पत्नी पुत्री वा) ब्रह्म-सदृशी भवेत्— 'ब्रह्माणी ब्रह्मसदृशी'[3]। ब्रह्मणो विषये कथितम् इदं यत् स कमण्डलु-धरश् चतुर्मुखोपेतः स्यात्। अपि च स हंसासीनः कमलासनोऽपि वा भवितुं शक्नोति। यदुक्तम्—"ब्रह्मा कमण्डलुधरः कर्तव्यः स चतुर्मुखः। हंसारूढः क्वचित्कार्यः क्वचिच् च कमलासनः[4]। अस्माद् हेतोर् ब्रह्मणो मूर्तिर् इव सरस्वती-प्रतिमाऽपि चतुर्मुखी, चतुर्हस्ता, हंसारूढाऽपि, अक्षमाला-युक्ता, कमण्डलु-धारिणी च भवेत्—'चतुर्वक्त्रा चतुर्भुजा[5], हंसाधिरूढा कर्तव्या साक्षसूत्रकमण्डलुर् इति[6]। इत्थम् अस्मिन् पुराणेऽपि सरस्वत्या ब्रह्मणो मूर्त्या सह प्रगाढ-सम्बन्धः प्रदर्शितः। तत्रैव ब्रह्ममूर्तिं निकषा स्थानं घृतबलेर् भवेत्, तत्समीप एव चत्वारो वेदाः स्युः, सावित्रीं वामभागे सरस्वतीं च दक्षिणे स्थापयेद् इत्य् अपि प्रोक्तम्[7]। अत्र सावित्री-सरस्वत्योश् च स्थान-ग्रहण-सम्बन्धि यद् विधानं तद् अग्नि-पुराणस्य 'आज्यस्थाली सरस्वती सावित्री वाम-दक्षिणे[8]' इत्यनेन वाक्येन सह न संगच्छते।

विष्णुधर्मोत्तरस्य तृतीयः खण्डोऽपि पूर्णतया प्रतिमा-विद्यायाश् चित्रणं करोति। अस्य चतुश्चत्वारिंशत्तमेऽध्याये कमलासनारूढो ब्रह्मा चित्रितोऽस्ति। सावित्री ब्रह्मणो वाम-भागे विराजते[9]। या सरस्वती अग्नि-मत्स्ययोस् सावित्र्या सह वर्तते, सा ह्य् अत्राऽनुपस्थिता।

---

१. अग्निपुराणम्, ४९ १५।
२. मत्स्यपुराणम्, २६०,७४।
३. अग्निपुराणम्, ४९,१५।
४. मत्स्यपुराणम्, २६१,२४।
५. तत्रैव, २६१,२५।
६. तत्रैव, २६०,४४।
"आज्यस्थालीं न्यसेत्पार्श्वे वेदांश्च चतुरः पुनः।
वामपार्श्वेऽस्य सावित्रीं दक्षिणे च सरस्वतीम्॥"
७. अग्निपुराणम्, ४९,१५।
८. प्रियबालाशाहः, विष्णु-धर्मोत्तरपुराणम्, तृतीयः खण्डः, भागः २ बड़ौदा, १९६१), पृ० १४०।

पुराणेषु यानि विधानानि प्रतिपादितानि तानि न केवलानि विधानान्य् एवाऽपितु तेषां भारतवर्षस्य विभिन्न-मूर्तिकलासु प्रयोगोऽपि दृश्यते। मथुरामूर्ति-कलायां ब्रह्मणा सह सरस्वती यत् स्थानं वहति[1] तेन तत्र पुराणानाम् आंशिकानुकृतिः प्रकटीभवति। 'आंशिकेत्यनेन विष्णुधर्मोत्तरे ब्रह्मणा सह सावित्री चित्रिता[2] परं मथुरामूर्तिकलायां ब्रह्मणा सह सरस्वती प्रदर्शितेत्य् अवगन्तव्यम्। सिद्धान्त-प्रयोगेष्व् इयं भिन्नता या अन्यैः पौराणिकसिद्धान्तैः सह न संगच्छते, सा सदैव प्रचलितासीद् इति कथनं न युक्ति-युक्तम्। मूर्तिकलायाः कानिचिद् ईदृशान्य् उदाहरणान्य् उपलभ्यन्ते येषु सिद्धान्तस्य प्रयोगस्य च तादात्म्यम् अनायासेनैव परिलक्षितं भवति। 'ब्रह्मणो मूर्त्या सह सरस्वत्याः सावित्र्याश् च मूर्ती भवेताम्' अस्य सिद्धान्तस्य प्रयोगात्मक-स्वरूपम् अपि सिन्धस्थिते 'मीरपुरखासे'[3], 'प्रारम्भिकचोलायाम्' क्षान्तिमे होटसाले[4]' च स्पष्टतया परिलक्षितं भवति।

एतद् व्यतिरिक्तं पुराणानि स्वयम् एव अस्मद्-हृदयेषु विश्वासम् उत्पादयन्ति यत् तस्मिन् युगे प्रतिमा-निर्माण-प्रक्रिया प्रयुक्ताभवत्। पुराणेषु यत्र तत्रैतादृश्य् उदाहरणान्य् उपलभ्यन्ते। स्कन्दपुराणे सरस्वती भक्तेनाऽम्बुवीचिनृपतिना सरस्वती-सरितो मृत्तिकया भारती-प्रतिमा-निर्माण-स्योल्लेखो वर्तते[5]। इत्थम् एव शिव-सम्बन्धेऽपि वामनपुराणस्य कथनम् अस्ति यद् भगवान् शिवः स्वयम् एव स्थाणु-तीर्थे सरस्वतीलिङ्गं स्थापितवान्[6]। एतैर् उदाहरणैर् इदं सुस्पष्टं भवति यत् पुराणेषु विभिन्न-

---

१. वी. सी. महाचार्यः, इण्डियन इमेज, फर्स्ट पार्ट (ठेकर स्पिक एण्ड को० (कलकत्ता,—), पृ० १३।

२. प्रियबालाशाहः, पूर्वोद्धृतग्रन्थः, पृ० १४०।

३. जे. एन. बनर्जी. दि डवेलप्मेण्ट आफ हिन्दू आइकोनोग्रफी (कलिकाता-विश्वविद्यालयः, १९५६), पृ० ५१८।

४. तत्रैव, पृ० ५१८।

५. स्कन्दपुराणम् ६,४६,१६-७।

"तत्प्रभावं सरस्वत्याः स विज्ञाय महीपतिः।
श्रद्धया परया युक्तो ध्यायमानः सरस्वतीम्॥
ततस्तूर्णं समादाय मृत्तिकां स नदीतटात्।
चकार भारतीं देवीं स्वयमेव चतुर्भुजाम्॥

६. वामनपुराणम् ४०,४।

"यत्रेष्ट्वा भगवान्स्थाणुः पूजयित्वा सरस्वतीम्।
स्थापयामास देवेशो लिङ्गाकारां सरस्वतीम्॥"

देव-देवीनां प्रतिमानां न केवलं संकेतमात्रम् एवापितु तत्र तासां निर्माण-विधिर् अपि सम्यक् प्रोक्तः।

प्रतिमा-विद्यायां मुखाकृतेर् महती महत्ता वर्तते। यतो हि आननम् एव लक्षीकृत्य कोऽपि शिल्पी प्रतिमां करोति। आनन-निर्माण-सम्बन्धेऽत्र प्रतिमा-जगति नैकमानानां प्रचलनम् अस्ति। मानसारस्यानुसारेण—'सरस्वतीं च सावित्रीं च दशतालेन कारयेत्'[1]। तत्राऽनेके तालाः सन्ति। यथा 'नवतालः, अष्टतालः, सप्ततालः' इत्यादयः। परन्त्व् एषु सर्वेषु 'दशतालः' सर्वोत्तमो मन्यते। एतेषां सर्वेषां तालानाम् अनुसारेण सम्पूर्ण-प्रतिमा मुखाकृतेर् दशगुणा भवेत्। पुनर् अयं दशताल उत्तम-मध्यमाऽधमत्वेन त्रिधा विभक्तः। तत्रोत्तम-दशतालः सम्पूर्णां प्रतिमां चतुर्विंशत्युत्तर-शतभागेषु, मध्यमस् तु विंशत्यधिक-शतसमभागेषु, अधमश् च षोडशाधिक-शतसमभागेषु विभजति[2]।

अत्रैव मुख-निर्माण-विधिर् अतिरोचकैः शब्दैर् वर्णितः। मुखं कुक्कुटाण्डाऽऽकारं भवेद् इति कथितम्[3]। श्रीकुमारकृत-शिल्परत्ने दशतालस्य भेद-त्रयस्य विशद-व्याख्योपलभ्यते[4]। अनेनैव प्रकारेण अङ्गुलि-निर्माण-विधिः श्रीप्रसन्नकुमाराचार्येण मानसार-शिल्पशास्त्रे विस्तृत-रूपेण व्याख्यातः[5]।

मुखस्येयं व्याख्या मूर्ति-विज्ञाक्षेत्रे महतीं मान्यताम् भजते। परं किम् अपि पुराणं विस्तार-पूर्वकं प्रतिमाया मुखस्य तदनुसारं च प्रतिमाया विवेचनं न करोति। परम् इदं सत्यं यत् तत्र देवदेवीनां मुखानां संख्या तु अवश्यम् एव निश्चितास्ति। एवंभूतेऽपि तेषु मुख-निर्धारण-विषयक-मतैक्यं नास्ति। सरस्वती-सम्बन्धेऽपीदम् एव सत्यम्। तानि तामनेक-रूपेषु समुपस्थापयन्ति। स्व-पितुर् ब्रह्मणः सदृशी सा क्वचिद् एकवक्त्रा क्वचिच् च चतुर्वक्त्रा वर्णिता। मत्स्यपुराणे ब्रह्माणी (सरस्वती) ब्रह्मसदृशी

---

१. मानसार ऑन आर्किटेक्चर एण्ड स्कल्पचर ५४,१९; प्रसन्नकुमाराचार्येण सम्पादितम् (लन्दन, १९३३)।

२. प्रसन्नकुमाराचार्यः, इण्डियन आर्किटेक्चर एकार्डिङ्ग टू मानसार-शिल्प-शास्त्र (आक्सफोर्ड यूनि०, १९२७), पृ० ७८,१२३।

३. तत्रैव, पृ० ८४।

४. श्रीकुमारः, शिल्परत्नम् ५,१-११८,१/२; ६,१-११,१/२; ७, १-४२,१/२।

५. प्रसन्नकुमाराचार्यः, शिल्पशास्त्रं, ए समरी ऑफ दि मानसार, पृ० ३५।

चतुर्मुखी कथिता[1]। सा वायु-पुराणे चतुर्मुखी[2], विष्णुधर्मोत्तरे चैकवक्त्रा निगदिताऽस्ति[3]।

रूप-मण्डने सरस्वत्याः 'महाविद्या, सरस्वती'ति भेद-द्वयं कृतम्। परं तत्र महाविद्या त्व् एक-वक्त्रा कथिता[4]। ब्रह्मसदृशी सा पञ्चमुख्य् अपि प्रोक्ता। परं यत्र सा पञ्चमुखी तत्रैव शारदेति नाम्ना प्रथितास्ति[5]।

बौद्धधर्मे सरस्वत्या यद् रूपं तद् ब्राह्मण-कालिकेन तस्या रूपेण समत्व-विषमत्वयोः सामञ्जस्यं कलयति। अत्रेदं कथितं यत् सा एकवक्त्रा द्विवक्त्राऽपि भवितुं शक्नोति[6]। तत्रैव वज्र-सरस्वत्य् अपि त्रिमुखी कथिता—'वज्रसरस्वतीं त्रिमुखाम्'[7]।

सरस्वती-मुखानां विभिन्न-ध्वनितार्थाः सन्तीति विदुषां मतम्। मुख-संख्यानिर्धारणानन्तरं तद्-विवेचनम् अप्य् आवश्यकम्। ऋग्वेदे सा सप्तस्वसेति कथिता[8]। श्रीमत्सायणाचार्यः पदम् इदं गायत्र्यादीनि सप्त छन्दांसि स्वसारो यस्याश्चादृशी। नदीरूपायास् तु गङ्गायाः सप्त नद्यः स्वसार इति व्याख्यातवान्। पुराणेष्व् अप्य् अयम् एवार्थः कृतः। यथा विष्णुधर्मोत्तरानुसारेण तस्या मुखं गायत्रीछन्दसः प्रतिनिधित्वं करोती'ति व्याख्यातम्[9]। तथ्यं त्व् इदम् अस्ति यद् ऋग्वेदे गायत्रीत्रिष्टुब्जगत्यनुष्टुबादीनि सप्त छन्दांसि प्रयुक्तानि। तेषु गायत्र्याः स्थानं प्रमुखम्।

---

१. मत्स्यपुराणम्, २६१,२४।

२. वायुपुराणम्, २३,५०।

३. प्रियबालाशाहः, पूर्वोद्धृतग्रन्थः, पृ० १५४।

४. श्रीसूत्रधारमण्डनः, रूपमण्डनम् (मोतीलाल बनारसीदासः, वाराणसी, सम्वत् २०२९), पृ० ८८।

५. एच. कृष्णशास्त्री, साउथ इण्डियन् इमेजेज आफ गाड्स एण्ड गाडेसस् (मद्रास, १९१६), पृ० १८७।

६. विनयतोषभट्टाचार्यः, दि इण्डियन् बुद्धिस्ट आइकोनोग्रैफी (कलिकाता, १९५८), पृ० ३४९।

७. साधनमाला, १६३।

८. ऋ० ६,६१,१०।

९. प्रियबालाशाहः, पूर्वोद्धृतग्रन्थः, पृ० १५४।

इमानि छन्दांसि न केवलं छन्दसाम् एवाऽपितु वेद-चतुष्टयस्यापि प्रतिनिधित्वं कुर्वन्ति। अतः सिद्धं भवतीदं यत् तस्या वैदिकं सप्तस्वसेति विशेषणं तां वाचा सह सम्बध्नाति। परं पौराणिक-सिद्धान्तानुसारेण तु तस्या मुखस्य गायत्र्याः प्रतिनिधित्वे सति सरस्वत्या वाचा सह सम्बन्धः स्पष्ट एव। पुराणानुसारेणाऽस्ति सरस्वती ब्रह्मणो मानसपुत्री[1]। परं यदा तानि तां ब्रह्मणोऽन्यस्य मुखाद् उत्पन्नां स्वीकुर्वन्ति[2] तदा तानि सरस्वतीं वाग्रूपां प्रतिपादयन्ति। यतो ह्य् अन्यत्र वागुत्पत्तिर् ब्रह्मणो मुखात् स्वीकृता[3]। अनेन वेदानां शास्त्राणां चोत्पत्तिर् व्यक्ता भवति। मत्स्यपुराणस्यैकस्मिन् स्थले वेदानां शास्त्राणाम् उत्पत्तिर् ब्रह्मणो मुखाद् वर्णिता[4]। इत्थं सरस्वत्या मुखस्य ध्वनितार्थो वेदानां शास्त्राणां पक्षे फलितो भवति। इत्थम् एव यदा ब्रह्मणश् चत्वारि मुखानि चतुर्णां वेदानां प्रतीकानि[5] तदा सरस्वत्या मुखान्य् अपि तत्प्रतीकान्य् एव।

पुराणेषु मुहुर्मुहुर् इदं प्रोक्तं यत् सृष्टयै ब्रह्मणा स्व-मस्तिष्कस्य प्रतिभायाश् च महान् समारम्भो विहितः। अत्र मस्तिष्कस्य प्रतिभायाश् च तात्पर्यार्थो वेदेष्व् एव पर्यवस्यति। यतो ह्य् अयम् एव मस्तिष्कश् चतुर्विधप्रकृत्या युक्तो ब्रह्माण्डस्य रूपम् अस्ति[6]। अतश् चतुर्भिर् वेदैस् तस्य चतुर्भिर् मुखैस् सह तादात्म्यं सर्वथा उचितम्। सरस्वत्या मुखसम्बन्धेऽपि इदम् एव तथ्यं ज्ञातव्यम्।

अनेनैव प्रकारेण तस्यास् त्रयाणां मुखानां ध्वनितार्था ऋग्यजुस्-साम-वेद-त्रयी ज्ञातव्या, यतः सरस्वती त्रयी विद्या त्रयी वार्तेति कथिता[7]। तद् एवं तस्याः पञ्च-मुखानां कल्पना पञ्चवेदेषु फलितार्था भवति। अत्र नाट्यं पञ्चमं वेदं मत्वा तम् अन्यैश् चतुर्भिर् वेदैस् सह संयोजितुं शक्नुमः।

---

१. मत्स्यपुराणम्, १७१,३२–३; वायुपुराणम् ९,७५ अग्रे।
२. ब्रह्मवैवर्तपुराणम्, १,३,५४–७।
३. भागवतपुराणम्, ३,१२,२६।
४. मत्स्यपुराणम्, ३,२–४।
५. प्रियबालाशाहः, पूर्वोद्धृतग्रन्थः, पृ० १४०।
६. वासुदेवशरणाग्रवालः, मत्स्यपुराण—ए स्टडी (वाराणसी, १९६३), पृ० १५,२८।
७. पद्मपुराणम्, ८,२७,११७–८।
विष्णुपुराणम्, १,९,११९–२१।

कथ्यते, ब्रह्मैव इदं नाट्यवेदम् असृजत्। अत एव भरतमुनिना नाट्य-शास्त्रे नाट्य-वेदस्य प्राधान्यं स्वीकृतम्। यतो हि ब्रह्मा सर्ववेदान् अनुस्मरन् तेषाम् अङ्गैर् इमं नाट्यवेदम् असृजत्[१]। सर्वशास्त्राणि सर्वकलाश् चास्मिन् नाट्यवेदे समाश्रयन्ति, अस्माद् हेतोः सर्वासां कलानां विज्ञानानां च प्रतिनिधित्वं कुर्वती[२] सरस्वती 'सर्वसंगीत-सन्धान-ताल-कारणरूपिणी'ति[३] कथितम्।

सरस्वत्या हस्तसंख्या तद्-धारितानि चिह्नानि च

यद्यपि सरस्वत्या हस्तानां संख्या-विषये पुराणेषु मतैक्यं नास्ति, तथाऽपि सा प्रायेण चतुर्हस्ता निगदिता। वीणापुस्तकधारिणी[४] त्य् अनेन सा द्विहस्तेति ज्ञायते। मत्स्यपुराणानुसारेण ब्रह्ममूर्तिर् इव सरस्वतीमूर्तिर् अपि चतुर्हस्ता भवेत्[५]। सा चतुर्हस्ता स्याद् इति अग्निपुराणेऽपि प्रतिपादितम्। तस्या हस्तेषु कानि वस्तूनि स्युर् इत्य् अस्य सम्यग् विवेचनम् अधः क्रियते। अग्निपुराणानुसारेण तस्याश् चतुर्षु हस्तेषु पुस्तकाऽक्षमाला-वीणा-कमण्डलवः स्युः[६]। विष्णुधर्मोत्तरे उक्तं यत् सा दक्षिण-भुजयोः पुस्तकाक्षमाले वामभुजयोश् च कमण्डलुवीणे धारयति[७]। परम् अन्यत्र तस्या दक्षिणयोर् हस्तयोर् अक्षमाला-त्रिशूले वामयोश् च पुस्तक-कमण्डलू च सन्ति। अत्र वीणास्थाने त्रिशूलम्[८]।

सा वैणवीत्य् अपि[९] प्रोक्ता पुराणेषु। तत्र वैणवीति शब्दस्य कोऽर्थः? वैणवी 'वैष्णवी'ति डॉ० कमरेशस्य मतम्[१०]। परं डॉ० प्रियबालाशाहमते तु

---

१. ना० शा० १,१५-६।

२. जे० मूर, क्लासिकल डिक्शनरी ऑफ हिन्दू माइथालोजी (लन्दन, १९६१) पृ० २८४।

३. ब्रह्मवैवर्तपुराणम्, २,१,३४।

४. तत्रैव, २,१,३५; २,५५।

५. मत्स्यपुराणम्, २६१,२४।

६. अग्निपुराणम्, ५०,१६।

७. प्रियबालाशाहः, पूर्वोद्धृतग्रन्थः, पृ० २१५।

८. तत्रैव, पृ० २२७।

९. तत्रैव, पृ० १५४।

१०. तत्रैव, पृ० १५४, टिप्पणी १।

वंशनिर्मितवीणादण्डेन सम्बद्धोऽस्य शब्दार्थस्यार्थः[१]।

यदा सरस्वती प्रकृतेः पञ्चरूपेषु दुर्गा-राधा-लक्ष्मी-सरस्वती-सावित्रीष्व् एका प्रकृतिः स्वीकृता तदापि सा चतुर्हस्तेति कथिता[२]। अस्य पुष्टिर् वायु-पुराणेन क्रियते। तत्र सा प्रकृति-गो-रूपेण चतुर्मुखा चतुः-शृङ्गा चतुर्दन्ता चतुर्नेत्रा चतुर्भुजा च कथिता[३]। तत्प्रभावेणैव सर्वे पशवः चतुष्पदाः चतुष्पयोधारिणश् च भवन्ति[४]।

जैनधर्मे विद्यादेव्याः प्रायेण चत्वारो हस्ताः सन्ति परं बौद्धधर्मे सरस्वती द्विहस्ता षड्-हस्ता वा कथिता। द्वि-हस्ता सा विभिन्नैश् चतुर्भिर् नामभिर् विभूषिताऽस्ति[५]। अथ च सा अष्टभुजा[६] दशभुजा[७] चेत्यपि प्रोक्ता।

हस्तधारित-पदार्थानां ध्वनितार्थाः

सरस्वती-देव्याश् चत्वारि मुखानि चत्वारो भुजाश् च वेद-चतुष्टयम् एवावबोधयन्ति[८]। अस्ति कमण्डलुः सर्वशास्त्राणां सारः[९]। सा तु सम्पूर्ण-शास्त्राणां प्रतीकम्। यतः सा 'श्रुतिलक्षणे'ति कथिता[१०]। पुस्तकम् अपि सर्वविद्या-समुद्गमोस्ति[११]। सत्यम् एतद् यत् सरस्वती सर्वप्रथमं जलेन सम्बद्धासीद्। अथवा सा नद्य् एवासीद्। अन्ये सर्वे विचाराः प्रादुर्भूतास् तस्माद्

---

१. तत्रैव, पृ० १५४।
२. ब्रह्मवैवर्तपुराणम्, २,१,१ अग्रे।
३. वायुपुराणम्, २३,४४–४५।
४. तत्रैव, २३,८८।
५. विनयतोषभट्टाचार्यः, पूर्वोद्धृतग्रन्थः, पृ० ३४९–५१।
६. वैकृतिरहस्य, १५।
७, एच कृष्णशास्त्री, पूर्वोद्धृतग्रन्थः, पृ० १८७।
८. प्रियबालाशाहः, पूर्वोद्धृतग्रन्थः, पृ० १८४।
९. तत्रैव, पृ० १८५।
१०. स्कन्दपुराणम्, ७,३३,२२।
११. तत्रैव, ६,४९,१९।

एव[1]। यदा सा पञ्चतन्मात्राणां जननी कथ्यते[2] (अत्र सलिलम् अपि तन्मात्रासु) गण्यते तदा तस्या जलेन सह सम्बन्धः स्पष्टम्। यतो हि तन्मात्राभिर् जगतः सृष्टिर् भवति, सा तु सम्पूर्ण-तन्मात्राणां जननी, अतः सर्गोत्पत्ति-कारणं सैव इति युक्तम्[3] एव। सर्गादौ प्रथमं जलम् एवासीद्। अतः कमण्डलुस्थ-दिव्य-जलं[4] देव्या जलेन सह स्वप्राचीनतमं संसर्गम् अभिव्यनक्तीति कथनं युक्तं प्रतिभाति।

इत्थम् एव देवी-हस्त-न्यस्त-वीणाया अपि नाल्पं महत्त्वम्। वीणा प्रवीणतायाः संसिद्धेर् वा प्रतीकम्[5]। वीणा-पुस्तकयोस् साहचर्येण तयोः पारस्परिक-सम्बन्धो ज्ञायते। यतस् सा निस्संशयम् एवास्ति वाक्-प्रतिनियमस्याऽधिष्ठात्री। अत एव ब्राह्मण-ग्रन्थेषु सा मुहुर्मुहुर् 'वाग् वै सरस्वती'ति प्रथिता। वाग् अस्ति द्विधा ध्वनि-शब्द-भेदेन। अत्र पुस्तकस्य वाचा सह वीणायाश् च ध्वनिना सह सम्बन्धः प्रकल्प्यते। वीणाऽस्ति प्राचीनतमं वाद्ययन्त्रम् ऐतरेय-ब्राह्मणानुसारेण। चित्तस्यैकाग्रतायै सोमसंगीतस्यास्ति महत्य् आवश्यकता। अत्र वीणैव परमं सुहृत्[6]। सरस्वती-हस्त-स्थिताऽक्षमाला तु कालस्य प्रतिनिधित्वं विदधाति[7]।

---

१. तुलनीयः, जेम्स हेस्टिङ्गस, इन्साक्लोपीडिया ऑफ रीलीजन एण्ड एथिक्स, द्वितीयः भागः (न्यु यार्क, १९५४), पृ० १९६।

२. वासुदेवशरणाग्रवालः, पूर्वोद्धृतग्रन्थः, पृ० ५३।

३. तुलनीयं ब्रह्मवैवर्तपुराणम्, २,१,१ अग्रे।

४. स्कन्दपुराणम्, ६,४६.१९।

५. प्रियबालाशाहः, पूर्वोद्धृतग्रन्थः, पृ० १८६।

६. देवीभागवतपुराणम्, ३,३०,२।

७. प्रियबालाशाहः, पूर्वोद्धृतग्रन्थः, पृ० १८५।

महाकवि-नीलकण्ठदीक्षितः

(परिचयः)

कृ. वे. शर्मा*

भट्टोजि-दीक्षिताद्यनेकैर् विद्वत्प्रकाण्डैर् मण्डितचरणः चतुरधिकशत-प्रबन्धकर्ताऽप्पय्य-दीक्षितः संस्कृतभाषा-प्रणयिनां सर्वेषाम् अपि विदितः। तस्य भ्रातृ-पौत्र आधीन् नीलकण्ठ-दीक्षितः (क्रि. १६००–७५)। स्ववंशानुवर्णनं सः स्वयम् एव वितनोति गङ्गावतरण-नाम्नो महाकाव्यस्य प्रारम्भे। यथा—

मुनिरस्ति भरद्वाजः ख्यातस् त्रिभुवनेष्वपि।
अन्वैर्यस्य जहौ रामोऽप्यरण्य-भ्रमण-श्रमम् ॥३८॥

तस्यान्वये महत्यासीत् क्षीरोद इव चन्द्रमाः।
श्रीकण्ठ-चरणासक्तः श्रीमान् अप्पय्यदीक्षितः ॥३९॥

तत्समान-प्रभावस्य तदनन्तर-जन्मनः।
आसीद् आचा-दीक्षितस्य पुत्रो नारायणाध्वरी ॥४८॥

जयन्ति तनयास्तस्य पञ्च सौभ्रात्र-शालिनः।
गर्भदासा महेशस्य कवयश्च विपश्चितः ॥४९॥

तेषामहं द्वितीयोऽस्मि भूमिदेवी-तनूभुवाम्।
नीलकण्ठ इति ख्यातिं नीतः शम्भोः प्रसादतः ॥५०॥

वार्तिकाभरण-ग्रन्थ-निर्माण-व्यक्त-नैपुणः।
श्रीवेङ्कटेश्वर-मखो शिष्ये मय्य् अनुकम्पते ॥५१॥[1]

---

*प्राध्यापकः, विश्वेश्वरानन्द-संस्थानम्, साधु आश्रमः, होशियारपुरम्।

१. गङ्गावतरणम्, (प्रसा. काव्यमाला ७६, मुम्बई, १९२६), प्रथमः सर्गः।

बाल्यकाल एव दक्षिण-मथुरानगरं गतो नीलकण्ठः तत्प्रशासितुः पाण्डय-राजस्य तिरुमल-नायकस्य सभापतित्वं साचिव्यं चाधिरुह्य साहितीं समाजं च यथाविधि पोषयन् पञ्चत्रिंशद् हायनानि यापयामास। वार्धके वयसि सन्न्यास-वृत्तिम् अवलम्ब्य आयुश्शेषं नीत्वा ताम्रपर्णी-नदी-तीरे समाधिं जगाम।

पाण्ड्य-राजस्य सभापतित्वं वहतो नीलकण्ठकवेर् वैदुष्यं विद्वत्पोषणोत्-सुकतां च बहु प्रशंसन्ति तत्समकालीनाः तदनन्तर-कालीनाश् च कवयः। अतिरात्र-यज्वनः कुशकुमुद्वतीय-नाम-नाटके[1] एवं परामृश्यते नीलकण्ठः—

विद्वद्वाद-विवाद-काल-युगपद्-विस्फूर्त्यहम्पूर्विका-
निर्यद्-युक्ति-सहस्र-दर्शितमहाहीन्द्रावताराकृतिः ।
कर्तुं कारयितुं तथा रसयितुं काव्यानि नव्यान्यलम्-
भूष्णु-र्भाति सभा-सभाजित-मतिः श्री-नीलकण्ठाध्वरी ॥

अयं किल भारद्वाजकुल-पारावार-पारिजातः सकलकला-साम्राज्य-सिंहासनाधिपतिः, तत्रभवतः श्रीमतो नारायणाध्वरिणस् तपः-परिपाकः, कर्ता काव्यानां, व्याकर्ता तन्त्राणाम्, आहर्ता क्रतूनां, व्याहर्ता सकल-नृपसभासु, दिगन्त-विश्रान्त-कीर्तिर् अपारमहिमा, मानवाकृतिः साक्षादेव दाक्षायणी-वल्लभः, श्रीकण्ठमत-सर्वस्ववेदी श्री-नीलकण्ठाध्वरी।

एषोऽन्यः परामर्शः गीर्वाणेन्द्र-दीक्षित-कृत-शृङ्गारकोश-भाणे[2]—

अस्त्यस्तोकगुणो हिमाद्रि-शिखरोत्सङ्गापतज्जाह्नवी-
साहङ्कार-तरङ्ग-सङ्ग-सहज-श्रीहारि-सूक्तिक्रमः ।
किञ्चोन्मीलयितुं पुनश्च सुदृढीकर्तुं कलासु प्रभुः
सर्वज्ञो हरिदन्त-विश्रुत-यशाः श्री-नीलकण्ठाध्वरी ॥

अपि च—

यस्मिन् क्षोणिभुजां सभासु विदुषामग्रेसरे जातुचित्
स्वातन्त्र्यं विविधं विवृण्वति निजं सर्वासु विद्यास्वपि ।

1. Tanjore Sarasvati Mahal Library, Ms. No. 4346, (Des. Cata., Vol. VIII, pp. 3378-85).
2. Tanjore Sarasvati Mahal Library, Ms. 4611, (Des. Cata., Vol. VIII, pp. 3596-99).

जायन्ते गगनप्रचोदितदृशः स्तव्योपलब्धि-क्रमाः
स्वेदाम्भःकण-सिक्त-सर्वतनवो दीनाः प्रतिद्वन्द्विनः ॥ इति ।

दीक्षितेन्द्रस्य कृतिषु प्राथम्यम् अर्हति द्वाविंशत्सर्गात्मकं शिवलीलार्णवाभिधं महाकाव्यं,[1] यस्मिन् पाण्ड्य-नृपतीनां कुल-दैवतस्य महेशितुः चतुष्षष्टि-कथाः प्रतिपाद्यन्ते । अष्ट-सर्ग-भरिते गङ्गावतरण-नामकेऽन्यस्मिन् महाकाव्ये[2] भगीरथोपाख्यानम् उपवर्णितम् । नीलकण्ठ-विजय-चम्पवां[3] अमृत-मथन-कथा कथिता । अस्य कवेर् लघुकाव्येष्व् अन्तर्गता वर्तन्ते कलियुग-प्रभाव-प्रतिपादनपरं कलि-विडम्बनम्,[4] राज्ञः सभासद उद्दिश्य रचितं सभारञ्जनम्,[5] स्वगुरौ गीर्वाणेन्द्रसरस्वती-नाम्नि स्वकीयां भक्तिं आदरातिशयं च प्रकटयन्ती गुरुतत्त्वमालिका,[6] उल्लेखगर्भिताभिर् अन्योक्तिभिर् लोकयात्रां प्रदर्शयद् अन्यापदेश-शतकम्,[7] इष्ट-देवताया लोकमातुः पादारविन्दयोः समर्पितः भक्ति-प्रलपनरूप आनन्द-सागर-स्तवः,[8] एवं चण्डीरहस्यम्,[9] रामायण-

---

1 Ed. by T. Ganapati Sastri, Trivandrum, 1909 (*TSS* 4); Vani Vilas Press, Srirangam, 1911.

2. Ed. *Kāvyamālā* 76, N. S. Press, Bombay, 1916.

3. Ed. with com., C. Sankararama Sastri, Madras, 1924 (*Sri Balamanorama Series*, No. 7).

4 Ed. *Kāvyamālā*, Gucch. V, N. S. Press, Bombay, 2nd ed. 1937; *Ouvres poetiques de Nīlakaṇṭha Dīkṣita*, Texte, traduction et notes par P–S Filliozat, Institute Francais, d'Inodologie, Pondichery, 1967, pp. 1–23.

5. Ed. *Kāvyamālā*, Gucch. IV, *ib.*, 2nd edn., 1937; *Ouvres, ib.*, pp. 27–45.

6. Ed. *Ouvres, ib.* 219–29.

7. Ed *Kāvyamālā*, Gucch. VI, *ib.*, 1st edn. 1890; *Ouvres, ib.*, pp. 49–99.

8. Ed. *Kāvyamālā*, Gucch. XI, *ib.*, 2nd edn., 1933; *Ouvres, ib.*, pp. 257–99.

9. Ed. *Ouvres, ib.*, pp. 161–75.

सारसंग्रहरूपो रघुवीरस्तवः[१] मर्त्य-लोकस्य निष्प्रभतां प्रतिपादयद् वैराग्य-शतकम्,[२] मुमुक्षोः परिपक्वां विचारधारां धारयन् शान्तिविलासः,[३] शिवैकशरण्यत्व-प्रतिबोधिका शिवोत्कर्षमञ्जरी[४] च। नीलकण्ठकृतं नल-चरित्र-नाटकं[५] षष्ठाङ्कावधेव लभ्यते। तत ऊर्ध्वं कविना न कृतम् इति मातृकायाम् एकस्मिन् यद् दृश्यते तत् तथ्यं स्यात्।[६] इत उपरि व्याकरण-शास्त्रे कैयट-कृत-महाभाष्य-टीकाया व्याख्यानम्, शिवा-द्वैत-वेदान्ते शिवतत्त्व-रहस्य-नामकं ग्रन्थं च नीलकण्ठो लिलेखेति तत्सुतस्य गीर्वाणेन्द्र-दीक्षितस्य शृङ्गारकोश-भाणे प्रस्तावनायां दृश्यते[७] परन्तु ग्रन्थाव् एताव् इदानीं नोपलभ्येते। चित्रमीमांसा-दोषधिक्काराख्ये ग्रन्थे नीलकण्ठः पण्डितराज-जगन्नाथेन कृतं चित्रमीमांसा-खण्डनं खण्डयित्वा स्वपितामह-चरणानाम् अप्पय्य-दीक्षितानां मतं मण्डयति। सौभाग्यचन्द्रातप-नामा तन्त्र-ग्रन्थोऽपि नीलकण्ठेन विरचितो वर्तते।[८]

---

1. *Ouvres, ib.*, pp. 179–90.
2. Ed. *Kāvyamālā*, Gucch. I, *ib*, 1st edn., 1886, wrongly ascribed to Appayya Dīkṣita; *Ouvres, ib.*, pp. 233–53.
3. Ed. *Kāvyamālā*, Gucch. VI, *ib.*, 1st edn., 1890; *Ouvres, ib.*, pp. 195–215.
4. Ed. with 4,5,7,8,11,12 in *Laghukāvyāni*: The minor poems of Nilakaṇṭha Dīkṣita, Vani Vilas Press, Srirangam, 1911; *Ouvres, ib.*, pp. 102–58.
5. Ed. Balamanorama Press, Madras, 1925.
6. See bs. Trivandrum Palace Library, No 1509, (Des. Cat., Vol. VII, p. 2525): एतावत्पर्यन्तमेव प्रणीतम्, इतरबुद्धिशोध-नार्थमेव परित्यक्तम्, महावीरचरितं पूरयता पूरणीयमिदमिति नाटकम्।
7. Tanjore Sarasvati Mahal Library, Ms. No. 4611, (Des. Cat., Vol. VIII, pp. 3596–99) : "कैयटव्याख्यान-शिवतत्त्वरहस्याद्यनेक-प्रबन्धनिर्मातुः नीलकण्ठ-दीक्षितस्य तृतीयनन्दनेन गीर्वाणेन्द्रदीक्षितेन विरचितः शृङ्गारकोशो नाम भाणः समाप्तः।
8. *Cf.* P. P. S. Sastri, 'Two rare treatises of Śaktism', *Gopalakrishnamacharya Book of Com.*, Madras, 1942, pp. 432–34.

निरर्गल-प्रसरा आपात-मधुरा चाऽनुभूयते नीलकण्ठस्य काव्य-निर्झरी। वैदर्भ-गिरं प्रत्यन्यादृशी भक्तिर् अस्य कवेः। प्रसाद-माधुर्यादि-गुणानां पौष्कल्यं दृश्यतेऽस्य काव्येषु। तत्रस्थानि लघुतराणि वाक्यानि मनांस्य् आवर्जयन्ति। तस्य गम्भीरोदात्ता वाणी अनायासेन वाचकान् आकर्षयति। चमत्कार-मसृणम् अर्थकल्पनम्, अभिनवा उल्लेखाश् च तस्याः शोभां पुष्णन्ति। अत्रोदाहरणं नीलकण्ठ-चम्प्वा उद्धियते। प्रसङ्गस् तु नारायण-दर्शनार्थं वैकुण्ठं गतानां देवानां क्षीरोद-दर्शनम्—"अद्राक्षुरपि तत्र ते··· आश्चर्यम् आश्चर्याणाम्, आर्तिहरं चक्षुषोः, आनन्दम् अन्तःकरणस्य, दुरासदम् अनाराधित-नारायण-चरणारविन्दानां दुग्धोदं नाम रत्नाकरम्।"

अधोलिखिते श्लोके कविर् अल्पस्य क्षीरस्य कृते मानुष-वेषं धृत्वा घोषं प्रविष्टं विष्णुं विस्मापयन् इवाऽवर्तत अपारः क्षीर-सागर इत्य् उल्लिखति—

घोषे क्वापि पुरा पयः कियदपि स्तैन्येन दैन्येन वा
लब्धुं योऽवहद् ईश्वरोऽपि जगतां जन्माधमं मानुषम्।
तं विस्मापयितुं तरङ्गवलयैर्घोषान् असङ्ख्यान् सृजन्
आ भूभूतलसम्भृतेन पयसैवावृत्य यो वर्तते॥ २, २३॥

सागरम् उद्दिश्याऽपर उल्लेखः, यद् वरुणस् तत्र न सुखं वसति इति—

खाद्या यत्र सुधैव, यस्य जठरे साक्षात् स धन्वन्तरिः
शेते यत्र समस्तरोगशमनो नाम्नैव देवोऽच्युतः।
तस्मिन् दुग्धनिधावपि स्पृहयते नैव स्थिरामासिकाम्
अन्तर्लीन-हलाहलोष्ण-चकितो नाथः स्वयं पाथसाम्॥२.२८॥[1]

पश्यत अन्यद् उल्लेख-गर्भं सुकुमारपद-निबद्धं प्रसङ्गं, गङ्गावतरण-काव्यस्थ-पञ्चमसर्गाद् उद्धृतम्, यत्र चतुर्मुखेन बन्धनान्मुक्ता, भुवं प्रति प्रस्थिता गङ्गा ब्रह्म-सभाम् उत्तरति—

सन्निवृत्य सदसस् ततो बहिः क्रोधमन्थर-विसंस्फुटैः पदैः।
आविवेश सरसीं ततो नु ताम् आपगापि जगदाक्रमोद्यता॥५,१५॥
स्थापिता कलशजन्मना पुरा सेतवः श्रुतिमयाः समन्ततः।
संनिपत्य सकृदेव सप्लुतैर् ऊर्मिभिस्त्वरितम् उल्ललङ्घिरे॥१६॥

---

१. नीलकण्ठचम्पू, द्वितीयाश्वासः, पृ० ११०, ११४–५।

गङ्गाजले मग्ना ब्रह्म-सभा एवं वर्ण्यते—

प्राप्य जानुम् अतिलङ्घ्य नाभिमप्यम्भसि क्षणमथाऽऽस्य-सम्मिते ।
क्रन्दतामशरणं तपस्विनां शुश्रुवे कलकलान्वितं वचः ॥१८॥

सर्वतः सुरतरङ्गिणीजलैः सम्प्लुते सदसि तत्र वेधसः ।
प्राणसंयमन-शिक्षया परं मज्जिता न कतिचिन्महर्षयः ॥१९॥

वक्त्र-सौध-वलभीगता विधेः शारदापि सहसोत्थिता सती ।
उद्गृहीत-करपुस्तका भयाद् अक्षिपद् युगमिव क्षणं क्षणम् ॥२०॥

तदा विश्वसृजोऽपि बुद्धिर् न प्रावर्तत—

विश्वसर्ग-चतुरोऽपि पद्मभूर् न प्रतिव्यधित तत्र किञ्चन ।
स्वैरमस्तु कुशलः परापदि, स्वापदि त्वकुशलोऽखिलो जनः ॥२१॥

सत्यलोक-कुहर-क्षणासिका-सङ्कटाक्षमतयेव तत्क्षणम् ।
निर्जगाम परितस्ततो बहिस् सन्निसर्ग-निरवग्रहं पयः ॥२२॥

अपगच्छति गङ्गाजले एतद् दृश्यम्—

गाधभाजि गतविक्रियं जले सस्मितं तदनु नाभिमात्रके ।
सौक्तिगुम्फमपि दर्शितस्थले वक्त्र-मण्डलम् अधाच् चतुर्मुखः ॥२३॥

तारिता वयमिमां महापदं तावकादिव तपोबलादिति ।
स स्तुतः परिजनेन लज्जितः, कः स्तुतेरपि वधोऽभिपङ्क्तिणः ॥२४॥

फेनिलाः सलिलशोष-रेखकाः सर्वतः सदन-भित्ति-पर्वसु ।
आयत-श्वसितम् आनमन्मुखं पश्यति स्म स दृशातिदीनया ॥२५॥

आपत्काले तस्मिन् किं न मया यत्किमपि कृतम् इति खिद्यते चतुर्मुखः—

नाजपं किमिति मन्त्रमानलं, नासृजं किमिति चाभितस् तटीः ।
इत्यखिद्यत विधिर् गते जले, सा किल प्रकृतिर् अग्रजन्मनाम् ॥२६॥

आननैर् हसितबाष्पकर्बुरैर् अद्य जीवितमिवेति वादिभिः ।
दोर्भिरप्यधिक-दूरचालितैर् आलिलिङ्ग मुनिमण्डलं मिथः ॥२७॥

किन्तु, सत्यावश्यके सन्दर्भानुगुणं ओजःपूर्णताम् अप्यायाति नीलकण्ठ-शैली। यथा नीलकण्ठ-चम्पां क्षीरोदधौ मथ्यमाने भुवन-भीषकस्य कालकूटस्य अभ्युत्थानम् अवतारयति कविः विवक्षितार्थ-प्रकटन-पटुना शब्द-सौष्ठवेन। यथा—

उद्यन्निर्घात-घोष-प्रतिभयमुदयद् धूमकेतूपकेतु
कन्दद्-दिक्पालगन्धद्विपम् उदधिपतत् तुङ्गशैलाग्रशृङ्गम्।
उड्डीनश्येनकङ्कप्रकरम् उपचितध्वान्तम् उद्भ्रान्तवातं
प्राप्तं मृत्योरकस्माद् इव वदनविलं विश्वमासीत् तदानीम् ॥४. ४॥

निस्सङ्ख्य-स्फुरित-स्फुलिङ्ग-जटिलोत्सङ्ग-ज्वलत्पावक-
ज्वाला-भङ्ग-विटङ्क-सङ्कलित-धूमस्तोम-भीमस् ततः।
क्रुध्यत्काल-विवृत्त-वक्त्र-कुहरोन्मुक्ताट्टहासोद्भट-
स्फूत्कारध्वनि-भीषणः प्रववृते कोऽप्यद्भुतो मारुतः ॥४. ५॥

स्वाभाविके वस्तु-चित्रणे निपुणोऽयं कविः। पश्यैतद् दृश्यं गङ्गावतरण-काव्ये चित्रितम्। तपस्यतो भगीरथस्याऽनुग्रहार्थं त्वरमाणः शिवः वृषभम् आरोहति। देवी च मन्दायते। अक्षमो देवोऽन्तर्निरुद्धोद्वेगः अन्तःपुरद्वारम् ईक्षते—

देवोऽपि स्वयमारुह्य वृषभं वृषभध्वजः।
देव्या विलम्बमानाया दृष्टिमध्वनि सन्दधे ॥ गङ्गा ४. ४६ ॥

अद्यापि प्रस्थान-काले वस्त्रालङ्कारादि-विधिषु व्यापृत्य विलम्बन्तीं गेहिनीं, शकटे स्थित्वाऽक्षमया प्रतीक्षमाणस्य कस्य भर्तुर् एषा दयनीया दशा नाऽजनि ? देव्या वाहनारोहणे स्वभावोक्त्या सह उल्लेखमपि सन्दधाति कविः। स वदति—

अम्बापि सम्भ्रमासन्न-सखीदत्त-करा शनैः।
पादारविन्द-विन्यासैः पावयामास मेदिनीम् ॥ गङ्गा ४. ४३॥
आयतोद्ग्रीविकाखिन्नान् अमरान् वेत्रदूरितान्।
कटाक्षैः साऽनुजग्राह करुणासार-सान्द्रितैः ॥४०. ५१॥

अनालम्ब्य सखीहस्तम् अनाक्रम्य च पादुकाम्।
सन्निकर्षं महेशस्य सा जगाम शनैः शनैः ॥४. ५२॥

कृत्वा सव्यपदं लक्ष्म्याः कुञ्चितं जानुमण्डले ।
आरुरोह वृषं शम्भोर् हस्तम् आलम्ब्य सा ततः ॥५३॥

अत्र कविर् उल्लिखति—

आरोपयन्निव स्वैरम् आलिलिङ्ग शिवः शिवाम् ।
इति सङ्कथयन्तीषु सखीष्वैक्षिष्ट साऽन्यतः ॥५४॥

एतादृशान् उल्लेखान् अनुपदं पश्यामः सर्वास्वप्य् अस्य कृतिषु। केवलम् एकम् अपरम् अत्र प्रदर्शये । नीलकण्ठ-विजय-चम्पूवाः प्रथमे आश्वासे देवासुर-युद्ध-कथा विवियते । तस्मिन् आजौ दानवाः अन्तकस्य करं धृतं दण्डम् एव आहृत्य तं ततार्डिरे । परम् अन्यस्यान्तकस्याऽऽभावात् तं मारयितुं न शेकिरे । दृश्यम् इदं कविरेवं चित्रयति—सेनामुखे निविष्टम् अन्तकम् , अपहृत तदीयमेव कालदण्डममोघम् , अभिहत्य तेनैव तम् आदिमं जयम् आपेदिरे ।

कालदण्डहतस्यास्य कण्ठे प्राणा जुघूर्णिरे ।
अन्तकं यद्धतं नेतुम् अन्तकोऽन्यो न विद्यते ॥[1]

छायावृक्षम् उपाश्रयन्ति पथिषु श्रान्ता हि पान्थाः समं
तेष्वेकोऽस्य शुभं शुभेन मनसा हृष्यन् अनुध्यायति ।
अन्यो हर्तुमपेक्षतेऽस्य विटपान् आधारयष्टेः कृते
कश्चिन् निश्चिनुते कवाटफलकं कर्तुं तमेव क्षणात् ॥

(नीलकण्ठदीक्षितः, अन्यापदेशशतकम् १)

---

१. नीलकण्ठविजय-चम्पू २.३५, पृ०४५-४६ ।

सुरभारती

दुर्गादासगोस्वामी*

यावच्चन्द्र-दिवाकरौ दिवि तथा गङ्गा च गोदावरी
यावद् विन्ध्य-हिमालयावपि भुवि स्थास्यन्ति तावद्धि नः ।
एषा संस्कृतवागपि क्षितितले विश्वेरानुग्रहात्
स्वच्छन्दञ्च सगौरवञ्च चिरमम्लाना विराजिष्यते ॥१॥

आ शैलेन्द्रहिमाचलात् प्रचलिता कन्याकुमारीतटं
यावत् सर्वजनप्रिया पृथुमहादेशोपमे भारते ।
प्राचीनात् समयादवारितरयेणाद्यापि या विद्यते
सेयं संस्कृतवाक् पुनातु भुवनं धारेव गङ्गाम्भसाम् ॥२॥

कृत्स्ने भारतभू-विपर्ययचयेऽप्यव्याहता या चिरं
पर्यायेषु स-सङ्कटेष्वपि न च ध्वस्तेतिहासस्य या ।
प्राणानां महसा स्फुरन्त्यपि भृशं याऽरक्षदेवात्मन्तो
वैशिष्ट्यं खलु सा भुवः प्रभाविता क्षेमायच ॥३॥

या वाल्मीकि-पराशरात्मजमुखैः श्रीकालिदासादिभि-
र्मन्वादिस्मृतिशास्त्रकारनिकरैः कौटिल्यमुख्यैरपि ।
श्रीवात्स्यायन-पाणिनिप्रभृतिभिः श्रीशङ्कराद्यैस्तथा
स्वैः ग्रन्थैरुपबृंहिता प्रतियुगं सा भाविनी कालजित् ॥४॥

साङ्गाम्नाय-पुराण-तन्त्र-कविताऽलङ्कार-कोश-स्मृति-
व्याख्या-वैद्यक-नीति-दर्शन-कला-विज्ञान-शिल्पादयः ।
नानाशब्दविषयाः प्रकाशमगमन् यस्याञ्च वाचि स्फुटं
दैवी गौर्भवितेष्टदाऽमृतमयी सा कामधेनूपमा ॥५॥

---

* एम. ए., प्रधानसंस्कृताध्यापकः, साहित्यशास्त्री ब्रह्मानन्दकेशवचन्द्र-महाविद्यालयः, कलकत्ता–३५ ।

यस्याः प्राकृतवाग् यथाक्रममपभ्रंशादिभाषास्तथा
नानाराष्ट्रचयेऽधुना प्रचलिताः किञ्चाधुनिक्यो गिरः।
उद्भूताः किल कालचक्रपरिधेरावर्तनैर्भारते
सा मूलप्रकृतिस्तथा च जननी नानागिरां जीवतात् ॥६॥

नानाभाव-रस-प्रबन्ध-रुचिरा या गद्य-पद्यात्मिका
स्व-वाणी स्मरणातिगाच्च समयादद्यापि लोकानिह।
भाग्य-त्यागपथं तथाऽमृतपदं स्वादर्शजातं पुनः
शिक्षां सस्कृतिमप्युपादिशदनं भारती पातु नः ॥७॥

रागादेव सिषेविरे किल पुरा यामश्वघोषादयो
बौद्धा दार्शनिकाः कवीन्द्रनिवहाः श्रेष्ठाश्च धीरा अपि।
स्वे देशेऽपि पुन-र्विदेशनिचये पारेऽब्धि या सेव्यते
प्रेम्णाद्यापि बुधैर् विराजतु चिरं सा भारती भारते ॥८॥

नानाऽनैक्यमयीं स्व-भारतमहीमैक्यं तथा संहतिं
या भाषैकतमा महैक्यनिपुणा कामं पुरा प्रायय्त्।
राष्ट्रे चेयमलञ्चकार निखिले या राष्ट्रभाषापदं
सैषा संहतयेऽधुनापि समलङ्कर्तुं क्षमा तत्-पदम् ॥९॥

धन्या भारतभूरियं क्षितितले धन्या च तत्-सन्ततिः
धन्या संस्कृतवाक् पुमर्थपरमा सर्वार्थसिद्धिप्रदा।
धन्याः संस्कृतवाङ्मयस्य निधयः सर्वेऽपि भू-सूरयो
धन्या भातु च विश्वसंस्कृतमिति प्राज्ञप्रिया पत्रिका ॥१०॥

संस्कृतेः सङ्कटम्

कुन्दनलालशर्मा*

संस्कृत-शब्दस्य को नाम वाच्यार्थः, कोऽभिप्रायः, किम् आकूतम् इत्यत्र सन्ति तावद् विदुषां विप्रतिपत्तयः। परं परम्परातः प्राप्ता आचार-विचाराः, लोक-व्यवहाराः, आध्यात्मिकाऽनुभूतयः सांसारिक-समस्या-समाधान-प्रकाराः, शिक्षा-दीक्षादि-विधयः काव्य-संगीत-कला-कलापादर्शाः, सत्य-दया-दाक्षिण्यादिगुण-ग्रामाः, आर्थिक-सामाजिक-राजनैतिकनीति-रीतयः सर्वम् इदं संस्कृति-पदवाच्यम् इत्यत्र प्रायेण समेषाम् ऐकमत्यं विद्यते, स्वल्प एव विसंवादः समापतति।

मा भूद् भारतीया संस्कृतिः संसारे कामं सर्व-प्राचीना, पुराणतम-संस्कृतिष्व् अन्यतमा त्व् अवश्यम् अस्ति। मिश्र-बाबुल-प्रभृति-प्राचीन-देशानां संस्कृतयस् तु कालेन कवलिता नाम-शेषतां गताः, किन्तु भारतीया संस्कृतिर् अद्यापि स्वकीयां पुरातन-श्रियम् आश्रित्याऽपि नूतन-परिधानम् आदधाना सर्वत्र समादरम् आप्नोति, प्रशस्यते च। विज्ञान-प्रधानेऽस्मिन् युगे पृथिवी-पृथुलता सङ्कोचम् आगता, विप्रकर्षः प्रतिदिनं विलुप्यते, देश-गतम् अन्तरम् अन्तम् आयाति। सुदूरस्था अपि जना द्रुत-गतिभिर् वायुयानैः स्वल्पेनैव समयेन सन्निकर्षम् अनुभवन्ति। सन्निकर्ष-जन्य-सङ्घर्ष-वशात् सर्वोऽपि लोकः स्वकीयान् परम्परा-प्राप्तान् आचार-विचारान् विहाय परकीयान् व्यवहारान् अंगीकृत्य सङ्कर-संस्कृतिम् उत्पादयितुम् ईहते। अतोऽद्य न काऽपि संस्कृतिः स्वकीयेन विशुद्धेन रूपेण अवस्थातुं शक्नोति। तथापि सुसमृद्धाः, शक्ति-सम्पन्नाः प्रभाव-शालिनो देशाः स्वकीयां संस्कृतिम् अन्येषु विपन्नेषु क्षीण-शक्तिष्व् अधमर्णेषु देशेषु समारोपयितुम् ईहन्ते, 'सर्वे गुणाः काञ्चनमाश्रयन्ते' इति लोकोक्त्यनुरोधात् सर्वे निर्धना निर्बलाश् च हीन-भावनाऽऽक्रान्त-हृदया लोकाः स्वकीयं सर्वं हीनतर क्षीण-प्रभावं च मन्यमानाः परकीयां नव-यौवन-सम्पन्नां नव-परिधानावृतां, नव-वयः-समुचित-केलि-कल्लोल-रतां चञ्चल-स्वभावां, मनोहराम् उत्प्रेक्ष्य

* एम. ए., प्रोफेसर संस्कृतविभागाध्यक्षश् च, स. ध. कालेज, मुज़फ़्फ़रनगरम्।

कामुका इव वयः-परिणाम-परिपक्व-स्वभावां, प्रौढां, सुस्थिरां, गम्भीर-प्रकृतिम् अपि स्वकीयां संस्कृतिं परित्यजन्ति। परिणामतः पाश्चात्या संस्कृतिर् अन्याः सर्वाः परिभूय सर्वत्र समुज्जृम्भते। सङ्कर-जातिर् इव सङ्कर-संस्कृतिर् अपि उभय-पक्ष-गत-दोष-दूषिता स्वीकर्तुः कलमषाय कल्पते, क्लेशाय सम्पद्यते। स खलु धावद्-अश्व-द्वयारुढोऽपटुर् इव नूनं विपत्तिम् एति। सप्रतिघातम् अधोमुखः पतति। संस्कृति-द्वय-सङ्क्रान्ति-काले स्वगत-सन्तुलनं स्थिरीकर्तुम् असमर्थः किङ्कर्तव्य-विमूढः सन् कर्तव्याकर्तव्यम् अजानानो जनः पापीयान् भवति, सर्व-मान्यान् नियमान् उल्लङ्घते, भ्रष्टम् आचरति, सर्वत्र उपद्रवान् जनयति, उच्छृंखलतां प्रतिपद्यते। नव-संस्कार-जन्य-चाक-चक्य-वशात् सञ्जात-दृष्टिदोषो वस्तुस्थितिम् अवलोकयितुम् अक्षम उत्पथम् अवलम्बते। ईदृशी दुरवस्था शिक्षितेषु विशेषतोऽर्धशिक्षितेषु तेषु भारतीयेष्व् अपि दरीदृश्यते ये खलु विच्छिन्न-परम्पराः पाश्चात्याऽऽचार-व्यवहारस्य बाह्य-रूपेणाऽऽकृष्यमाणाः पाश्चात्यानाम् उन्नतेर् मूल-कारणं गुण-गरिमाणम् अनुद्वीक्ष्य तेषां सामाजिक-संघटनं नैतिक-परम्परां चोपेक्ष्यैव तान् अनुकुर्वन्ति, 'इतो नष्टास् ततो भ्रष्टाः' इति लोकोक्तिम् अनुरुध्य तेषां दूषणान्य् एव स्वीकुर्वन्ति। भारतीय-नियम-संयम-बन्धनानि परित्यज्य पाश्चात्य-नियमान् अस्वीकृत्य च त्यक्त-सर्वप्रतिबन्धाः स्वल्प-विद्या-गर्वदर्पिताः ते सामाजिक-नियमान् उल्लङ्घ्य परम्पराम् उद्भज्य गुरुवचनम् अनादृत्य स्वैरिताम् अवलम्ब्य पैशाचिकम् आह्लादम् अनुभवन्ति। 'न खलु वयं नवीनाः पुरातन-परिपाटिषु विश्वसिमः, सर्वं पुरातनं समय-प्रतिकूलत्वाद् हेयं, सर्वं नवीनम् अनुकूलत्वाद् ग्राह्यं चेति सन्ति तेषां कुतर्काकयः। विचित्रा खलु मदान्धता आवृणोति तेषां मनांसि, सुदुर्बोधा बालिशता जडीकरोति तेषां चित्त-चेतनाम्। इदम् एव महत् संस्कृति-सङ्कटम् अद्योत्तिष्ठति राष्ट्र-सम्मुखे, किन्तु न केऽपि दानवम् इव एनम् उद्वीक्षमाणः प्रतिभाति। पश्यन्न् अपि वा गज-निमीलितम् इवाऽऽचरन्न् उपेक्षते। किन्तु न केऽपि तस्य गाम्भीर्यम् अनुभवति।

प्रथमतस् तेषां नव-संस्कृतानां व्यवहारः समाजम् अवहेल्य व्यक्ति-गत-महत्त्वम् उद्भावयति। व्यक्ति-गत-महत्त्व-भावना मनुष्ये उद्दाम-दर्पम् उपजनयति। अविनयम् उत्पादयति। विद्यायाः प्रथमं फलं विनयं परिगणयति विचक्षणगणः। प्राचीनेषु भारतीयेषु विनीत-भावना प्राचुर्येण विराजमाना दृश्यते सर्वत्र समाजे। सामाजिकोऽयं गुणः परस्परं सौहार्दं सहानुभूतिं, समादरं च जनयति।

विनय-शीलो न कस्य हृदयम् आवर्जयति ? न कस्य मैत्रीम् उपजनयति ? न कस्य सद्भावनाम् उद्भावयति ? अयम् एव सामाजिकः सद्गुणोऽद्य विलुप्यते। अनेन सहैव अस्य परिणाम-भूतो गुण-ग्रामोऽपि-शनैः शनैर् अदर्शनं याति। शुष्के स्रोतसि प्रवाहः कथं न क्षीयेत। अत एव भारतीयानां नवीना सन्ततिः सर्वत्र अविनय-शीलताम्, उदण्डतां च आविर्भावयति। प्रशासनिक-कार्यालयेषु कर्मचारिणां जनतया व्यवहारे दुर्गुणोऽयं विशेष-रूपेण प्रकटीभवति। हीन-हीनोऽपि प्रशासन-कर्मचारी कार्याऽर्थिभिस् तथा उद्धतम् अविनीतं च व्यवहरति यथा कश्चिद् दण्ड-नायकोऽपराधिषु साधिक्षेपम् आत्म-प्रभावं प्रतिष्ठापयितुम् उद्युङ्क्ते। विदेशी-यैर् अस्योदीयमानस्य दुर्गुणस्य यत्र तत्र पत्रेषु भर्त्सनाऽपि क्रियते। विद्यालयेषु विद्यार्थिनो गुरुष्व् अविनयम् आचरन्ति, गृहेषु पुत्राः पितृषु धृष्टं व्यवहरन्ति। शिल्प-शालासु कर्म-कराः प्रबन्धकेषु, विपणिषु वणिजो ग्राहकेषु, यात्रासु यान-कर्मचारिणो यात्रिषु, यात्रिणो यात्रिकान्तरेषु, स्वामिनो भृत्येषु, भृत्याश् चाऽधुना स्वामिषु तथा व्यवहरन्ति यथा सर्वत्र पारस्परिक-विद्वेषो विराजते, सर्वत्र दुर्भावनोद्भिद्यते। समाजे सर्वत्र परस्परम् अविश्वासः, शिष्टताया अभावश् च परिलक्ष्यते।

शिष्टाचारस्य ह्रासोऽयम् अन्यत्रापि स्व-प्रभावम् उपदर्शयति। अस्मद्-देशे नारी सामाजिकानाम् आदरम् आदित एव अलभत। तस्या अनादरम् असहसानाः सहस्रशो युवानः स्व-प्राण-पणैर् अपि अपराधिनं दण्डयितुम् अयतन्त। रामायणे महाभारते चेदं प्रयाणीक्रियते। नारी-सतीत्व-रक्षार्थम् स्त्री-सम्मान-परिपालनार्थं सदैव भारतीयाः सन्नद्धा अभूवन्। रक्त-नदीर् अपि प्रवाह्य नार्या अपमानं प्रतिशोध्यैवाऽनेके भारतीया निवृत्तिं लेभिर इति सुविदितं विद्यावताम्। किन्त्व् अद्य शिक्षितम्मन्यैर् युव-जनैश् चतुष्पथेषु सर्वजन-समक्षम् अपमान्यमानाम् न कश्चिद् अपि त्रातुम् उत्तिष्ठते, न कस्याऽपि बाहुः परिस्पन्दते, न कस्याऽपि मर्माहतं हृदयं खण्डशः परिस्फुटति। सर्वो जनो विचित्राम् एकाम् अनिर्वचनीयाम् उदासीनताम् आस्थाय पुरतः प्रवर्तमानम् अनाचारं पश्यन्न् अपि न पश्यति। सर्वोऽयं विशालो देशः शनैः-शनैः षण्ढ-वसतौ परिवर्त्यमानः प्रतीयते। यत्र गात्र-सञ्चालन-पुरःसरं नृत्य-संगीतादिकं तु दिवारात्रं

चलति किन्तु पौरुषोचितं कर्म क्रियमाणं न दृश्यते। कदा नु खलु राक्षस-त्रासिताः सीताः समुद्धर्तुं पुनर् अपि रामोऽवतरिष्यति, कदा नु खलु दुःशासन-सहस्र-समुत्पीडिता द्रौपदीः परित्रातुं भुज-दण्डाव् आस्फाल्य भीमः समुत्थास्यति। पाश्चात्येष्व् अद्य नारी सर्वत्र सम्मान्यते। तत्र नारीषु क्रियमाणा अपराधास् तीव्रां प्रतिक्रियां जनयन्ति जनहृदये।

पाश्चात्य-प्रभावाऽभिभूता भौतिक-भावनाऽऽक्रान्त-हृदया अवधीरिताऽध्यात्म-विचारा येन केन विधिना धनोपार्जनैक-लक्ष्याः पाप-पुण्य-सत्यानृत-विचार-विहीना धर्मं पाषण्ड इति, पापं कपोल-कल्पितम् इति, पुण्यं धूर्तस्वार्थसाधन-सङ्कल्प इति कर्तव्याऽकर्तव्य-विचारो लौकिक-साफल्याऽसाफल्याऽधीन इति मन्यमानाः सर्व-विधम् अनाचारं निःशङ्कं निष्प्रत्यूहं च कुर्वन्तोऽपि समाजे धनाढ्यता-वशात् सम्मान-भाजनतां यान्ति। भ्रष्टम् आचरन्तोऽपि नेतारो भवन्ति। शासन-तन्त्रम् आत्मसात्-कृत्य सर्व-प्रकारम् अत्याचारम् आतिष्ठन्ति। एतैर् 'महाजनैर्' निर्मितेन मार्गेण अन्ये प्राकृत-जना अपि सञ्चरन्ति। तेऽपि भ्रष्टाचारम् आश्रित्य समाज-हित-विरुद्धां स्वार्थ-साधन-प्रवृत्तिं परिपुष्णन्ति। केवलं धर्म-परायणा जनता कष्टम् आपद्यते। अस्मिन् विषये भौतिक-वादिनाम् अपि पाश्चात्यानां व्यवहारोऽत्युत्कृष्टो भवति। सामाजिक-दायित्व-भावना सर्वोपरि वर्तमाना तेषाम् आचरणं सन्मार्गे अभिनिवेशयति। तेषां भारतीय-शिष्याणां मनसि विराजमाना सर्व-दायित्व-शून्यता नूनम् अनर्थ-करी सम्पद्यते। अस्याम् अवस्थायां कर्तव्याऽधिकारयोर् विवेकस् तु दूरस्थः, कर्तव्य-चिन्ताऽपि परिहीयते। आधुनिक-भारतीया अधिकाराणां प्राप्त्यर्थं कर्ण-स्फोटकं क्रन्दनं कुर्वन्ति, कर्तव्यस्य चर्चाम् अपि न कुर्वन्ति। कर्तव्यस्येयम् अवहेलना राष्ट्रस्याऽधो-गतये सम्पत्स्यते। कर्तव्य-भावना-विहीनाः स्वकीयाम् एव समृद्धिं पुरस्कृत्य प्रवर्तमाना जना राष्ट्र-हिताय कल्पस्यन्त इति दुराशामात्रम् एवास्ति। किन्तु राष्ट्र-हित-विरुद्धम् उच्छृङ्खलं कार्य-जातं कियन्तं कालं व्यक्ति-गतं स्वार्थं साधयिष्यतीति न विभाव्यते विवेक-शून्येन स्वार्थि-समुदायेन। अन्ते तु विपद्-ग्रस्तेन राष्ट्रेण सह तेऽपि विनाशम् एष्यन्तीति स्वतः सिद्धो राद्धान्तः।

राष्ट्र-हितं परिहृत्य स्वार्थ-साधने संलग्नो व्यापारि-वर्गो यथेच्छं मूल्य-वृद्धिं कृत्वा स्वकीयं कोषं प्रपूर्य दारिद्र्योपहतां जनतां क्षुत्क्षाम-कण्ठाम् अपि, मरणाऽऽसन्नाम् अपि क्षुत्पीडित-जठराम् अतिद्रुत-गत्या काल-कवलताम् आनयति वा धनपति-परिपन्थिनः साम्यवादिनो निमन्त्रयते वा। एवम् एव उत्कोच-हारिणः शासन-कारिणोऽपि स्वकीयम् उदरं संभृत्य असहायाम् अशिक्षितां च जनतां क्लिश्नन्ति, अवमन्यन्ते, निर्भर्त्सयन्ति च। असन्तोषः प्रतिदिनं वर्धते, विधि-व्यवस्था क्षीयते, शासने विश्वासो विनश्यति। शासन-विरुद्धोऽयं ज्वालामुखी कदा विस्फोटम् एष्यतीति को नु जानाति। अप्रतिहत-गतिर् इयं स्वार्थ-साधनेच्छैवाऽत्र निदानम्। अत्युत्कटा धन-लिप्सा सदा राष्ट्रस्य विनाशाय कल्पते। योरुपीया अपि धनम् अर्जयन्ति, किन्तु तेषु वाटवन्-सदृशानां स्वार्थोत्सर्गिणां देश-भक्तानाम् अभावो नास्ति ये निज-हितम् अधरीकृत्य राष्ट्र-हितम् उन्नयन्ति। भारते वर्षे तादृशानाम् आत्मोत्सर्गिणां क्षीण-क्षीणापि संख्या प्रतिदिनं क्षीयतेतराम् इदम् एवाऽस्ति द्वयोः संस्कृत्योर् मध्ये महद् अन्तरम्। अत एव ते प्रतिदिनम् उन्नति-पथम् आरोहन्ति, एते तु विगत-विंशति-वर्षेषु यथा-पूर्वम् एवावस्थिताः। केवलं केचिद् धनाढ्या आढ्यतरा जाताः, निर्धनास् तु निर्धनतराः।

उद्दान्तोद्दण्डान् विनेतुम् ईश्वर-भयं समाज-भयं राज-भयं वा प्रभवति। केचिद् एव शिष्टाः स्वयम् आत्मानं नियन्तुं यतन्ते। यत्र त्रिविधम् इदं भयं विलुप्यते तत्र साहसिकानां पाटच्चराणां च महोत्सवो भवति। भारते वर्षे त्रिविधम् अपि भयं सर्वत्र प्रवर्तमानम् आसीत्। अधुनातनेषु भौतिक-वादिषु ईश्वर-भयं तु न पदम् अपि कर्तुं शक्नोति, समाजस्य जर्जरतया उपक्षीणा नियन्त्रण-शक्तिः। मूर्ख-मताऽधीनं प्रजा-तन्त्रं न जातु उद्दण्डान् दण्डयितुम् उद्युङ्क्ते यतो मत-दानाऽवसरे त एव स्व-प्रभावेण पद-प्रत्याशिनः साहाय्यं सम्पादयन्ति। अतो नियन्त्रण-शून्यम् असंयतं निरस्ताऽनुशासनं राष्ट्रम् अधोगतिं प्रतिपद्यते चेत् किम् अत्राऽऽश्चर्यम्। सर्वविध-दायित्व-हीनैर् आन्दोलन-कारिभी राजनैतिक-नेतृभिः समाजे वर्धमानोऽयम् असन्तोषो वर्तमानं वैषम्यं च स्वहस्त-गता पाञ्चालिकेव स्वार्थ-सिद्धये प्रयोक्ष्यते। स्वार्थ-सिद्धिर् इयम् अनवरतम् आन्दोलनम्

अपेक्षते। अनियन्त्रितान्य् आन्दोलनानि कर्तव्याऽकर्तव्य-विवेक-बुद्धिम् अवसादयन्ति। अवसन्न-बुद्धिर् जन-समूहो राष्ट्रस्य सर्वविधावसादाय सम्पद्यते। अयम् एव अवसादो भारतस्य राष्ट्रिय-धमनिषु द्रुत-गत्या प्रसरति।

चतुर्वर्गे धर्मानन्तरं परिगण्यमानोऽर्थः सर्वथा धर्मानुकूलो यदि स्यात् तर्हि श्रेयस्करो भवति, अन्यथाऽनर्थाय कल्पते। धर्म-प्रतिकूलैर् उपायैर् उपार्जितं धनम् अप्रशस्तम् अभिशस्तं परिहार्यं च भवति। नैकेविधानि दूषणान्य् अप्रशस्तेन धनेनैव जायन्ते। पूर्वम् अपि धनिक-वर्गेण विविधानि व्यसनानि सेव्यसानानि प्रमाणीक्रियन्ते किन्तु न केनापि कदापि व्यसनानि न्याय्ये पदे समारोपितानि। अद्यत्वे तु स्वयं-कृतस्य पापस्यौचित्यम् उच्चैर् उद्घोष्यते। गर्हितम् अपि कर्म चत्वरे निस्त्रपं कृत्वा धनिकाः सम्मानं लभन्ते। पाप-कर्म-कौशलेन प्रख्यायन्ते। सम्मानिता अपि प्रकट-रूपेण धर्म-परायणा अपि व्यापारे व्यवहारे च सर्वत्र अनृतं, धूर्तता, प्रवञ्चनां, वचनापलापं, कपटतां, व्यलीकतादिकं सर्वं वाणिज्य-कर्मणि न्याय्यम् इति प्रतिपादयन्तो न जिह्रियते। कर-चौर्यम्, मूल्य-वर्धनम् अनुचितो लाभः, अवतोलनम्, अधिलाभ इत्यादि-दूषणानि भारतीये वाणिज्य-क्षेत्रे चिराद् रिक्थ-रूपेणाऽधिगतानि, तथापि तेषाम् औचित्यम् अद्यैव समाजे प्रतिष्ठाप्यते। चौर-व्यापारो दिनस्य प्रकाशे व्यक्त-रूपेण अनिर्बाधं क्रियते। पर-प्रवञ्चना-प्रवृत्तिः पराकाष्ठां गतेति कृत्वा विदेशीयाः साधारणेषु भारतीय-वणिक्षु प्रायेण न विश्वसन्ति। आधुनिकानां भारतीयानां मनसि वचसि कार्ये च सामञ्जस्यं सन्दिह्यते। वस्तु-निर्माणे कपटाऽऽचारो विदेशीयैर् अपि भारतीय-वणिजां प्रभावेणाऽस्मिन् देशे क्रियते। स्वकीये देशे तेऽन्यथा व्यवहरन्ति तत्र ते सत्पथम् आचरन्ति। अस्मद्-राष्ट्रस्य प्रतिमूर्तिर् एभिर् विदेशेषु स्वार्थ-परतया कलङ्क्यते इति महतः शोकस्य विषयः।

पाश्चात्य-प्रभावेण विस्मृताऽऽत्मानो निरस्त-समस्त-संयम-नियमाः युवानः प्रायेण समाजे सर्वत्राऽनाचारम् अपि प्रचारयन्ति। तेषां नवचेतना-दर्शने परस्त्री-स्पर्शाऽभिमर्शयोः न कोऽपि दोषो भवति। 'रतिर् नाम सर्वथा स्वाभाविको व्यापारोऽतो यौन-वासना-संयमनं न केवलम् अप्राकृतं कर्म, अपि तु स्वास्थ्य-हानिकरम् अपि भवति। को नाम कामस्योद्दामं प्रवाहं नियन्तुं निवारयितुं वा प्रभवति। 'विश्वामित्र एवाऽत्र

निदर्शनम्' इति कानिचिद् अपवाद-भूतान्य् उदाहरणान्य् उत्सर्ग-रूपेण स्वीकुर्वाणास् ते कामुकतायाः प्रचारं प्रसारञ् च न्याय्यं मन्यमानाः समाजे नवीनता-व्याजेनाऽनाचारं विस्तारयन्ति। योजना-बद्धम् इदं कार्य-जातम् उच्च-वर्गे प्रचलति। क्वचिद् नृत्य-संगीत-संवर्धन-व्याजेन क्वचित् सौन्दर्य-प्रतियोगिता-व्यपदेशेनैते काम-वासनाः पूरयितुं विविधाः सभाः संस्थाश् च सञ्चालयन्ति। विश्व-सुन्दरी-समारोहेषु यावद् धनम् एते नारी-सौन्दर्य-विशेषज्ञा अपव्ययन्ति तस्य सहस्रांशम् अपि जन-हित-कार्येषु उपयोक्तुम् उद्यता न भवन्ति। नाऽपि सौन्दर्यप्रियास् ते मलिन-मलिनानाम् अवस्कर-पूर्णानां निर्धन-वसतीनां किट्टं कर्दमञ् च प्रमार्ष्टुम् एकां काकिणीम् अपि दातुम् ईहन्ते।

अस्मिन् विषये चल-चित्रेषु प्रदर्शिता अनियन्त्रिताः प्रणय-भावा असंयताः काम-केलयोऽश्लीलं गानञ् च साहाय्यं कुर्वन्ति। तत्र दृष्ट-श्रुतञ् च सर्वं जीवन-रंग-शालायाम् अपि नाटयितुम् ईहमानास् ते विद्यालयेषु सङ्कर-सभासु च नव-यौवन-सम्पन्नाभिर् विविध-वेष-भूषावृताभिर् अर्ध-नग्नाभिश् च आधुनिकाभिर् हास्य-विनोद-बहुलानि नृत्य-संगीतकान्य् आयोज्य अन्तर्निगूढाः काम-वासनाः समुद्दीप्य अभिसार-कर्मसु परस्परं प्रवर्तयन्ति। किन्तु परिणममानेषु तत्फलेषु किम् अपि दायित्वम् अस्वीकुर्वाणा कापुरुषाः प्रायेण विवाह-प्रस्तावं प्रत्याख्याय नारी-जीवनं लोकापवाद-दहने दग्धुं परित्यज्य मृगयान्तरम् अन्वेष्टुम् आरभन्ते। स्वकीय-कलमषं प्रक्षालयितुम् ईहमानास् ते भ्रूणहत्याम् अपि न्याय-संगतां प्रति-पादयन्ति। यद्यपि पुराकालेऽपि निभृतं निगूढञ् च व्यभिचार-कर्म प्रावर्तत तथाऽपि पापस्य न्याय्यत्व-प्रतिपादने न केनापि यत्नः कृतः प्रतीयते। अद्य तु पापं पापम् एव न मन्यते आंग्लेष्व् अपि अभिजातः शिष्ट-सम्प्रदायोऽ-स्मिन् विषये समुचितां मर्यादां परिपालयति किन्त्व् अर्ध-योरुपीया भारतीयास् 'त्यक्तलज्जः सुखी भवेद्' इति लोकोक्तिम् अनुसरन्तो वृद्ध-जन-समक्षम् अपि अनर्गलं प्रलपन्ति।

वृद्धानाम् आयुर् एव सम्मानम् आवहति इत्य् अस्ति भारतीयः शिष्टाचारः। किन्तु पश्यामो वयम् अनुदिनं यद् युवानो वृद्धान् उपहसन्ति गुरून् अवजानन्ति, अभिवादनार्हांस् तिरस्कुर्वन्ति। उन्मार्ग-गामिनस् तान् उपदिशन्तो गुरवो 'जानीमो' वयम् आत्म-हिताहिते, अलम् अतिप्रलापेनेति साधिक्षेपम् अवधीर्य निर्भर्त्स्यन्ते। वार्धके तिरस्कृतास् ते वराकास् तूष्णीम्

आसते । 'अस्माकम् अपि जठरं न म्रियते कथम् एतान् जरठान् वयं पालयामः' इत्युदरम्भरयस् ते पितराव् अपि वार्धके परास्यन्ति । 'वृद्धजनपालनं प्रशासनेन कर्तव्यम्' इत्यस्ति तेषाम् आकूतम् । किन्तु पाश्चात्येषु देशेषु प्रशासन-परिपालिता वृद्धा कीदृशं नारकीयं जीवनं यापयन्तीति न ज्ञायत एभिः ।

पाश्चात्य-संस्कृतेः कलङ्कभूतं दूषणं सुरापानम् अस्मत्-समाजे द्रुतगत्या वर्धते । पुरुषातिरिक्ता आधुनिका नार्योऽपि व्यसनम् एतत् प्रतिपद्य आत्मानम् अभिजात-कुलान्तर्गतम् अभिमन्यन्ते । भारतीया संस्कृतिः सुरापानं महा-पातकेषु गणयति । किन्तु कीदृशो दैवदुर्विपाकोऽयं यत् तदेव दूषणम् अद्य तथाकथिते 'उच्च-समाजे' मुख-भूषणं संवृत्तम् । मद्यप-बहुले तस्मिन् समाजे निवृत्त-मद्यः सात्त्विको जनो विचित्राम् अनिर्वचनीयाम् उपेक्षाम् अनुभवति । प्रशासक-वर्गे मद्यप-समुदायस्य प्रबलत्वाद् एव कृत-प्रयत्ना अपि केचित् सात्त्विकाः संसत्सदस्या मद्यपान-निरोधकं विधेयकं संसदि पारयितुम् असमर्था अभूवन् ।

मन्त्रि-वर्गस्याऽपि व्यसनेऽस्मिन्न् आकण्ठ-मग्नत्वाद् गान्धि-वादिभिर् आपाद-मस्तकं बलं प्रयुज्यापि मद्य-निषेध-विषये न मनाग् अपि सफलताऽधिगता । यद् दुर्व्यसनं देशाद् दूरीकर्तुं राष्ट्रपिता गान्धी सत्याग्रहं कृत्वा विदेशीयानां कारागारे वर्षाणि यावद् यातनाः सोढवाऽपि सर्व-सन्धि-वार्ताः सपाद-प्रहारं परिहृत्याऽन्नेऽत्याचारिणो देशाद् निरस्य राम-राज्य-स्थापनार्थम् अयतत, यद् दुर्-व्यसनं देशान निरसितुं परःसहस्रा भारतीया विदेशीय-साम्राज्य-विरुद्धं प्राणपणेन् अभियुध्य पञ्चत्वं गतास् तदेव दुर्व्यसनम् अद्य परिपोषयितुम् अस्माकम् एव प्रशासने देशे मद्यनिषेधान्दोलनम् असफलयितुम् आपाद-मस्तकं यतते इति नूनम् आश्चर्य-वहम् । भारतीयानां स्वाराज्य-सेनभटानां राम-राज्यस्येदृशी कल्पना कदाऽपि नाऽऽसीत् । पूर्वोक्तम् अस्माकं मनोवाक्-कार्येष्व् असामञ्जस्यम् अत्र प्रमाणीक्रियते । न केवलं प्र-वयस्का एवाऽस्मिन् व्यसने निमज्जन्त्य् अपि त्व् अल्पवयस्काश् छात्रा अपि दुर्व्यसनेऽस्मिन् प्रेर्यन्ते दुराचारिभिः । पाश्चात्य-संस्कृति-सेविकाः कन्यका अपि महोत्सवेषु कणेहत्य सुरां पिबन्तीति भवति चिन्ता-विषयः । यद्यपि प्राचीनभारते वर्षे व्यसनम् इदम् अभिजातास्व् अपि नारीषु कासुचित्

प्रवर्तमानं प्रमाणीक्रियते तथापि तासां संख्या अतीवस्वल्पा प्रतिभाति। कतिपय-राजगृहान् अतिनिम्नवर्गांश्च चाऽपहाय सामान्यतो नार्योऽनेन दूषणेनाऽस्पृष्टा एवासन्-आधुनिकास् तूत्तम-मध्यम-वर्गीया अपि पश्चिमानुगा दूषणम् इदं भूषणं कृत्वाङ्गीकुर्वन्ति।

लज्जा शालीनता च नारीणां भूषण-द्वयं सर्वत्र प्रशस्यतेतमाम्। किन्तु आधुनिका नार्यो महोत्सवेषु, विवाहेषु, जन-समारोहेषु च निस्त्रपं पुरुषैः सह राज-मार्गेषु नृत्यन्त्यो दृश्यन्ते। एवम् एव महानगर-स्थेषु सम्मिलित-विद्यालयेषु युवजन-समक्षं कन्यका वेश्याजनोचित-हाव-भावप्रदर्शन-पुरःसरम् नृत्यन्त्यो दृश्यन्ते। सर्वम् इदम् एकतस् तु युवकेष्व् अनुशासन-भंग-प्रवृत्तिम् उपजनयति, अपरतश्च कन्यकासूच्छृंखलताम् आसञ्जयति। प्रवृत्तिर् इयं सर्वत्राऽऽलोच्यते, किन्तु प्रभावहीने समाजे यः कश्चिद् यत् किञ्चिद् अपि निर्भयं निर्बाधं च कर्तुम् अलम् अस्ति। सर्वविधाम् आलोचनां तिरस्कृत्य ते स्वमनोवाञ्छितं समुद्धतम् अपि व्यवहारं प्रतिपद्यन्ते।

पापं शीघ्रं प्रसरति, अपराधः सङ्क्रामको रोग इव अभिवर्धते। अतः सामान्यतोऽभिजाताः प्रतीयमानाः स्त्रीश् चत्वरेषु नृत्यन्तीर् दृष्ट्वा निर्मल-चित्ताः कुलजाः कन्यका अपि 'तथैवाधुनिकं प्रचलनम्' इति मन्यमानाः तथैव चिकीर्षन्ति। रोगश् चाऽयम् अप्रतिहत-गतिर् युवक-मनःसु मूलम् आबध्नाति। नैषा शुभलक्षणा प्रवृत्तिः। किन्तु को नामैतां निवारयेद् को नाम शिष्टाचारान् पुनः प्रवर्तयेत् समाजे।

भारतीयं प्राचीनं साहित्यं सर्वस्मिन्न् अपि विश्वस्मिन् लब्ध-प्रतिष्ठम् अनवद्यं चेति विदेशीया अपि विद्वांसः साहित्य-शास्त्रिणश् च मुक्तकण्ठम् उद्घोषयन्ति, सोत्साहं च अधीयते स्वस्व-भाषासु सोल्लासम् अनुवदन्ति च। किन्त्व् अधुनातना भारतीया न केवलम् एतत् तिरस्कुर्वन्त्य् अपि तु तद्विषये मनाग् अपि न जानन्ति। अनभिज्ञा अपि ते दुरालोचनाद् न विरमन्ति। पाश्चात्य-साहित्य-पण्डिता अपि भारतीयाः प्राध्यापका भारतीय-साहित्य-परिचय-वञ्चिता एव सन्ति। बहुभिस् तु कालिदास-

नामाऽपि न श्रुतं स्यात्। को नामान्यस् तादृशो दौर्भाग्यवान् देशो यत्रात्म-पूर्वजान् विश्व-प्रसिद्धान् अपि न जानन्ति सुशिक्षिता विद्वांसोऽपि। संस्कृतिस् तु साहित्ये एवाऽभिव्यक्तिं लभते। यत्र साहित्यम् एवोपेक्ष्यते तत्र संस्कृति-संरक्षणं कुतः क्रियेत। भारतीयं दर्शन-शास्त्रं विश्व-दार्शनिक-साहित्ये विश्वधुरीणम् इति नाविदितं विद्यावताम्। सर्वप्राचीनम् इदं शास्त्रम् अद्यापि स्ववैविध्येन सूक्ष्मेक्षिकया च विस्मयम् आपादयति तत्त्वविदाम्। भारतीयेषु विश्वविद्यालयेषु तद् आनुषंगिकरूपेणैव अधीयते अध्याप्यते च। तत्रत्या दर्शन-शास्त्रिणः प्रायेणाऽनुवाद-मात्रम्-आश्रित्य भारतीय-दर्शनम् आध्यापयन्ति परदर्शन-प्रवीणा आत्मदर्शन-प्रहीणा मूलभाषानभिज्ञास् ते कथं नाम तत्त्वम् अवगाहन्त इति त एव जानन्ति। पाश्चात्यदर्शनम् अत्राऽपि प्राधान्यं भजते, राष्ट्रियं दर्शनम् अधरीकृत्य तत् सुधीजन-सम्मानम् अधिगच्छतीति न कस्य लज्जायै कल्पते इति आनुषङ्गिकम् इदं दर्शनं छात्राणाम् अपि समादरं कथम् आप्नुयात्। अतः सर्वोपेक्षातिरस्कृतम् इदं दर्शनतत्त्वम् अनुदिनम् उपक्षीयते विद्यालयेषु। अचारविचार-स्रोतसि क्षीणे संस्कृति-प्रवाहो राष्ट्रचेतसि कथं प्रवहेद् इति विचारयन्तु राष्ट्रनायका जनहितैषिणश् च विदुषांवराः।

काव्यस्यात्मा ध्वनिर् इत्यत्र 'इति'-शब्दार्थ-विचारः

एस्. नीलकण्ठशास्त्री*

ध्वन्यालोकः—

काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व-
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
केचिद् वाचां स्थितमविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनः-प्रीतये तत्स्वरूपम् ॥

इति पद्ये 'काव्यस्यात्मा ध्वनिर् इति' इत्य् अत्र इति-शब्दार्थविचारः प्रस्तूयते। तत्र लोचनम्—

"काव्यात्म-शब्द-सन्निधानाद् बुध-शब्दोऽत्र काव्यात्मावबोध-निमित्त इत्यभिप्रायेण विवृणोति 'काव्य-तत्त्वविद्भिर्' इति। आत्म-शब्दस्य तत्त्व-शब्देनार्थं विवृण्वानः सारत्वम् अपर-शाब्द-वैलक्षण्यकारित्वं च दर्शयति। 'इति' शब्दः स्वरूप-परत्वं ध्वनिशब्दस्याचष्टे। तदर्थस्य विवादास्पदी-भूततया निश्चयाभावेनार्थत्वायोगात्। वस्तुतस् तु न तत् संज्ञामात्रेणोक्तम्। अपि त्व् अस्त्य् एव ध्वनि-शब्द-वाच्यं प्रत्युत समस्त-सारभूतम्। न ह्य् अन्यथा बुधास् तादृशम् आमनेयुर् इत्यभिप्रायेण विवृणोति तस्य सहृदये-त्यादिना।"

सारभूतार्थबोधकेनात्मशब्देन साकं सामानाधिकरण्येन निर्दिष्टस्य ध्वनि-शब्दस्य ध्वनिर् इति शब्द-स्वरूप-परत्वं मन्यन्ते लोचनकाराः। ध्वनिर् इत्यर्थ-परत्वाभावे च तस्य सारभूतस्य व्यङ्ग्यस्यार्थस्य विवादास्पदत्वं च हेतुम् आमनन्ति। यदि तस्य विवादास्पदत्वं नास्ति तर्हि ध्वनिर् इत्य् अत्रेति-शब्दः स्वकीयं शब्द-परता-बोधन-स्वभावं परित्यज्य, अर्थपरतां बोधयितुं किमु समर्थो भवति।

---

*प्राध्यापकः (विश्वविद्यालयानुदानायोगः) केरल-विश्वविद्यालयः, त्रिवेन्द्रम्।

व्याकरण-शास्त्रं शब्दस्य शब्द एवाऽर्थः, इति-शब्दयोगे तु तस्याऽर्थोऽर्थः। तथा लौकिकस्य शब्दस्यार्थ एवाऽर्थः, इति-शब्द-योगे च तस्य शब्दोऽर्थः। इदम् एवेति-शब्दस्य पदार्थविपर्यासकत्वं प्रसिद्धम्। एतन्मतानुसारेण 'ध्वनिर् इति' इत्य् अत्र इति-शब्देन युक्तस्य लौकिकस्य ध्वनि-शब्दस्य ध्वनिर् इति शब्दोऽर्थ इति ज्ञायमाने "काव्यस्यात्मा ध्वनिरिति शब्द-स्व-रूपम्" इत्य् एव खलूक्तं स्यात् वृत्तौ। किन्तु "काव्यस्यात्मा ध्वनि-संज्ञित' इति हि वृत्तिः। ध्वनि-संज्ञितः अर्थ इति चोक्तं युक्तरूपम्। इतिशब्देन युक्तस्य ध्वनि-शब्दस्य सिध्यतो ध्वनि-स्वरूपस्य कथम् इदं "संज्ञित" इति व्याख्यानं विवरणात्मकं भवतीति तु सुधीभिर् विभावनीयम्। 'उपलोचने अत्र एवं दृश्यते—

'काव्यस्यात्मा ध्वनिर् इति बुधैः' इति कारिकायाम्। अत्र इति-शब्दस्य शब्द-स्वरूप-परतया व्याख्यानम् अनादृत्य क्रमभेदेन वाक्यार्थ-परामर्शकतया व्याचक्षाणानां लोचनकाराणाम् अयम् अभिसन्धिः—'यदि इति-शब्दः शब्दपरोऽभविष्यद् "ध्वनि-संज्ञितोऽर्थः" इति वृत्तावृ आचार्यो नावक्ष्यद्, ध्वनि-शब्दः काव्यस्यात्मा इत्येवावक्ष्यद्' इति। अनेन ग्रन्थेन ध्वनि-शब्दः काव्यस्यात्मेत्यवचनेन ध्वनि-संज्ञितोऽर्थः काव्यस्यात्मेति वचनेन चात्रेति-शब्दो ध्वनि-शब्दस्य शब्द-परत्वं नाचष्ट इत्यस्मिन् अर्थे पर्य-वसानाद् अत्रेति-शब्दोत्तरो ध्वनि-शब्दः शब्द-परो न भवतीति क्रियाति-पत्ति-द्योतकेन लृङा ज्ञाप्यते। अयम् एवार्थो लोचनकाराणाम् अभिमत इति च कथयन्त्य् उपलोचनकाराः। किन्तु लोचनकाराः 'काव्यस्यात्मा ध्वनिर् इति' इति कारिकाभागं, "बुधैः काव्यतत्त्वविद्भिः काव्य-स्यात्मा ध्वनिसंज्ञितः" इति वृत्ति-भागं च व्याख्याय तत्रानुपपत्ति-प्रदर्शन-पूर्वकं "एवं तु युक्ततरम्— इति-शब्दो भिन्न-क्रमो वाक्यार्थ-परामर्शकः, ध्वनिलक्षणोऽर्थः काव्यस्यात्मेति यः समाम्नातः इति" एवम् अर्थं प्रदर्श्य शब्द-पदार्थकत्वे हि ध्वनिसंज्ञितोऽर्थ इति का सङ्गतिर् इति अनुयुञ्जाना ध्वनि-शब्दा व्यवहितोत्तरस्येति-शब्दस्य तत्रैवावस्थाने ध्वनि-शब्दः शब्द-पर एव स्याद् इत्यभिसन्दधाना दृश्यन्ते। अत एव क्रमभेदश् च तैः स्वीकृतः। पदार्थ-विपर्यासकत्वेनाऽभिमतस्येति-शब्दस्य ध्वनि-पदोत्तरं प्रयोगे, ध्वनि-शब्दस्य शब्दपरतापत्त्या तस्य वाक्योत्तर-समायोजनेन वाक्यरूप-

शब्द-समुदाय-परत्वं कथं निवार्यत इति तु चिन्तनीयम्। व्यक्तिविवेके तु 'काव्यस्यात्मा ध्वनिरिति' इत्यत्र इति-शब्दस्य तावत् प्रक्रम-भेदः। स हि काव्यात्म-पदानन्तरं प्रयोक्तव्यः, 'काव्यस्यात्मेति' इति। अन्यथा ध्वनिनैवास्य सम्बन्धे विज्ञायमाने तस्य सर्वनाम-परामर्शाऽभावे, अभावो भाक्तत्वं वागविषयत्वं च न प्रतीयेत। तस्याभिधानात्मन इतिना व्यवच्छेदाद् अन्यस्य च ध्वनेर् अनुपादानात्।

स ह्य् अभावादि-धर्माधिकरण-भावेन सर्वनाम-परामर्श-योग्योऽवश्यम् उपादेयः। न चोपात्तः। यश् चोपात्तः स तदभिधानानुकार-स्वरूपमात्र-प्रधानो नार्थाभिमुख इति काव्यात्मन एवाऽर्थस्य तदधिकरण-भावो विज्ञायते न ध्वनेः। स हि तत्र संज्ञामात्रम्। यत् स एवाह—'काव्यस्यात्मा ध्वनि-संज्ञित इति' इति।

अस्याऽयम् आशयः—काव्यस्याऽत्मा ध्वनिर् इति पद्ये आत्म-शब्दोत्तरं प्रयोक्तव्यस्येति-शब्दस्य ध्वनिशब्दोत्तरं प्रयोगात् प्रक्रम-भेदः काव्य-दोषः। इतेर् ध्वनिना सम्बन्धे इति-शब्देन व्यवच्छिन्नस्याभिधानात्मनोऽर्थस्य "तस्याभावं जगदुरपरे" "तमन्ये भाक्तमाहुः" "केचित् तदीयं तत्त्वं वाचाम् अविषये स्थितम् ऊचुः" इति तच्छब्दैः परामर्शस्य-वक्तृ तात्पर्याविषयत्वाद् अर्थात्मनश् च ध्वनेर् अनुपस्थानात् तस्येत्यादि-वाक्यानाम् अनन्वितार्थकत्वप्रसङ्गः।

स ध्वनिरूपोऽर्थः। अभावादयोऽर्थाः—अविद्यमानत्वं, भाक्तत्वं, वागविषयत्वं च। तदधिकरणं ध्वन्यमानोऽर्थः। स एव तस्येत्यादिना सर्वनाम-शब्देन परामर्ष्टुं योग्य इति स एवोपादेयः। न तूपात्तः। यस्तूपात्तो ध्वनिशब्दः स चानुकरण-शब्द-स्वरूपम् एवाभिधत्ते। नार्थेनाभिमुख्यं धत्ते इति काव्यात्मन एवाऽर्थस्य सुकवि-प्रयुक्त-शब्द-सन्दर्भात्मनोऽर्थस्य अभावाद्य-धिकरणत्वं ज्ञायते। न तु ध्वनेर् अर्थस्य।

स हि शब्दः य इति-शब्दोत्तरः प्रयुक्तः, स संज्ञापर एव। अत्र ध्वनिकारम् एव प्रमाणयति—यद् इति। स एव ध्वनिकार एव 'काव्यस्यात्मा ध्वनिसंज्ञित' इति।

अत्रेदम् अवधेयम्—संज्ञा हि पदानां प्रवृत्ति-निमित्तम्। तदेवोक्तं काव्यप्रकाशे—'यद्यप्यर्थक्रियाकारितया प्रवृत्ति-निवृत्तियोग्या व्यक्तिर् एव, तथाप्य् आनन्त्याद् व्यभिचाराच् च तदुपाधाव् एव सङ्केतः कर्त्तव्यः। उपाधिश् च द्विविधः

वस्तुधर्मो, यदृच्छा-संनिवेशितश् च। वस्तुधर्मोऽपि द्विविधः सिद्धः साध्यश् च। सिद्धोऽपि द्विविधः—पदार्थस्य प्राणप्रदः, विशेषाधानहेतुश् च। तत्राद्यो जातिः, द्वितीयो गुणः, शुक्लादिना हि लब्ध-सत्ताकं वस्तु विशिष्यते। साध्यः पूर्वापरीभूतावयवः क्रियारूपः। डित्थादि-शब्दानाम् अन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिष्व् अर्थेषूपाधित्वेन संनिवेश्यत इति सोऽयं संज्ञारूपो यदृच्छात्मकः' इति। तद् रेखा-चित्रेणेत्थं दर्शयितुं शक्यते—



उक्तं च—"गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिः" इति। प्रवृत्तिः=प्रवृत्तिनिमित्तम्।

गौः—जाति-प्रवृत्ति-निमित्तकः शब्दः।

शुक्लः—गुण-प्रवृत्ति-निमित्तकः शब्दः।

चलः—क्रिया-प्रवृत्ति-निमित्तकः शब्दः।

डित्थः—संज्ञा-प्रवृत्ति-निमित्तकः शब्दः।

इति प्रवृत्ति-निमित्त-भेदेन भिन्नानि पदानि यत्समानाधिकरणानि प्रयुज्यन्ते, तम् अर्थं बोधयन्ति यथा "शुल्को गौः" इत्य् अस्य शुक्लत्व-गुण-विशिष्टो गौर् इत्यर्थः। "डित्थो गौर्" इत्यस्य डित्थ-संज्ञितो गौर् इत्यर्थः। तथा "ध्वनिर् इति काव्यस्यात्मा" इत्यस्य काव्यस्याऽऽत्मा सारभूतोऽर्थ इति अर्थेन (सारभूतार्थ-बोधकेनात्मशब्देन) सामानाधिकरण्येन निर्देशाद् ध्वनि-शब्दो व्यङ्ग्यम् अर्थम् एव बोधयति। अस्यैवार्थस्याविष्करणात्मकम् इदं "काव्यस्यात्मा ध्वनिसंज्ञितः" इति ध्वनिकार-वचनम्। न तु ध्वनि-शब्दस्य संज्ञा-परत्वावबोधकं भवितुम् अर्हति।

किञ्च, व्युत्पत्ति-भेदाद् ध्वनि-शब्दः, व्यञ्जकं शब्दं व्यञ्जकम् अर्थं व्यञ्जना-व्यापारं, व्यङ्ग्यार्थं, व्यङ्ग्यार्थं-प्रधानं काव्यं च प्रतिपादयितुं समर्थो भवति। ध्वनिशब्देनेतिकरण-युक्तेन तावन्तोऽर्था विशेष्यानुसारेण निर्देष्टुं शक्यन्ते। काव्यस्याऽऽत्मा ध्वनिर् इत्यत्र अर्थस्य विशेष्यतया ध्वन्यत इति व्युत्पत्ति-सिद्धः, ध्वनि-संज्ञावान् अर्थ इत्य् एव बोधो भवति। तद् एव ध्वनिकारेणोक्तं—"काव्यस्यात्मा ध्वनिसंज्ञित" इति। "काव्यविशेषः सः ध्वनिरिति सूरिभिः कथितः" इति काव्य-विशेष-लक्षण-पद्ये च ध्वनि-शब्द इतिकरण-युक्तः, ध्वनति ध्वनयति वा इति व्युत्पत्या निष्पन्नो व्यञ्जकम् अर्थं शब्दं च बोधयति। अतो ध्वनिर् इति काव्यविशेष इत्यत्र काव्य-विशेषस्य सुकवि-प्रयुक्तस्य शब्दविशेष-रूपस्य विशेष्यत्वेन निर्देशाद् यस्मिन् काव्ये व्यञ्जकः शब्दो, व्यञ्जकोऽर्थो वा तम् अर्थं व्यनक्ति, तत् काव्यं ध्वनिसंज्ञितम् इत्यर्थः सम्पद्यते। एवं च काव्य-विशेषो ध्वनिर् इतीत्यनेन काव्यात्मक-शब्द-सन्दर्भस्य ध्वनि-संज्ञा, काव्यस्यात्मा ध्वनिर् इतीत्यनेन व्यङ्ग्यस्याऽर्थस्य च ध्वनि-संज्ञा ध्वनिकारेण सुनिपुणं निरूपिता।

अत उचित एव स्थाने इति-शब्दस्य प्रयोगाद् ध्वनिसंज्ञित इति स्वयं व्याख्यानेन च समुचित-प्रमाण-सिद्धार्थावगम-सम्भवान् महिमोक्तस्य प्रक्रम-भेदस्य दोषस्यावसर एव न विद्यते।

अत्र महिमा मतान्तरम् अनुवदति—अथ काव्यात्मानुवादेन विहितस्य ध्वनेः समाम्नान-क्रियाकर्म-भावावच्छेदेन समुदायाद् अयम् इति-शब्दः प्रयुक्त इत्यर्थप्रधान एवाऽयं ध्वनि-शब्दो न स्वरूप-प्रधान इति तस्य सर्वनाम-परामर्श-योग्यस्याऽभावादि-सम्बन्धो घटत एव।

अयम् आशयः—काव्यस्यात्मा ध्वनिर् इत्येकं वाक्यम्। तदुत्तरम् इति-शब्दः प्रयुक्तः। अत्र काव्यात्मन उद्देश्यत्वं, ध्वनेर् विधेयत्वं च। समाम्नान-क्रिया-कर्मत्वम्। समुदायोत्तरम् इति-शब्दस्य प्रयोगाद् ध्वनि-शब्दोऽयम् अर्थ-प्रधानः, न स्वरूप-प्रधानः। अतस् तस्य ध्वनि-रूपस्याऽर्थस्य सर्वनाम-परामर्श-योग्यस्याऽभावादि-सम्बन्धोऽपि घटते।

तद् दूषयति—"एवं हि वाक्यार्थावच्छेदः प्रतीयते, ततश्च तत्परामर्शिनः सर्वनामपदादेः नपुंसकलिङ्गनिर्देशप्रसङ्गः" इति। वाक्योत्तरम् इति-शब्दयोजने, इति-शब्दस्य पदार्थ-विपर्यासकत्व-स्वाभाव्यात् तस्य वाक्यस्य शब्द-समुदाय-परत्वम् एव स्यात्।

स्वमतम् आह—"तस्माद् आत्म-शब्दानन्तरम् एवायम् इति-शब्दः प्रयोक्तव्यः" इति। तस्माद् इति-शब्दस्य शब्दोत्तरत्वे वाक्योत्तरत्वे च विवक्षितान्वय-बोधाऽभावाद् आत्म-पदोत्तरम् एवेति-शब्दः प्रयोक्तव्य इति महिमाशयः।

इदं तु तत्त्वम्—यो ध्वनि-शब्दोत्तरम् इति-शब्दः ध्वनि-कारेण प्रयुक्तः, स न पदार्थ-विपर्यासकः। वक्तृ-तात्पर्य-विषयीभूतस्यार्थस्य स्फुट-प्रतीतिश् चोपजायते। अत इति-शब्दस्यान्यत्रोपनयनापेक्षैव न प्रसजति इति प्रक्रम-भेद-दोषाविष्करणं कथं सङ्गच्छते। यदि तु इति-शब्दस्यान्यत्रा-योजने विवक्षितार्थान्वय-बोधः सुसम्प्रतिपन्नः स्यात, तदाऽपि वाक्येषु तात्पर्य-सत्त्वे योजनया अन्वय-बोधस्य शास्त्रकार-सम्मतत्वात् काव्यस्याऽऽत्मेति पद्ये ध्वनि-कारेणेति-शब्दो यत्र प्रयुक्तस् तत्रैवावतिष्ठताम्। का नो हानिः।

तथा च काव्यस्य सहृदय-हृदयाऽऽह्लादकस्य शब्द-सन्दर्भस्य आत्मा सारभूतो वाच्यातिशायि-चमत्कृति-जनको योऽर्थः स पूर्वम् एव सूरिभिः समाम्नात इति सङ्गतोऽर्थो वेदितव्यः।

श्रीगौतम-मुनिप्रणीते न्याय-दर्शने प्रथमाध्याये प्रथमाह्निके प्रत्यक्ष-लक्षण-कथनात्मकं "इन्द्रियार्थ-सन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" इति चतुर्थं सूत्रम्। श्रीवात्स्यायनप्रणीते तत्सूत्र-भाष्ये "अव्यपदेश्यत्व-विशेषण-व्यावर्त्य-प्रदर्शनावसरे एवम् उक्तं दृश्यते "यावदर्थं वै नामधेय-शब्दास् तैर् अर्थ-सम्प्रत्ययः, अर्थसम्प्रत्ययाच् च व्यवहारः। तत्रेदम् इन्द्रिय-सन्निकर्षाद् उत्पन्नम् अर्थ-ज्ञानं 'रूपम्' इति वा 'रसः' इत्येवं वा भवति। रूप-रस-शब्दाश् च विषय-नामधेयम्। तेन व्यपदिश्यते ज्ञानं 'रूपम् इति जानीते' 'रस इति जानीते'। अत आह—अव्य-पदेश्यम् इति। यद् इदम् अनुपयुक्ते शब्दार्थ-सम्बन्धेऽर्थ-ज्ञानं न तन्नाम-धेय-शब्देन व्यपदिश्यते। गृहीतेऽपि च शब्दार्थ-सम्बन्धेऽर्थस्यायं शब्दो नामधेयम् इति। यदा तु सोऽर्थो गृह्यते तदा तत् पूर्वस्माद् अर्थज्ञानाद् न विशिष्यते। तदर्थ-विज्ञानं तादृग् एव भवति। तस्य त्व् अर्थ-ज्ञानस्यान्यः समाख्या-शब्दो नास्तीति येन प्रतीयमानं व्यवहाराय कल्पते। न चाप्रतीयमानेन व्यवहारः। तस्माज् ज्ञेयस्यार्थस्य संज्ञा-शब्देनेति-करणयुक्तेन निर्दिश्यते—"रूपमिति ज्ञानं" "रस इति ज्ञानं" इति। तदेवम् अर्थ-भान-काले स न समाख्या-शब्दो व्याप्रियते, व्यवहार-काले तु व्याप्रियते। तस्माद् शाब्दम् अर्थ-ज्ञानम् इन्द्रियार्थ-सन्निकर्षोत्पन्नम् इति।

महामहोपाध्याय-श्रीगङ्गानाथझाशर्मणा प्रणीते खद्योताख्ये भाष्य-व्याख्याने एवम् उक्तं—यावद् अर्थम् इति। अर्था हि सर्वदा सर्वथा सर्वत्र नामधेयेनान्विताः। नास्ति सोऽर्थो यः कश्चिन्नामधेयेन वियुज्यते। तदनेन नामधेय-तादात्म्यम् अर्थानाम्। अर्था हि प्रतीयमाना नामधेयैर् उपेताः तत्सामानाधिकरण्येनाऽवगम्यन्ते—"गौरित्यर्थः" "अश्व इत्यर्थ" इति। तथा चाऽर्थानां नामधेयात्मकत्वात् तद्गोचरम् आलोचनम् अपि नामगोचरम् इत्यर्थवन्नामधेयेन व्यपदिश्यमानं शाब्दं प्रसज्यते।

नैयायिक-चूडामणिरघूत्तम-विरचिते भाष्यचन्द्रेऽप्य् उक्तं– व्यावदर्थं सर्वार्थेषु तादात्म्येन व्याप्ता नामधेय-शब्दा वर्त्तन्त इति शेषः। तैर् हेतुभिर् अर्थ-सम्प्रत्ययः। तैः सह वा। तत्र ज्ञापकम् आह—अर्थ-सम्प्रत्ययाद् इत्यादि रस इति जानीते इत्यन्तम्। रूपम् इति वा रस इति वा इत्यस्याऽयम् अभिप्रायः। इदं ज्ञानं शब्दार्थयोर् अभेदम् अवगाहत इति न ह्य् अत्र भेदः प्रतीयत इति च। रूप-रस-शब्दा रूप-रसादयः शब्दाः 'विषय-नामधेयं विषयाभिन्नं नामधेयम्, इत्यर्थः। तदुक्तं सर्वसिद्धान्तसङ्ग्रहे—

शब्दस्यार्थस्य सम्बन्धस्तादात्म्यं शाब्दिकैर्मतम्।
अतः शब्दात्मकं विश्वं शब्दब्रह्मविदां मते॥ इति।

गृहीत-सङ्केतकोऽपि पुरुषस् तम् अर्थं दृष्ट्वा उद्बुद्ध-संस्कारः संज्ञां स्मरति। ततः परबोधाय तया संज्ञया ज्ञानम् उल्लिखति मम रूपम् इति ज्ञानं जातम् इत्यादि। नैतावतोल्लेखेन शब्दार्थयोर् अभेदः। संज्ञा-शब्दो हि त्रयाणां भवति; स्वस्य, स्वार्थस्य, स्वार्थज्ञानस्येति। तदुक्तं साङ्ख्ये—'घट' इति शब्दः, 'घट' इत्यर्थः, 'घट' इति ज्ञानम् इति, तथा चागृहीत-सङ्केतकस्य संज्ञास्मरणाभावान्नोल्लिखतीति।

अत एवोक्तम् इति-करणयुक्तः संज्ञा-शब्दः यत्सामानाधिकरण्येन प्रयुक्तस् तम् अर्थं बोधयतीति।

राष्ट्रं राष्ट्रियता च

केशवरायमुसलगांवकरः*

साम्प्रतिके युगे राष्ट्रं राष्ट्रियता राष्ट्रिय-भावना चेत्यादयः शब्दाः प्राकृतैर् जनैर् अज्ञान-वशाद् अनुदारतया प्रयुज्यन्ते, येन तेभ्यो विपरीतार्थ-प्रतीतिर् उत्पद्यते।

राष्ट्र-शरीरस्य निर्माणं तद्-घटक-भूतानां भूमि-जनता-संस्कृतीत्यादीनां त्रयाणाम् अङ्गानां परस्परं सम्मेलनेन जायते। राष्ट्र-शरीर-घटक-भूतानाम् एषां त्रयाणाम् अवयवानां सम्मिलितं रूपम् एव राष्ट्रम् इति निगद्यते। अत एषां त्रयाणां ज्ञानं राष्ट्र-स्वरूप-परिचयार्थम् अपेक्षितम् इति प्रस्तूयते।

१. भूमिः—शब्दोऽयम् अनादिकालतः सर्वेषां परिचित एव तावद्। भूमि-शब्देन न रजःकणा मृत्तिका वा गृह्यते, किन्तु ते सर्वे पदार्था गृह्यन्ते ये द्यावापृथिव्योर् अन्तराले विद्यन्ते।

अयम् आशयः—प्रकृति-प्रदत्तानां भू-गर्भे, जले आकाशे च समाविष्टानां सर्वेषां पदार्थानां प्रतीतिर् भूमि-शब्दाद् भवति। अतस् तेषां भौतिकं स्वरूपं सौन्दर्यं च कीदृशम्? उपयोगिता च तेषां कियती? कानि च तानि तत्त्वानि, यानि तत्समृद्धौ सहायकानि भवन्ति? इत्यादयनुयोगानां समाधानं येन भवति, तद् एव राष्ट्रियतायाः वास्तविकं रूपम्। राष्ट्रिय-भावनानां विचाराणां वा जननी भूमिर् अस्ति। इमां जननीं विहाय ये पण्डितम्मन्याः शब्दाडम्बरं प्रदर्श्य जनान् स्वेन वाग्-जालेन निबन्धन्ति, तेषां राष्ट्रियता गगनकुसुमायमानेव विज्ञेया।

२. जनता—यो हि मानवः स्वराष्ट्र-भूमेर् भौतिक-स्वरूप-सौन्दर्येण

---

*एम. ए., साहित्यरत्नम्।

समाकृष्टः सन् स्व-पर-भावनां विस्मरन् तन्मयो भवति चेत् स यत्र तत्र भ्रामं भ्रामं भाषणादिकं कुर्यात् मौनावलम्बनं वा विदध्यात्, अथवा देशस्यान्दोलने सहायको भवेन् न वा भवेत्। कारागारं गच्छेत्, न वा गच्छेत्, नैतत् किम् अप्य् आवश्यकं तस्य कृते। केवलं मनसा वचसा कर्मणा च सर्वदा स्व-जनन्याः कृक्षौ वर्तमानोऽपि यदि मातुर् अखण्डतां वाञ्छति तदा मन्ये स एव वस्तुतो देश-भक्तः। देशस्य कस्मिन्न् अपि भू-भागे लब्ध-जनुषो जना एवं-विधा राष्ट्रस्य द्वितीयम् अङ्गम्। अस्यांगस्य सम्पर्केणैव भूमिर् इयं जननी, मातृ-भूमिर् इति पद-वाच्या भवति। एवं-विधो जन एव वस्तुतस् तस्याः पुत्रः, सा च तस्य माता युज्यते वक्तुम् इति। माता-पुत्रयोर् अकाट्य-स्निग्ध-संबन्ध-ज्ञानेन एष जनः श्रद्धया भक्त्या च विनतो भूत्वा मातृ-चरणयोर् अर्पयति सर्वस्वम्। एतत् सर्वस्वार्पणम् एव मातरं प्रति श्रद्धाया भक्तेश् च द्योतकम् अस्ति। एतद् एव पावनं निःस्वार्थं च कर्म 'निष्काम-कर्मयोग' इति निगद्यते। यो हि स्वार्थ-प्रेरितः सन् मातृ-भूमेः सेवाया दम्भं विधाय यत्र तत्र च मिथ्या-मातृ-भक्तिं प्रदर्श्य लोकान् प्रतारयन् स्वकार्यं साधयति, मन्ये स स्वीयम् असंस्कृतत्वं स्फुटी-करोति।

मातृ-भूमेर् द्वितीयाङ्ग-भूतेषु सत्कुल-लब्ध-जनुःषु जनेषु न कोऽपि श्रेष्ठः कनिष्ठो वा गण्यते। अत्र भेद-व्यवहारस् तु सहोदर-वच्चनैव भवेत्। अतो राष्ट्र-भक्तानां स्वरूपस्य ज्ञानं नितराम् आवश्यकं जनतायाः कृते। तथैव जनतायाः परिस्थितेः सुखदुःखयोश् च ज्ञानं राष्ट्र-भक्तेर् अपि सर्वथा सप्रयत्नं सम्पादनीयम्। जनतायाः सुखं वा दुःखं वा आत्मन एव सुखं दुःखम् इति राष्ट्र-भक्तेर् विज्ञेयम्। जनताया अभ्युदयार्थं सततं प्रयत्ना-नुष्ठानं परमावश्यकम। येन मातृ-भूमेर् अपरम् अङ्गं सुदृढं परिपुष्टं च भवेत्।

३. संस्कृतिः—

संस्कृतिर् नाम राष्ट्रस्य तृतीयम् अङ्गम्। प्रतियुगं सत्यशीलैर् विकसित-चरितैः पुरुषैर् यः कर्मानुष्ठान-प्रपञ्चः तत्पद्धतिर् वा निर्मिता सा संस्कृति-शब्देन प्रोच्यते। यथा एकस्या जनन्याश् चत्वारः पुत्राः सन्तोऽपि ते प्रकृत्या भिन्नत्वाद् विभिन्न-रुचयो भवन्ति। येन कार्यसम्पादन-पद्धताव् अपि वैचित्र्यं जायते तथाऽप्य् आदर्शभूत-साधारण-सिद्धान्तेषु सर्वेषां तेषाम् ऐकमत्यं दृश्यत एव। तथैव मातृ-भूमि-निवासिनां जनानां प्रकृती रुचिः कार्यसम्पादन-पद्धतिश् च यद्यपि भिन्ना, तथाऽप्य्

एकराष्ट्र-निवासितया सर्वेऽप्य् एकस्या एव संस्कृतेः समर्थकाः सन्ति । तेषाम् अनेक तायाम् अपि एकता दरीदृश्यते ।

राष्ट्रस्य निर्दिष्टैर् अङ्गैः सह तादात्म्येन स्वार्थ-शून्यस्य मानवस्य हृदये समुत्पद्यमाना श्रद्धाभावनैव राष्ट्रिय-भावना । स्वार्थ-रहितः श्रद्धालू राष्ट्र-भक्तः स्वकीये श्रद्धास्पदे राष्ट्रे कदापि कम् अप्य् अधिकारं न वाञ्छति राष्ट्र-हितम् एव स्वहितं, राष्ट्र-हानिर् एव स्व-हानिर् इति मतिर् भवति राष्ट्र-भक्तस्य ।

कदाचित् तस्य राष्ट्रिय-श्रद्धा अन्य-प्रकारेणापि स्फुटीभवति । येन परम्परागतायां राष्ट्रिय-भावना-पद्धतौ भिन्नतापि दृष्टिगोचरीभवितुं शक्या भवति । एतावता स राष्ट्रिय-भावनया रहित इति वक्तुं न शक्यते । परिस्थितिवशात् पद्धतौ परिवर्तितायाम् अपि राष्ट्रिय-भावनाऽपरिवर्तितैवै-करूपा भवति । असौ भावना राष्ट्र-सीमा-रक्षणे, सैनिकानां रक्षणे, उत्पद्यमानानां वादानां समाधाने, संशोधने, एकता-स्थापने वा स्फुटीभवति।

राष्ट्र-रक्षार्थम् एकत्रितं धनराशिं परिकल्पितेनोपायेन यथा-समयम् असंप्रेष्य स्वार्थ-साधनार्थं, स्वनाम-प्रचारार्थं वा उपयुङ्क्ते चेद् अवश्यम् एव राष्ट्र-द्रोहो भवति ।

राष्ट्र-हितम् उद्दिश्य यदि कोऽपि परमेश्वरं भजति, यज्ञादिभिर् वा यजते तर्हि तस्य तद् भजनं यजनं वा राष्ट्रिय-भावनया हीनं न्यूनं वा नास्ति ।

राष्ट्र-भक्तो यदा राष्ट्र-हितं साधयितुम् अपमान-जनके हानिप्रदे वा कार्ये प्रवृत्तो भवति, तदा आपाततः स निग्रहस्थान-पतितो लक्षितो भवति, किन्तु तत्प्रवृत्ति-गर्भे देश-हित-भावनैव दृगोचरीभवतीति विचार-विमर्शेन सुस्पष्टं भवति । एवं यैः कैर् अपि देश-भक्तैर् मनसि देश-हित-भावनाम् अङ्गीकृत्य किञ्चित् कार्यं विहितं तत् कार्यं तेषां राष्ट्रियतैव गण्यते ।

सिद्धार्थ-प्रव्रजनम्

विश्वनाथकेशवः छत्रे*

(गताङ्काद् अग्रे)

[स्थलं-राजमार्गः,लम्बोदरः दण्डम् आश्रित्य कष्टेन श्वसन् मंदपदैः प्रविशति । सायं समयः]

लम्बोदरः—अहो ! धिग् औद्धत्यं जनानाम् । धिक् स्वार्थान्धताम्, धिक् च अनवधानतां परपीडा-विषये ! समारोहे समाप्ते, सर्वेषाम् अपि त्वरा गृहं गमनाय । पार्श्वस्थिता अपि पुरतः स्थितान् अतिक्रमितुं प्रयतन्ते । यौवन-सुलभ-मदेनोन्मत्तैः कैश्चिद् युवकैः बहुशः कृते पुरःसरण-प्रयत्ने त्व् अहं विप्रयुक्तो धृतहस्तया वत्सया । हन्त ! जन-संमर्दे सा मां कथं प्राप्नुयात् ! कथम् अहं गृहं गच्छेयम् ! श्रान्तोऽस्मि । आकस्मिकाघातेन भ्रान्तोऽस्मि । अत्र मार्गाद् नातिदूरे वटवृक्ष-मूले तावत् विश्रान्ति-सुखम् अनुभवामि । प्रयते च ततो मां गृहं प्रापयितुम् अनुग्रहीतु-कामं कमपि सज्जनम् अवाप्तुम् । अहो ! सर्वेऽपि गृहासक्त-चित्ताः, नाभिमुखं चलन्ति इदानीम्, प्रायेण श्रान्ताः, विश्रामोत्सुकाः, क्षुधाकुलाश् च । अन्यदा इतस्ततोऽनवलोक्य मार्गम् आक्रमितुं नैव प्रवृत्तिर् जनानाम् । क्रीडास्पर्धा-विषयिणी चर्चा श्रूयते जन-समूहे क्वचिद् उच्चैः क्वचिच् च मन्दम् । वराकी शान्ता मां मृगयमाणा स्यात् चिन्ताकुला । कथं न्व् अहं लभ्यस् तया जन-संमर्दे । (उच्चैः) अपि कोऽपि सदयो मे वृद्धस्य साहाय्यं कुर्यात् ।

(नेपथ्ये)

'वयस्य ! कोऽपि संकट-ग्रस्तः साहाय्यं याचते इति तर्कयामि । गच्छाव पश्याव च तावद् इतस्ततः ।' 'साधुवर्य, अलं परोपकार-व्यसनेन ! सत्वरं गृहं गन्तव्यं, नोचेत् क्रुद्धविमातुर् वाक्शराणां लक्ष्यं भवेव । पश्य, दिनकरे अस्तंगते तमो वेगेन प्रसरति दश-दिशासु । गच्छाव द्रुतम् ।' भगवन् ! इदानीं त्वम् एव शरणं मम । धिङ् मां येन

*वाडा सिद्धेश्वर आली वोगलेकर कल्याण जि० ठाणे ।

भगवन्नाम तावद् विस्मृतम्। पठामि विष्णुसहस्रनामावलिम्। स साक्षी पश्यति माम् असहायम्। भयकृद् भयनाशनः, तेनैव भयम् उत्पादितम्, स एव च तन् नाशयिष्यति। (स्तोत्रं पठति)

विद्याधरः (प्रविश्य) अहो! परिचितः शब्दः श्रूयते। (कर्णं दत्त्वा सावधानं शृणोति) आर्य! विष्णुसहस्रनाम-स्तोत्रं पठ्यते। को नु स्यात् स पाठकः। (स्मर्तुं प्रयतते) लंबोदरस्य शब्दोऽयम्। निःसंशयं स्थविरस्य लम्बोदरस्य। (उच्चैः) भोः! लम्बोदर महाशय! अपि भवान् अत्र स्तोत्रं पठति। (इतस्ततो निरीक्ष्य) कुत्र तिष्ठति तत्र भवान्।

लम्बोदरः—(शब्दम् अभिज्ञाय) कोऽनु भवान्? विद्याधरः! अहं लम्बोदरः, अत्र वटमूले निषण्णो व्यथित आघातेन।

विद्याधरः—(वटमूलम् उपेत्य अभिज्ञाय च) नमो नम आर्य, उच्यतां का व्यथा, किं मया करणीयम् इति।

लम्बोदरः—दिष्ट्या भगवता एव कारुणिकेन प्रेषितो भवान् मत्-साहाय्यार्थम्। प्रथमं तावद् जलम् इष्यते मया; अतीव तृषार्तोऽस्मि।

विद्याधरः—अलं चिन्तया। ददामि सत्वरम्। मम अनुजो मुकुन्दोऽनुसरति माम्। तस्य सन्निधौ वर्तते जलम्। (उच्चैः) रे मुकुन्द! त्वर! त्वर! वटमूले अत्र तिष्ठामि।

मुकुन्दः—(प्रविश्य) अग्रज, अयम् आगतोऽस्मि। किं त्वरा-कारणम्।

विद्याधरः—देहि जलं सत्वरम्। अयम् आर्यः तृषाक्रान्तः। (लम्बोदरो विद्याधरेण समर्पितं जलं पिबति, चेतनां च लभते) सेव्यताम् इदं मोदक-द्वयम् अपि। (ददाति)।

लम्बोदरः—अनुगृहीतोऽस्मि। (सेवते)

विद्याधरः—प्रथमं तावद् उच्यतां भवदीयं व्यथा-कारणम्।

लम्बोदरः—खाद्यपेयाभ्यां, विशेषेण च सुहृदोऽकल्पित-मीलनेन उज्जीवित इवाऽहम्। श्रूयतां संक्षेपेण।

विद्याधरमुकुन्दौ—अवहितौ स्वः।

लम्बोदरः—राज्ञोपवने क्रीडा-स्पर्धां प्रेक्षितुं मयाऽनीता कन्या। निवर्तमानः कैश्चिद् उद्धतैर् युवकैः पार्श्वतो जवेनाऽऽगत्य विप्रयुक्तोऽहं कन्यया

शान्तया। तदाघातेन व्यथितः असहायः स्थितोऽस्मि मुहूर्तम्। वत्सा शांता मां मृगयमाणा स्यात्। अहं वामपादे स्तोकां पीडाम् अनुभवामि। ननु ग्रामान्तराद् आगतौ भवन्तौ।

विद्याधरः—आम् मुकुन्द, समीपम् आनय शकटम् अन्विष्य।

मुकुन्दः—यथादिशति तातः। (निष्क्रान्तः)।

लम्बोदरः—(बर्हशेन प्रकृतिं प्राप्य) अपि कुशलम्। परं भद्र, अपूर्वक्रीडामहोत्सव-प्रेक्षणे त्वया किमर्थं प्रमत्तम्। अपि न रसो विद्यते तस्मिन्।

विद्याधरः—विद्यत एव। पुत्रनामकरणोत्सवं समाप्य समये उपस्थातुं प्रस्थितोऽप्य् अहम् मध्येमार्गं शय्याबद्धः। वृद्धः मातुलो मां स्मरति तीव्रम् इति विज्ञापितोऽहं मार्गं त्यक्त्वा तं दृष्ट्वा, शुभाशिषश् च गृहीत्वा निवृत्तोऽस्मि। ततो विलम्बितं ममाऽऽगमनम्।

लम्बोदरः—नेत्रोत्सवापेक्षया वृद्धेच्छा भवता अधिका मता इति नूनं प्रशस्यम्। विजयोऽस्तु सदा भवतः। मोदके पुत्रनामकरणस्य इति तर्कयामि।

विद्याधरः—आम्। निवेदयतु भवान् तावत् क्रीडास्पर्धाविशेषान्। ईदृशे वयसि दृष्टिर् अविकृता इति विशेषं भागधेयम् अत्रभवतः।

लम्बोदरः—नियत-शीर्षासनस्य फलम् इदम्। 'उदेति पौरुषाद् भाग्यम्' इत्य् अपि न विस्मर्तव्यम्।

विद्याधरः—वर्ण्यतां क्रीडास्पर्धा। समुत्सुकोऽहं तां श्रोतुम्।

लम्बोदरः—गुरुगृहात् कृतविद्यौ गृहम् आगतौ राजपुत्रौ। युवराजस्य विवाहः, सर्वगुणोपेता चारुगात्री च कोलीय-राजकन्या यशोधरा इत्यनया सह महाराज ऐच्छत्।

विद्याधरः—इति श्रुतं मया। यतो द्विमास-पूर्वम् एव कार्यार्थं देशान्तरं गत आसम्।

लम्बोदरः—स्वयंवरं विना तु यशोधरा-पिता तां कस्मै अपि दातुं नास्पृहयत्। परं महाराजेन आयोजितायां प्रतिवार्षिक-क्रीडास्पर्धायां युवराजेन सार्धम् अपरेण राजपुत्रेण देवदत्तेनाऽपि स्वीयं विविध-कलानैपुण्यं

दर्शयितुं निश्चितम् इति ज्ञात्वा तयोर् विजयिनं यशोधरा वरयेद् इति तज्जनकेन दण्डपाणिना उद्घोषितम् ।

विद्याधरः—ततस् ततः ।

लम्बोदरः—द्रौपदी-स्वयंवर-पणस्य मत्स्यभेदस्य इव अधो लम्बमानश् चित्रभेद आयोजितः ।

विद्याधरः—अथ केन जितः स पणः ।

लम्बोदरः—उभाभ्याम् अपि ।

विद्याधरः—कृच्छ्रं खलु समुत्पन्नम् । ततः—

लम्बोदरः—न्याय-नीति-तर्कादि-शास्त्रेष्व् अश्वारोहण-रथवाह-मल्लादिविद्यासु च स्पर्धमानयोः तयोः सिद्धार्थः प्रथमांकं लब्धवान् देवदत्तश् च द्वितीयम् ।

विद्याधरः— अथ कं ववार यशोधरा ।

लम्बोदरः—युवराज-सिद्धार्थम् ।

विद्याधरः—साधु ! साधु ! विजयतां स चिराय ।

मुकुन्दः—(प्रविश्य) तात ! आर्य ! आनीतः शकटः । आर्या शान्ता..... ।

लम्बोदरः—सैव इदानी चिन्ता-विषयः ।

मुकुन्दः—दिष्ट्या सापि लब्धा, अनीता च शकटे, रक्षिता कृषीवलेन भवदन्वेषणार्थं परिभ्रमन्ती ।

लम्बोदरः—(प्रणम्य) भगवन् ! अतर्क्या खलु ते लीला भक्तवत्सलस्य । आपद इव भाग्यक्षणा अपि न एकाकिनः प्रायश उपतिष्ठन्ते ।

विद्याधरः—गच्छाम शकटम् । करोमि भवतः साहाय्यं गमने ।

लम्बोदरः—कल्याणं वां करोतु नित्यं सच्छीलयोः परमकारुणिको भगवान् श्रीहरिः ।

[सर्वे निष्क्रान्ताः]

[पौरन्याय-सभा । पौर-न्यायाधिपः कार्यवाहः महाजनाः
सिद्धार्थः देवदत्तश् च स्वे स्वे आसने उपविष्टाः]

कार्यवाहः—मान्यवर न्यायाधिप महाजनाश् च, अद्य राजपुत्रेण (अंगुलि-निर्देशं विधाय) देवदत्तेन, शाक्य-सिद्धार्थ-युवराज्ञ-विरुद्धं कश्चिद् अपूर्वः प्रश्न उपस्थापितो न्याय-सभायाम्। द्वाव् अपि तावृ अत्रोपस्थितौ। निवेदयतु देवदत्तः स्वप्रश्नम्।

देवदत्तः—(उत्थाय, प्रणम्य च) भो न्यायाधीश महाजनाश् च, ह्यः प्रातर् आरामोद्याने जलाशयोपरि उड्डीयमानेषु पारावतेषु कश्चिन् मया विद्धः शरेण दूरात्। स ह्य् अधो मृतवत् पतितो दृष्टो युवराजेन उज्जीवितश् च जल-पायन-लालनादिभिः स्निग्धक्रियाभिः। मृगया-नियमानुसारं स पारावतो मदीय इत्य् अर्थितः सिद्धार्थात्, परं तेन न्यक्कृतो मदीयाधिकारस् तस्मिन् प्राणिनि केवलेन तज्जीवनकारणेन। अतो न्यायसभयोचितो न्यायः कार्य इति प्रार्थये।

न्यायाधिपः—युवराजः सिद्धार्थः करोत्व् आत्मनिवेदनम् अस्मिन् विषये।

सिद्धार्थः—(उत्थाय प्रणम्य च) देवदत्तेन शरेण विद्धः स दीनः परावतो ममाऽग्रतः पतितः। तं मरणोन्मुखं दृष्ट्वा व्यथितान्तःकरणेन मया शरः तद्-अङ्गाद् उद्धृतः, खगः जलं नीत्वा प्रक्षालितः, पयः पाययित्वा च उज्जीवितः प्रयत्नैः। दिष्ट्या मृत्यु-पाशान् मोचितः स मदीय एव इति मन्ये। देवदत्तः तं मारयित्वा भक्षितुम् ऐच्छत्। प्रयत्नैर् उज्जीवितं प्राणिनं हत्यायै देवदत्ताय समर्पयितुं मानवता-विरुद्धम् अभविष्यत्। अतो मया न्यक्-कृता तदर्थना। शरेण विद्धः स खगो यद्य अमरिष्यद् देवदत्तस्य अभविष्यत् मृगयानुसारम् इति वाद-भूतविषयस्य महत्त्वपूर्णः पक्षो न उपेक्षितव्य इति प्रार्थये।

न्यायाधिपः—देवदत्त, किं वक्तुकामो भवान् इदानीम्।

देवदत्तः—मया विद्धः खगो मृतो वा सजीवो वा, मदीय एव मृगया-नियमानुसारम्। न तस्मिन् अधिकारः कस्याऽप्य् अपरस्य इति प्रति-पादयामि। (स्वगतम्) द्विवारं मया सोढं पराजय-दुःखं क्रीडा-

स्पर्धायां स्वयंवरे च। इदानीं तद् अनुभवतु मम प्रतिस्पर्धी जितपणम् माम् अवमानितवत्या यशोधरया सह।

न्यायाधिपः—महाजना विमृश्य स्वाभिप्रायं कथयन्तु निःसंकोचम्। प्रतिवादिनो युवराजत्वं त्व् अत्र नैव विचारणीयम्। (महाजना विमृशन्ति परस्परम्)।

महाजनप्रमुखः—आर्त-मूक-प्राणिन उज्जीवनेन संभाव्यहत्यायाः रक्षणेन च सिद्धार्थेन मानवता-दृष्ट्या यथोचितम् एव आचरितम् इत्य् अस्माकं मतम्।

न्यायाधिपः—देवदत्त! महाजनैः प्रकटीकृतोऽभिप्रायो योग्यो न्यायानुसारश् चेति मे मतम्।

कार्यवाहः—न्यायसभा-कार्यम् अद्य समाप्तिं गत इति उद्घोषयामि।

देवदत्तः—(जनांतिकम्) अहो दैवदुर्विलासः! इदानीम् अपि पराजय-दुःखं सममेव। 'दुःखं दुःखानुबन्धि' इति लोकप्रवादः खलु सत्यः।

इति द्वितीयोऽङ्कः

अथ तृतीयोऽङ्कः

[राजमन्दिरे शुद्धोदनः सुखोपविष्टः]

शुद्धो०—'अतर्क्या खलु लीला कालरूपिणः परमेश्वरस्य'। प्रियायाः आकस्मिक-निधनस्यापह्नवं दुःखं येनोत्पादितं तेनैव तत् कालान्तरेण इदानीं सुखहं कृतम्। दिष्ट्या वत्सः सिद्धार्थो राजोचित-सर्व-विद्यानैपुण्येन सार्धम् अनुपम-लावण्य-युक्तम् अग्रगण्यं स्त्रीरत्नं भार्यात्वेन संप्राप्य स्वनाम नयतीव अन्वर्थकत्वं निसर्ग-मधुर-दुग्धशर्करायोग इव पुत्रलक्षणशालिनी सा वधूः यशोधरा आसन्न-प्रसवा तिष्ठति। इदानींतनं मे निरतिशयं सुखं माम् अनुक्षणं शङ्कयति यद् अहं स्वापावस्थायां वा जागरितावस्थायां वा तिष्ठामीति। भवत्व् अयं स्वप्नो वा जागरो वा, भगवन्, माऽयं क्षयं यातु।

प्रतीहारी—(प्रविश्य प्रणम्य च)–आयुष्मान् वत्सः सिद्धार्थः तातदर्शनम् इच्छति।

शुद्धोदनः—प्रवेशय वत्सम्।

प्रतिहारी—यथाज्ञापयति देवः। (निष्क्रांता)।

सिद्धार्थः—(प्रविश्य) तात! अभिवादये।

शुद्धो०--आयुष्मान् भव। वत्स! का वार्ता।

सिद्धार्थः--राज-भवने सर्वविधैश्वर्येषु रममाणोऽपि नित्य-नव-मधुर-फलैः पुष्यन्तं सुवर्णपञ्जरबद्धं शुकम् इव मन्ये आत्मानम्।

शुद्धो०--अथ किम् इच्छति।

सिद्धार्थः—बहीराजभवनं कृतवेषान्तरः सामान्य-नागरिक इव भ्रमितुकामोऽहं स्वच्छन्दम्।

शुद्धो०--(स्वगतम्) अनुचितः खलु निर्मर्यादो निर्बन्धः। अतितानितः तन्तुश् छिद्यत एव। (प्रकाशम्) तथास्तु। परं रक्षकानुयातो गच्छ।

सिद्धार्थः--छन्नो माम् अनुयास्यति।

शुद्धो०--बाढम्।

सिद्धार्थः—अथ आपृच्छे तातपादान् (निष्क्रान्तः)।

शुद्धो०--कः कोऽत्र भोः।

प्रतीहारी--(प्रविश्य)-का आज्ञा देवस्य।

शुद्धो०—मुख्यामात्य आहूयताम्।

प्रतीहारी—यथाज्ञापयति देवः (निष्क्रान्ता)।

राजवर्मा—(प्रविश्य) आज्ञापयतु महाराजः।

शुद्धो०—मुख्यामात्य! वत्सः सिद्धार्थो राजभवनाद् बहिर् वेषान्तरितः सामान्य-नागरिक इव भ्रमितुकामः; वेषान्तरितेन छन्नेन सह राजधान्याम्। अतो भ्रमतस् तस्य दृष्टिपथं यथा वैराग्योत्पादकं किम् अपि दृश्यं नागच्छति तथा क्रियताम्।

राजवर्मा—अभिज्ञातो हेतुर् महाराजस्य। तथा अनुतिष्ठामि।

[प्रणम्य निष्क्रान्तः]

शुद्धो०—ममापि पुराणश्रवण-समयः प्राप्तः। गच्छामि [निष्क्रान्तः]।

[ततः प्रविशतो वेषान्तरितौ सिद्धार्थच्छन्नौ]

सिद्धार्थः—(शिखरिणी)

स्वतन्त्रास्ते धन्याः खलु गगनसंचारिविहगाः,
तथा धन्या मीना अपि जलविहार-प्रणयिनः ।
सुखं स्वातन्त्र्यस्य त्वमृतमधुरं चाप्रतिहतम्,
इदानीं भुञ्जानः पुनरनुभवामीव जननम् ॥

वयस्य, अवर्णनीयं खल्विदं स्वातंत्र्य-सौख्यम् । नित्यं महार्ह-वस्त्राणि परिदधानः, परिजनैर् अनुगम्यमानः, दृष्ट-मानश् च सेवकैर् वन्द्यमानः अयं सिद्धार्थः, इदानीं राजमार्गे केनापि अनभिज्ञातः स्वच्छन्दं भ्रमन्, पञ्जरमुक्तं शुकम् इव मन्यते आत्मानम् ।

छन्नः—आयुष्मन्, सत्य एव भवतोऽभिप्रायः ।

सिद्धार्थः—पश्य तावत् संमुखम् अभिसर्पन्तीं ताम् अनावृतार्धदेहाम् अपि प्रसन्नवदनां गोपीम् । न तस्माद् धनैश्वर्यम् एव सुख-कारणम् इति दृश्यते ।

छन्नः—यथार्थो युवराजस्य तर्कः ।

सिद्धार्थः—अवलोकय तावद् एनां शाकवाहिनीं नारीम् । सान्द्रकज्जल-वर्णमुखम् अपि स्वं बालकं सा निर्भरं चुम्बति । अतः केवलो बाह्य-वर्ण एव न प्राणिनः सुखस्य हेतुः ।

छन्नः—सुखस्य मूलं त्व् आत्मैव जीवस्य इति प्रतिपाद्यते सततं पुराण-कीर्तनेषु । [गगने विमानस्थः शक्रः—'अयं तु योग्यः खलु समयो वैराग्योत्पादकानि संसारस्य विविध-दृश्यानि दर्शयितुं राज-पुत्राय । यावत् तप्तम् अयः-पात्रं तावदेव पोलिका भर्जितव्या । रचयामि तथा-विधानि दृश्यानि मायाबलात् "]

सिद्धार्थः—पश्य पश्यैनम् अग्रत आयान्तं भेसुराकृतिं पुरुषम् । अस्थिचर्म-मात्रावशिष्टः कम्पमान-कन्धरः सितकेशः यष्टि-निविष्ट-हस्तश् चाऽसौ महता कष्टेन पदन्यासं करोति । अपीयं तस्य वपुषो विकृतिर् वा प्रकृतिर् वा ।

छन्नः—आर्यपुत्र विकृतिर् एव । आवाम् इव सोऽपि पुष्टाङ्ग उन्नतकन्ध-रोऽसितकेशः सामर्थ्य-सम्पन्नश् चाऽऽसीत् ।

सिद्धार्थः—किं कारणम् तत्र विकृतेः।

छन्नः—जरा !

सिद्धार्थः—कीदृशी सा।

छन्नः—श्रूयताम्।

रूपस्य हन्त्री व्यसनं बलस्य
शोकस्य योनिर्निधनं रतीनाम्।
नाशः स्मृतीनां रिपुरिन्द्रियाणां
सैषा जरा नाम ययैष भग्नः॥

सिद्धार्थः—(विचिन्त्य) अपि माम् अपि सा ईदृशीं विकृतिं नेष्यति।

छन्नः—अवश्यम्। न केवलम् आयुष्मन्तम्, माम् अपि। प्रत्येकं मानवस् तदभिभव-भाजनं भवति कालानुसारेण।

सिद्धार्थः—इदं तु गम्भीरं चिन्तनीयं भवति। भ्रमति मम मस्तकम्। वृक्षमूले अत्र तावद् उपविशाव।

छन्नः—अपि किम् अपि खाद्यं वा पेयम् वा इष्यते।

सिद्धार्थः—मनस्य् अस्वस्थे किं खाद्येन किंवा पेयेन। हरितमृदु-तृणांकुरेषु आकुञ्चित-बाहूपधाने शिरो निधाय मुहूर्तमात्रं विश्राम-सुखम् अनुभवामि।

छन्नः—स्वेच्छानुसारं करोत्व् आर्यपुत्रः। (सिद्धार्थः विश्राम्यति, छन्नः उत्तरीयेण तं वीजयति)। (स्वगतम्) अनवधानेन मया राजाज्ञा-विरुद्धं जरा-दुःखं विवर्णितम् आर्यपुत्राय। दिष्ट्या जलाशयो दृश्यते समीपम्। ततो वस्त्राञ्चलम् आर्द्रीकृत्य प्रोक्षामि जलम् आयुष्मतः शिरसि।

(तथा नाटयति, सिद्धार्थो नयने उन्मीलयति)

छन्नः—आर्यपुत्र ! अपि स्वास्थ्यम्।

सिद्धार्थः—आम् शीतल-सुगंधि-वायुना जलसेकेन च मनोभ्रमणं उपशमितम्। (मधुरस्वरालापान् श्रुत्वा) वयस्य ! कियान् मधुरः स कण्ठः ! श्रुणवाव तावद् इदं गानम्। अहो ! दुग्ध-शर्करा-संयोगवद् अर्थपूर्णम् अपि।

नेपथ्ये

(रागः—दरबारी कानडा; 'वंध विमोचनराम' वत्)

तर तर भवसिन्धौ, मनुज ! रे ! ॥ध्रु०॥

नृ-देह-नौका, यावदभिन्ना, कार्यसमर्था रे ॥१॥

सुदुर्लभेयं, पुण्यराशिना, क्रीता शुभदा रे ॥२॥

जरा-रोग-मृति-वात्या, भयदा, अवधेहि ततो रे ॥३॥

भार्या-सुत-धन-सत्ता-मोहात् माऽन्धत्वं भज रे ॥४॥

आत्माऽस्यमरो नैव नैव जड-नश्वरवपुरसि रे ॥५॥

तमभिज्ञातुं ध्यानपरो वद 'गोविन्द, मुरारे' ॥६॥

छन्न ! अपि रोगो मृतिश् च जरेव विकृतिद्वयं देहे उत्पाद्यमानं कालवशात् ।

छन्नः—(स्वगतम्) यद् नृप-निदेशाद् गोपायनीयं तद् एव दुर्दैव-वशाद् वर्णनीयं भवति । अलीक-भाषणं तु जिह्वा-स्वभाव-विरुद्धं, पुनश् च असत्यकारि । किं करोमि ।

सिद्धार्थः—किं ते चिन्ता-कारणम् । पश्य, पश्य तावत् । कोऽन्व् असौ मध्याह्ने ग्रीष्मतौ शासत्य् अपि ऊर्णवस्त्रावृतकायः स्त्रिया बालक इव हस्तेन चाल्यते ।

छन्नः—(स्वगतम्) दिष्ट्या मुक्तोऽस्मि ! (प्रकाशम्) आर्यपुत्र स पुरुषः प्रायः शीत-ज्वरादिरोगार्तो विनाधारं चलितुम् असमर्थः पत्न्या नीयते हस्तेन ।

सिद्धार्थः—अथ, अपि ममाऽपि रोगभयम् ।

छन्नः—युवराज ! न कोऽपि मानवो रोगभयाद् मुक्तः ।

सिद्धार्थः—अथ कीदृशोऽसौ रोगः ।

छन्नः—

पानाशखेलेष्वरुचिश् च निद्रा-
नाशः परालम्बनता तनोश् च ।
उत्साहभङ्गश्च सदावमान
इत्यादिकोत्पादक एव रोगः ॥

सिद्धार्थः—वयस्क; आश्चर्यं खलु यत्—

इदं च रोगव्यसनं प्रजानां
पश्यंश्च विश्राममुपैति लोकः।
विस्तीर्णविज्ञानमहो! नराणां
हसन्ति ये रोगभयैरमुक्ताः॥

छन्नः—चिरं भ्रमितम् आवाभ्याम्। अतो गच्छाव इदानीं भवनम्।

सिद्धार्थः—तथास्तु। परम्—

छन्नः—किं परम्?

सिद्धार्थः—चतुर्भिः पुरुषैः स्कन्धेन नीयमानं शुभ्रवस्त्र-रक्त-पुष्पावृतं प्रावृत-हस्त-चरणं निबद्धं किम् अस्ति। अग्रे घृताग्निकुम्भः कोऽप्य् अधोमुखः चलति।

दश-पंचदशा जनाश् च पार्श्वतो गच्छन्ति। सर्वेऽप्य् अनावृत-मस्तका मूकोपमा विषण्ण-वदनाश् च।

छन्नः—(स्वगतम्) इदानीम् अपरिहार्यं मृत्यु-वर्णनम्। (प्रकाशम्) एभिर् मृत-पुरुषो नीयते श्मशानम्।

सिद्धार्थः—तत्र किं ते करिष्यन्ति तस्य।

छन्नः—काष्ठमय-चितां विरचय तदुपरि तं निधाय तां ते प्रज्वालयिष्यन्ति।

सिद्धार्थः—अहह! वयस्क, अप्य् अनेन मार्गेण अहम् अपि नीतोऽग्निसात् च कृतो भविष्यामि।

छन्नः—आर्यपुत्र, न कोऽपि मानवोऽस्माद् मरणाद् मुक्तः।

अकिंचनो वा नृपतीश्वरो वा मूढातिमूढो विदुषां वरो वा।
साधुः खलो विप्रवरोऽन्त्यजो वा नारी, नरो, मृत्युवशोऽस्ति सर्वः॥

सिद्धार्थः—वयस्य! एता अदृष्टपूर्वा दैहिक-विकृतयो नेत्रे उन्मील्य मां चोदयन्तीव संसार-निवृत्तये। जरा, रोगः मृत्युः! जरा रोगः; मृत्युः! ध्रुवा मानवस्य, ध्रुवाः सिद्धार्थस्य।

छन्नः—आयुष्मन्, निवृत्ति-योग्यः कालस् तु सुदूर एव। वत्सः रोहिलस त्व् अर्भकः। स पितृच्छत्रं दीर्घ-कालम् अपेक्षते। गच्छाव राज-भवनं सत्वरम्। परिक्रीत-रथेन गच्छावः। समीपस्थे चत्वरे प्राप्स्याव रथम्।

सिद्धार्थः—जरा रोगः मृत्युः, ध्रुवाः मानवस्य। ध्रुवाः सिद्धार्थस्य।

छन्नः—(स्वगतम्)

सुमंदहास्यं प्रथमार्भकस्य
प्रेमार्द्रदृग् वाक् स्मितमङ्गनायाः।
मतिभ्रमं यस्य हरन्ति न द्राग्
योगी पशुर्वा युवकः स नान्यः॥

चलतु आयुष्मान्।

(हस्तेन गृहीत्वा निष्क्रान्तः)

[यशोधरा रुदन्तं राहुलं लालयित्वा प्रयतते सान्त्वयितुम्]

यशो०—वत्स शान्तिम् उपेहि, शान्तिम् उपेहि। अपि तात-मुख-दर्शनातुरत्वाद् रोदिषि। अचिराद् एव स आगच्छति, त्वां च लालयति। तावद् गीतं शृणु। (बालकार्थं दोलागीतम् गायति)।

वत्स, वरय निद्रां, वर-निद्रां, सुखदां बलदां शिवदाम् ॥ध्रु०॥
अस्तं याति रविः, पश्येमां; तदारक्त-वरशोभाम् ॥१॥
उदितोऽपि शशांकः, मनोहरः, दिनकरकृततापहरः ॥२॥
तव हस्ते दास्ये, तं शशिनं, वत्स विलपनेनाऽलम् ॥३॥
अम्बरमिव तारा, आकाशं, समलंकुर्युः शीघ्रम् ॥४॥
स्वं स्वं नीडमिमं, पक्षिगणं, पश्य चलन्तं शीघ्रम् ॥५॥
रवितेजसि लुप्ते, तम उदितं, पश्योद्दीपितदीपम् ॥६॥
दास्ये क्रीडनकं, रुचिरमहं, नित्यं च नवं तुभ्यम् ॥७॥
नचिरादागच्छेत्, तव तातः तावद् भव रे शान्तः ॥८॥

प्रतीहारी—(प्रविश्य) आर्यपुत्र आगच्छति।

यशो०—आगच्छतु सत्वरम् एव। तदर्थं रोदिति वत्सः। (प्रतीहारी निष्क्रान्ता)

सिद्धार्थः (प्रविश्य)—

जरा-मृत्यु-रोगा ध्रुवा मानवस्य
ध्रुवा राजपुत्रस्य मे चापि नूनम्।
अकस्माद् यतोऽतिक्रमन्ते नरं ते
मयात्माऽवगन्तव्य आशु प्रयत्नैः ॥१७॥

सिद्धार्थः—जरा मृत्युः रोगः, ध्रुवा मानवस्य ध्रुवाः सिद्धार्थस्य। (सुखासने उपविश्य नेत्रे निमीलयति)।

यशो०—नाथ, कुतोऽयं चित्तविक्षेपः ? कुतोऽयं मनोभ्रमः। आर्य कुलदेवते ! पाह्य् अस्मान् सदय-दृष्ट्या। प्रकृतिं प्रत्यागच्छतु नाथः सत्वरम्। [सिद्धार्थम् उपेत्य कराग्रेण च भालप्रदेशं स्पृष्ट्वा] अपि बाधते शिरोवेदना। ज्वरस्तु न प्रतीयते। हला मंगले ! (मंगला प्रविशति)।

मंगला—किम् आज्ञापयति देवी।

यशो० – शीतपेयम् आनय सत्वरम्।

मंगला—यथाज्ञापयति देवी। (निष्क्रान्ता)

यशो०—(व्यजनेन वीजयन्ती) नाथ ! उच्यताम्। (राहुल आक्रन्दति) अयि ! वत्सः लालने समातुरः पितुः सकाशात् (पतिमुखं मृदुकरेण सस्नेहं परामृज्य) नाथ ! उन्मील्यतां नयने, अवलोक्यतां च सकृदेव स्नेह-दृष्ट्या इयं प्रिया यथापूर्वम्। (मंगला पेयं स्वामिन्या हस्ते दत्त्वा निष्क्रान्ता) इदं मधुरं शीतपेयं सेव्यतां स्तोकं स्तोकम् (ओष्ठ-लग्नं करोति)।

सिद्धार्थः—(दृष्टिम् उन्मील्य) देवि, पिबामि तावत् त्वया सादरम् आनीतं पयः। (पानम् आरभते) परं न माम् इमे बाह्योपचारा इदानीं परितोषयन्ति।

यशो०—अपि किम् अपि भयदं दृष्टि-पथम् आगतं नगर-भ्रमणे।

सिद्धार्थः—आम्। न केवलं दृष्टि-पथम् आगतं, परं तेन दृश्य-जातेन मे दृष्टिर् यथार्थत उन्मीलितापि मायामोह-समावृता।

यशो०—(राहुलं पालकाद् आनीय पुरस्कृत्य) अवलोकयतु नाथ एनं स्नेहेन, गृहीत्वा लालयतु च क्षणमात्रम् ।

सिद्धार्थः—यशोधरे, मां त्वाम् एनं वत्सं च कवलयितुं समातुरेषु जरामरण-रोगेषु पुरतो दृश्यमानेषु का स्नेहवार्ता ? का लालन-वार्ता ? (गृह्णाति वत्सं परं निःस्नेहम्)

यशो०—शान्तं पापम् ! शान्तं पापम् ! (कर्णौ पिधाय) जगदम्ब ! त्वम् एव शरणम् अधुना । पाहि नः करुणार्द्र-दृष्ट्या । (अन्तर्गृहं गत्वा कुदृष्टि-पीडत-निवारणाय लवणं सर्षपं च हस्ते आनीय हस्तयोर् भर्तुः संमुखे ततश् च राहुलस्य संमुखे वर्तुलाकार-हस्तौ मंदमंत्रोच्चारेण सह भ्रमयित्वा, गृहाभ्यंतरे च गत्वाग्नौ क्षिपति समाकृष्ट-दृष्टि-दोषं तत् साहित्यम्) ।

सिद्धार्थः—गृहाण इमम् वत्सम् यशोधरे, गृहाण, इमम् । सावधानम् ! सावधानम् ! सावधानम् ! इति विवाह-समये पुरोहितेन भूय उच्चारितस्य शब्दस्याऽर्थोऽद्यैव मम धिया याथार्थ्येन अभिज्ञातः ।

यशो०—(राहुलं गृहीत्वा उत्संगे निधाय सान्त्वयन्ती) नाथ ! स्पष्टम् उच्यताम् ।

सिद्धार्थः—शृणु तावत् । मया जराजर्जरितो रुग्णो मृतश् चाऽद्य साक्षात्कृताः प्रथमम् एव । ते मां तीक्ष्णं भीषयित्वा प्रेरयन्ति संसार-त्यागाय प्रव्रजनायाऽऽत्म-बोधाय च सत्वरम्-सत्वरम् । (निद्रालुर् भवति)

यशो०—(कर्णौ पिधाय) अहह ! दुर्विधे ! किम् अभद्रं त्वया मम ललाटे लिखितं, न जाने । मंगले, हला, मंगले ।

मंगला—(प्रविश्य) आज्ञापयतु देवी ।

यशो०—श्वशुर-पादान् विज्ञापय यद् आर्यपुत्रस्य मनोऽस्वस्थं संवृत्तम् । अतः तेषाम् अत्रागमनं प्रार्थ्यते शीघ्रं स्नुषयेति ।

मंगला—यथादिशति स्वामिनी (निष्क्रान्ता) ।

यशो०—दृश्यतां तावत् । समयज्ञ इव वत्सः तूष्णींभूतः । (तं पालके निधाय दोलां चालयति, मंदं मंदं गायति च निद्रा-गीतम्) ।

मंगला—(प्रविश्य) तातपादा द्वारं प्राप्ताः।

यशो०—प्रवशेय शीघ्रं सादरं च।

(निष्क्रान्ता)

[ततः प्रविशति शुद्धोदनः। यशोधरा तस्य पादयोः शिरो निदधाति]

शुद्धो०—वत्से ते सर्वतः सौभाग्यम् अस्तु।

यशो०—ईदृश आशीर्वादः सर्वदैव समर्प्यते गुरुजनैः। परम् इदानीं तस्य सफलता शंकास्पदतां गतेति भयं समुत्पन्नम्।

शुद्धो०—जाते, अलं भयेन। कृतं शङ्कया। विदितं मया छन्नमुखाद् वत्सस्य मनसोऽस्वास्थ्यं समुत्पादितं वैराग्योत्पादकैर् अदृष्टपूर्वैर् जरामरणरोगादिभिर् भीषणदृश्यैः।

सिद्धार्थः—(प्रबुध्य) अयि! तातपादाः!

(उत्थाय पादयोः पतति)

शुद्धो०—वत्स, आयुष्मान् भव।

सिद्धार्थः—अनुगृहीतोऽस्मि खल्व् अद्य अनेनाऽऽशीर्वादेन।

शुद्धो०—कोऽभिप्रायो वत्सस्य।

सिद्धार्थः—परिव्राजकेन मया विनायुष्मत्ताम् आत्मावबोधोऽशक्यप्राय एव।

शुद्धो०—वत्स, अपि इदानीं ते यौवनभरे प्रव्रजनवार्ता न आकालिकी। धर्म-शास्त्रेण आदिष्टम् आश्रम-क्रमं जानास्य् एव। आदौ गृहस्थाश्रमस्य सम्यगाचरणम्। पुत्रेण स्वीकृते प्रपंचभारे, स्नुषायां गृहं प्रविष्टायां, नप्तृ-मुखदर्शनोत्तरं वानप्रस्थाश्रमः, ततश्च संन्यास इत्येव युक्तम्।

सिद्धार्थः—परं तात, 'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' इत्यपि धर्माऽऽज्ञा।

शुद्धो०—वत्स त्वयि यद् वैराग्यम् अद्य समुदितं तत् तात्कालिकम् एव। क्षणजीवि तत्। रात्रौ नृत्यांगनानां नृत्यगायनादि-समारोहम् आयोजयिष्यामि। तद्-दर्शन-श्रवणेनेदं वैराग्यं विलीयेत, हिमं यथा सूर्योदयेन।

यशोधरा—तातपादैः सम्यग् विचारितम् । वत्सो राहुलोऽवश्यम् उपस्थास्यति तं समारोहं मातापितृभ्यां सह ।

सिद्धार्थः—उपस्थास्यामि । परम् ।

शुद्धोदनः—अलं शङ्कया । जानास्य् एव यद् वैराग्योत्पादक-घटनाभिः प्रभाविता झटिति गृहीत-संन्यासाश् च बहवोऽविवेकिनः गृह-त्यागानन्तरं पश्चात्ताप-दग्धा जीवितविफलतां गताः । वराका वञ्चिता उभाभ्याम् अपि संसार-सुखाद् आत्म-दर्शनाच् च ।

यशो०—दिष्ट्या प्राप्तं राजैश्वर्यं संसारसुखं च भोक्तव्यं परमेशस्मरण-पूर्वकं सद्वर्तनेन इत्येव इदानीं श्रेयस्करम् ।

शुद्धो०—पश्य, कियती सुज्ञा समेयं स्नुषेति ।

जाते, समाश्वसिहि । सर्वम् अपि ते मंगलं भविष्यति । अलं चिन्तया । (प्रेक्षकान् उद्दिश्य) भोः सज्जनाः, पश्यत तावत्, चिन्ताव्याकुलोऽप्य् अहम् 'अलं चिन्तयेति' उपदिशामि इमां मयि विस्रब्धाम् । हन्त ! इतीदृशः कैतवावगुंठितः शिष्टाचारः । (निष्क्रान्तः) ।

यशो०—अनुगृहीतास्मि (जवनिकापातः) ।

[ततः प्रविशतः सिद्धार्थश् च छन्नश् च]

छन्नः—मा मा एवं मां कृच्छ्रे पातयतु युवराजः ।

सिद्धार्थः—अपि वयस्येन वयस्यस्य साहाय्यं न कर्तव्यम् ।

छन्नः—अवश्यम् एव कर्तव्यं परं शुभकर्मणि ।

सिद्धार्थः—अपि मम जन्म-मृत्यु-दुःख-हर आत्मावबोध-प्रयत्नोऽशुभं नाम कर्म ।

छन्नः—सफलं चेत् तत् शुभं कर्म स्यात् ।

सिद्धार्थः—अप्य् अद्यावध्य् असफलीभूतोऽवलोकितम् त्वया निश्चयः सिद्धार्थस्य ।

छन्नः—न मे तथाभिप्रायः । अतीवाकालिकं स्यात् भवदीयं प्रव्रजनम् । तच् च न केवलं सवत्सां देवीं यशोधरां राजानं च शोक-महोदधौ पातयेत्, अपि तु सकलां भवत्य् अनुरक्तां प्रजाम् अपि ।

(क्रमशः)

उपनिषत्सु भेदाऽभेदोपासना

पशुपतिझाः*

सर्वप्रथमम् उपनिषत्-स्वरूपं प्रतिपाद्य तदनन्तरं तासूपनिषत्सु समागताया भेदोपासनाया अभेदोपासनायाश् च विषये यथामति विवेचनं करिष्यते।

अखिलकोटि-ब्रह्माण्डनायकस्य प्रत्यक्-चैतन्याभिन्नस्य परब्रह्म-परमात्मनः प्रापयित्रीं व्यञ्जयित्री वा निःसन्धि-बन्धनात्मिकायाश् चिज्-जड-ग्रन्थिस्वरूपाया अविद्यायाः शैथिल्य-कारिणी, अविचारित-रमणीय-नाम-रूप-क्रियात्मक-मायामय-विश्व-प्रपञ्चे समूलम् उन्मूल्य जीव-ब्रह्मणोः साम्यं बोधयन्ती ब्रह्मविद्येवोपनिषत् कथ्यते। अनन्त-ज्ञान-निधान-वेदानां शीर्षस्थानीयतया वेदान्त-शब्देनाऽपि सा व्यवह्रियते।' एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किंचन' इति वेद-विद्यायाश् चरम-सिद्धान्तं प्रतिपादयन्तीयम् उपनिषद् जीव-समुदायम् अनन्त-ज्ञान-सामर्थ्यं शाश्वतीं शान्तिं च प्रापयति।

इयं चोपनिषत् सद्गुरु-प्राप्या। कश् चाधिकारी इत्य् अविचार्य स्वेच्छया ग्रन्थरूपे उपनिषदाम् अध्ययनं कोऽपि कर्तुं शक्नोति, परं चाऽनेन प्रकारेण कोऽपि ब्रह्म-विद्यां प्राप्तुं न शक्नुयात्। अनधिकारिणां साधन-सम्पत्ति-हीन-वासनावासितेऽन्तः करणे ब्रह्मविद्यायाः प्रकाशो नैव जायते। यथोषरभूमौ धान्यादिबीजं नाङ्कुरितं भवति, भवत्य् अपि च फलवन् न भवति, तथैवानधिकारिणां वासना-पूर्णोऽन्तःकरणे ब्रह्मविद्याया उपदेश-रूपं बीजं नाङ्कुरितं भवति, यत्किञ्चिद् अङ्कुरितम् अपि आत्म-निष्ठ-वृद्धिं जीवन्मुक्तिरूपं फलं च नासादयति। अतः सर्वत्र शास्त्रेष्व् अधिकारिरूप-क्षेत्रस्य सम्यक् परीक्षाया विधानम् अस्ति। श्रुतेर् आदेशः—

नाऽपुत्राय दातव्यं नाशिष्याय दातव्यम्।
सम्यक् परीक्ष्य दातव्यं मासं षाण्मासवत्सरम्॥

---

*साहित्य-व्याकरणाचार्यः प्राध्यापकः, वि. वै. संस्थानम्, साधु आश्रमः, होशियारपुरम्।

यथा गुरवे शिष्य-परीक्षण-विधानं तथैव शिष्येभ्योऽपि गुरु-लक्षणं स्पष्टं निर्दिशन्त्या उपनिषद उपदेशोऽस्ति–'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' इति उपनिषत्स्वरूपायां भगवद्गीतायाम् अपि भगवता कृष्णेन प्रतिपादितम्—

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस् तत्त्वदर्शिनः ॥ ४।३४।

श्रोत्रियं वेद-तदर्थ-ज्ञातारं ब्रह्म-निष्ठं चापरोक्ष-ज्ञानिनं तत्त्व-दर्शिनं गुरुं प्रसाद्य तत उपनिषदुपदेशश्रवणविधानम्। तद्यथा शुक-रहस्ये—

श्रवणं तु गुरोः पूर्वं मननं तदनन्तरम्।
निदिध्यासनमित्येतत् पूर्णबोधस्य कारणम् ॥

साधनचतुष्टय-सम्पन्नो जिज्ञासुः श्रोत्रियाद् ब्रह्मनिष्ठात् सद्गुरोः उपनिषत्तत्त्वोपदेशश्रवणं विधाय तार्किकोपपत्तिभिस् तस्मिन्न् उपदेशे प्रगाढ-मननं कुर्वाणो गुरुपदिष्ट-ध्यानाद्यभ्यासेन निदिध्यासन-पूर्वकम् "अहं ब्रह्मास्मि" इत्यादि श्रुतिवाक्यं निरन्तरं चिन्तयन् तस्मिन् निष्ठारूढो भूत्वा सम्यक्-तत्त्वज्ञान-स्वरूपायां परब्रह्मसत्तायां प्रविश्य तद्रूपो भवति 'ब्रह्मविद् ब्रह्मैव भवति' इति श्रुतेः।

आस्वेवोपनिषत्सु याथार्थ्येन निर्णीतस्वरूपस्य परब्रह्म-परमात्मनः प्राप्तये दृष्टान्त-रूपक संकेतैः विधिनिषेधात्मक-विविध-वाक्यैश् च विभिन्नानि साधनानि प्रदर्शितानि सन्ति। तेषु यत्किम् अपि साधनम् एकम् अनुसृत्य कृते तदनुष्ठाने परमात्म-प्राप्तिर् भवितुम् अर्हति। तत्र प्रतिपादितानि सर्वाणि साधनानि भेदाभेदोपासनान्तर्गतान्य् एव सन्ति।

तत्र भेदोपासनायां पदार्थ-त्रयम् अनादि स्वीक्रियते—माया, जीवः, माया-पतिः परमेश्वरश् च। एतेषां वर्णनं बहुत्र स्थलेषूपनिषत्सु दृश्यते। प्रकृतिर् जडा, तस्याः प्रकृतेः कार्यरूपदृश्यवर्गाः क्षणिका नाशवन्तः परिणामिनश् च सन्तिष्ठन्ते। जीवात्मा परमात्मा च चेतनाव् आनन्दस्वरूपौ च। किन्तु जीवात्माऽल्पज्ञः, परमेश्वरः सर्वज्ञः, जीवोऽसमर्थः, परमेश्वरः सर्वसामर्थ्यवान्, जीवोंऽशस् तदा परमात्मांऽशी, जीवो भोक्ता परमेश्वरश् च साक्षिभूतः, एवं जीव उपासकः परमेश्वरश् चोपास्यः।

स परब्रह्म-परमात्मा यथासमयं प्रादुर्भूय जीवकल्याणार्थं सन्मार्गम् उपदिशति। अस्मिन् विषये केनोपनिषदि प्राचीन-वृत्तान्तः समागतोऽस्ति। एकदा परमेश्वर-प्रतापेन स्वर्गनिवासिनो देवा असुरान् जिग्युः। परं चाज्ञानतोऽभिमान-वशीभूताः सन्तस् ते देवा इति निश्चिक्युर् यद् अयं विजयोऽस्मत्प्रभावाद् एव जातः। देवानाम् एतद् अज्ञानपूर्णम् अभिमानं निराकर्तुं तेषां कल्याणार्थं च स्वयं सच्चिदानन्दघन-परमात्मा तेषां समक्षे सगुण-साकारयक्ष-रूपेण प्रादुर् अभूत्। ते यक्षम् अवगन्तुम् इन्द्रादयो देवाः सर्वप्रथमम् अग्निदेवं प्रैषयन्। 'त्वं कोऽसि ? किन्तव सामर्थ्यम्? इति पृष्टवति यक्षेऽग्निर् अब्रवीत् अहं जातवेदा अग्निर् अस्मि; यदीच्छेयं तदा समस्तं ब्रह्माण्डं भस्मसात् कुर्याम्। तदा यक्षरूपः परमात्मा तृणम् एकं तत्समक्षे निधाय कुरु भस्मसाद् इदं लघुतृणम् इति प्रत्यपीपदत्। परं चाग्निदेवः तत्तृणं भस्मीकर्तुं न प्राभवत् तदा परावृत्य देवान् अचकथत्—अहं ज्ञातुं न प्राभवं यद् अयं यक्षः कोऽस्ति। एवं देवैः प्रेरितो वायुर् अपि तत्सामर्थ्यं नावगत्य न्यवर्तत। तत्पश्चात् स्वयम् इन्द्रदेवो यदा तत्र समुपस्थितो भवति तदा स यक्षरूपः परब्रह्मपरमात्माऽन्तर्हितोऽभवत्। तदानीम् इन्द्रस् तस्मिन्न् एवाकाशे हैमवतीम् उमां देवीं विलोक्य तां यक्षविषयकं परिचयम् अप्राक्षीत्। स यक्षः साक्षात्पर-ब्रह्म आसीत्। इति तया पार्वत्या समुपदिष्टेनेन्द्रेण ज्ञातं यद् अयं यक्षः साक्षात् परब्रह्म आसीत्। ततश् चाग्न्यादयोऽपि तद् ब्रह्म अज्ञासिषुः। इमे देवाः सर्वप्रथमं पर-ब्रह्म अवागमन्। अतस् ते देवाः सर्वेभ्यो देवेभ्यः श्रेष्ठतयाऽमन्यन्त। अनेन कथनेन स्पष्टं जातं यत् प्राणिषु यत्किम् अपि बलं, बुद्धिस् तेजो विभूत-यश् च सन्ति तत्सर्वं परमेश्वरांशजातम् एव। गीतायाम् अपि स्पष्टं प्रतिपादितं भगवता कृष्णेन—

यद् यद् विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंशसम्भवम्॥

अर्थात् हे अर्जुन! अस्मिन् संसारे यद् यद् ऐश्वर्ययुक्तं कान्तियुक्तं शक्तियुक्तं च वस्तु दृष्टिपथे समागच्छति तत् तद् वस्तु मामकीनतेजोंशत एव जातम् इति जानीहि। इत्थं चोपनिषत्सु क्वचित् साकार-रूपेण क्वचिन् निराकार-रूपेण क्वचित् क्वचित् सगुण-निर्गुणरूपेण च भेदोपासनाया वर्णनं समागच्छति। तत्रेदम् अपि निर्दिष्टं यद् उपासकाः स्वीयोपास्यदेवं येन भावेन

समुपासते तदुद्देशानुसारेणैव तेषां कार्यसिद्धिर् जायते। कठोपनिषदि (१,२, १६–१७) सगुणनिर्गुणरूपोंकारोपासनाया भेदरूपेण वर्णनं कुर्वाणो यमराजो नचिकेतसम् प्रति कथयति—

एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्।
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्।
एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्।
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते॥

अतः कल्याणं कामयमानानां जनानाम् अस्माद् निरतिशय-दुःखागार-संसार-सागरतः सन्तरणाय परमेश्वर-प्राप्तये च तदुपासना विधेया, नतु सांसारिक-पदार्थभुक्तयर्थम्। स परमेश्वर एतच्छरीरान्तं समेषां प्राणिनां हृदये निराकाररूपेण सर्वदा विराजते, परं च तज्ज्ञानाभावेनैव सर्वे दुःखभाजो भवन्ति। ये च तस्य परमेश्वरस्योपास्तिं विदधति ते तं विज्ञाय समस्त-दुःखेभ्यः शोक-समूहेभ्यश् च निवृत्य परमेश्वरं समासादयन्ति। मुडकोपनिषदि (३,१–३;) अपि प्रतिपादितम् अस्ति—

द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्य-
नश्नन्न् अन्यो अभिचाकशीति॥

समाने वृक्षे पुरुषो निमग्नोऽ-
नीशया शोचति मुह्यमानः।
जुष्टं यदा पश्यत्यन्यमीश-
मस्य महिमानमिति वीतशोकः॥

यदा पश्यः पश्यते रुक्मवर्णं
कर्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति॥

अर्थात् सहवासिनौ परस्परं सख्यं प्राप्नुवन्तौ द्वौ पक्षिणौ जीवात्म-परमात्मानाव् एकम् एव शरीररूपं वृक्षम् अधिश्रित्य सन्तिष्ठेते। तयोर् एकस् तु

तद्-वृक्षस्य कर्म-रूपफलम् आस्वाद्य भुङ्क्ते, किन्त्व् अपरोऽभुञ्जान एव केवलं पश्यति । एतच्छरीररूपवृक्ष-स्थितो जीवात्मा शारीरिक्यां गहनासक्तौ निमज्ज्य असामर्थ्यरूपं दैन्यम् अनुभवन् मुह्यमानः शोकं करोति, किन्तु यदा कदा च भगवतोऽहैतुक्या दयया भक्तजनसेवितं स्वभिन्नं परमेश्वरं तन्महिमानं च साक्षात्करोति तदा सर्वथा शोकरहितो भवति । किंच पुनर् यदाऽयं द्रष्टा जीवात्मा सर्वनियन्तारं ब्रह्मणोऽप्य् आदिकारणं सर्वजगद्रचयितारं दिव्यप्रकाशस्वरूपं परमपुरुषं साक्षात्करोति तस्मिन् समये पुण्यपापाभ्यां रहितो भूत्वा निर्मलान्तःकरणः स ज्ञानी भक्तः सर्वोत्तमं साम्यं प्राप्नोति ।

स सगुण-निर्गुण-रूपः परमेश्वरः सर्वेन्द्रिय-रहितोऽपीन्द्रिय-विषयान् जानीते । स सृष्टि-स्थिति-कारकोऽपि अकर्तैवास्ति । स च सर्वज्ञः सर्वव्यापकोऽकारण-दयालुश् च परमस्नेही हृदयस्थितो निराकारः स्तोतव्यः प्रार्थनीयश् च । तं सेवनीयं परमात्मानं शरणं प्रपद्य जीवः समस्त-दुःख-क्लेश-पाप-विकारमुक्तो भूत्वा परां शान्तिं परमगति-स्वरूपां मुक्तिं च लभते । अतः सर्वेषाम् उत्पत्ति-स्थिति-प्रलयकारकं सर्वशक्तिमन्तं सर्वाधारं सर्वव्यापकं सूक्ष्माद् अपि सूक्ष्मं महतोऽपि महीयांसं तं सर्व-सुहृदं परमेश्वरं तत्त्वतो ज्ञात्वा तत्प्राप्त्यर्थं सर्वतोभावेन तं शरणं समाश्रयेत् । श्वेताश्वतरोपनिषदि परमेश्वरस्य भेदरूपोपासनाया वर्णनं सविस्तरं समागच्छति । यथा--

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
सर्वस्य प्रभुमीशानं सर्वस्य शरणं बृहत् ॥

अर्थात् यः परमपूरुषः परमेश्वरः सर्वेन्द्रियरहितोऽपि सकलेन्द्रियविषयान् जानाति तथा सर्वेषां स्वामी शासको महान् आश्रयश् च स शरणं गन्तव्यः । किंच तत्रैव—

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥

यो योनिं योनिमधितिष्ठत्येको
यस्मिन्निदं सं च वि चैति सर्वम् ।
तमीशानं वरदं देवमीड्यं
निचाय्येमां शान्तिमत्यन्तमेति ॥

अर्थात् माया प्रकृतिः, महेश्वरो मायापतिः, तस्य परमेश्वस्य शक्तिरूपायाः प्रकृतेर् एवाङ्गभूत-कारणकार्यसमुदायेन सम्पूर्णं जगद् इदं व्याप्तं वर्तते। य एकाक्य् एव प्रत्येकं योनेर् अधिष्ठाता, यस्मिन् सर्वं जगद् इदं प्रलयकाले विलीनं भवति सृष्टि-काले च विविध-रूपेषु प्रादुर्भवति तं सर्वनियन्तारं वरदायकं स्तुत्य परम-देवं परमेश्वरं तत्त्वतोऽवगत्य साधको निरन्तरं मुक्तिरूपां शान्तिं प्राप्नोति।

यो ब्रह्माणं विदधाति पूर्वम्
यो वै वेदांश्च प्रहिणोति तस्मै।
तं ह देवमात्मबुद्धिप्रकाशम्
मुमुक्षुर्वै शरणमहं प्रपद्ये॥

अर्थाद् यः परमेश्वरः सर्वप्रथमं ब्रह्माणमुत्पादयति, यश् च तस्मै ब्रह्मणे समस्तवेदज्ञानं प्रददाति तं परमात्मबुद्धि-प्रकाशयितारं प्रसिद्ध-देवं परमेश्वरं मोक्षाभिलाषी साधकोऽहं शरणं गच्छामि। एवम् एव बह्व्यः श्रुतयो भेदोपासनाबोधिकाः सन्ति।

शास्त्रेषु भेदोपासनानुसारं सालोक्य-सामीप्य-सारूप्य-सायुज्य-भेदेन मुक्तिश् चतुर्विधा प्रदर्शिताऽस्ति। तत्र भगवतः परम-धाम-निवासः सालोक्य-मुक्तिः, यो वात्सल्यादिभावेन भगवदुपासनां विधत्ते, स सालोक्य-मुक्तिं प्राप्नोति। भगवतः परम-धाम-गमनानन्तरं तत्समीपावस्थानं सामीप्य-मुक्तिर् यो दासभावेन माधुर्य-भावेन वा भगवन्तम् उपास्ते स सामीप्य-मुक्तिम् आसादयति। भगवतः परमधामगमनान्तरं भगवत्स्वरूपावस्थितिः सारूप्य-मुक्तिः। इमां मुक्तिं स एव प्राप्नोति यः सख्य-भावेन भगवदुपासनां कुरुते। एवु भक्तेषु सृष्टिस्थिति-संहाररूपं भगवत्सामर्थ्यं विहाय भगवतः सर्वे गुणाः समागच्छन्ति। अभेदेन भगवत्स्वरूपावलयः सायुज्यमुक्तिः। यः शान्त-भावेन भगवदुपासनां करोति स सायुज्य-मुक्तिं लभते। ये च वैरभावेन, द्वेषभावेन भयेनापि वा भगवन्तं सेवन्ते तेऽपि सायुज्य-मुक्तिं लभन्ते। यथा नदीनां पयः स्वनामरूपं परित्यज्य समुद्र-संज्ञतया समुद्र एव भवति तथैव साधका भगवति विलीना भूत्वा भगवत्स्वरूपा एव भवन्ति। एतदर्थम् उपनिषत्सु शास्त्रान्तरेष्व् अपि च बहुत्र स्थले बहूनि प्रमाणानि समुपलभ्यन्ते। कठोपनिषदि नचिकेतसम् प्रति यमः कथयति —

यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति ।
एवं मुनेर्विजानत आत्मा भवति गौतम ! ॥

अयम् अभिप्रायः—'हे गोतमवंशीय नचिकेतः ! यथा निर्मले जले मेघैः समानीतं निर्मलं जलं तादृशम् एव भवति तथैव 'एकमात्रं परब्रह्म पुरुषोत्तम एव सर्वं वस्तु' इति विजानानस्य मुनेर् आत्मा परमेश्वरं प्राप्नोति । अर्थात् परमेश्वरे मिलित्वा तद्रूपो भवति । मुण्डकोपनिषद् अपि प्रतिपादितम्—

स वेदैतत्परमं ब्रह्मधाम
यत्र विश्वं निहितं भाति शुभ्रम् ।
उपासते पुरुषं ये ह्यकामास्
ते शुक्रमेतदतिवर्तन्ति धीराः ॥

अर्थात् स निष्कामः पुरुष इदं परमविशुद्धं प्रकाशमानं ब्रह्मधाम जानीते, यस्मिन् सम्पूर्णं जगत् स्थितं प्रतीयते । ये केचन निष्कामसाधकाः परमपुरुषं समुपासते ते प्रज्ञावन्तो रजोवीर्यमयं जगद् इदम् अतिक्रामन्ति । अर्थात् पुनस् तेषाम् आगमनं नैव जायते ।

यथा नद्यः स्यन्दमानाः समुद्रेऽ-
स्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान् नामरूपाद्विमुक्तः
परात्परं पुरुषमुपैति दिव्यम् ॥

स यो ह वै तत्परमं ब्रह्म वेद
ब्रह्मैव भवति नास्याब्रह्मवित् कुले भवति ।
तरति शोकं तरति पाप्मानं
गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति ॥

यथा वहन्त्यो नद्यो नामरूपे परित्यज्य समुद्रे विलीना भवन्ति तथैव ज्ञानिनो महात्मानो नामरूपरहिता भूत्वा परमोत्तमं दिव्यं परमपुरुषं परमात्मानं प्राप्नुवन्ति । निश्चितं यः कश्चित् तं परब्रह्मपरमात्मानं वेत्ति स महात्मा ब्रह्मैव भवति । तत्कुले न कोऽप्य् एवं भवति यो ब्रह्म न जानीयात् । स शोकं तरति पापसमुदायस् तस्य नश्यति, हृद्-ग्रन्थिभ्यः सर्वथा विमुक्तो भूत्वाऽमृतो भवति । अर्थाद् जन्ममरणरहितो ब्रह्मस्वरूपो जायते । यो जीवो मायाजीवपरमेश्वरेषु परस्परं पार्थक्यम् अवगत्य समुपास्ते

अवगच्छति चेत्थं यद् ईश्वरीयप्रकृतिर् ईश्वराद् अभिन्ना, यतः शक्तिः शक्तिमतोऽभिन्ना भवति। एवं भिन्नोऽपि जीव ईश्वरांशतयाऽभिन्न एव। स पुरुषो भेदरूपेण साधनं कुर्वाणोऽप्य् अन्तेऽभेदरूपेणैव परमात्मानं प्राप्नोति इत्यपि शास्त्रेषु उपनिषत्सु च बहुत्र स्थलेषु समुपलभ्यते। यथा श्वेताश्वतरोपनिषदि—

ज्ञाज्ञौ द्वावजावीशानीशा-
वजा ह्येका भोक्तृभोग्यार्थयुक्ता।
अनन्तश्चाऽऽत्मा विश्वरूपो ह्यकर्ता
त्रयं यदा विन्दते ब्रह्म एतत्॥
क्षरं प्रधानममृताक्षरं हरः
क्षरात्मानावीशते देव एकः।
तस्याभिध्यानाद्योजनात्तत्त्वभावाद्
भूयश्चान्ते विश्वमायानिवृत्तिः॥

अयम् अभिप्रायः—सर्वज्ञाऽल्पज्ञौ सर्वसमर्थासमर्थौ जीवात्म-परमात्मानाव् अजन्मानौ स्तः। भोक्त्रे जीवात्मने उपयुक्तभोग्य-सामग्र्याऽन्विताऽनादि-प्रकृतिर् एका तृतीया शक्तिः। एतत् त्रितये यद् ईश्वरतत्त्वं तच्छेष-द्वयविलक्षणम्। यतः स परमात्माऽनन्तः समस्तरूपात्मकः कर्तृत्वाभिमानरहितश् च। यदा मनुष्य ईश्वरं जीवं प्रकृतिं च ब्रह्मत्वेन प्राप्नोति तदा स सर्वविध-बन्धनाद् मुक्तो भवति। प्रकृतिस् तु विनाशशीला, एतद्भोक्ता जीवात्माऽमृतस्वरूपोऽविनाशी च वर्तते। इमौ विनश्वर-जडतत्त्व-चेतनात्मानौ ईश्वरः शास्ति। इत्थं ज्ञात्वा तस्य निरन्तरं ध्यानेनान्ते तत्स्वरूपो भवति मायातश् च निवृत्तो भवति। इत्थं चोपनिषत्सु भेदोपासना प्रदर्शिताऽस्ति। अभेदोपासनाऽपि तथैव दर्शिता। तथाहि—

सृष्ट्यादौ एकं सच्चिदानन्दघनब्रह्मैवाऽऽसीत्। तेन विचारितं यद् अहं प्रादुर्भवामि, अनेकनामरूपधारणं कृत्वा बहु स्याम्'। एवं तद् ब्रह्म एकम् एव बहु जातम्। अतो यत् किञ्चिद् इदं जडचेतनात्मकं स्थावरजङ्गमात्मकं च जगद् वर्तते तत् परमात्मन एव स्वरूपम् अस्ति। तथा चोक्तं मण्डूकोपनिषदि—

ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म
पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण।

अधश्चोर्ध्वं च प्रसृतं ब्रह्म-
वेदं विश्वमिदं वरिष्ठम् ॥

अर्थात् अमृतस्वरूपम् इदं परं ब्रह्मैव पुरतः पृष्ठतश् च वर्तते। ब्रह्मैव दक्षिणतश् चोत्तरतश् च विद्यते, अधस्ताद् ऊर्ध्वं च तद् ब्रह्मैव प्रसृतम् अस्ति। इदं यत् सम्पूर्णं जगत् तत् सर्वश्रेष्ठं ब्रह्मैवाऽऽस्ते। कठोपनिषदि परब्रह्मस्वरूपं वर्णयन् यमराजः कथयति —

अशब्दमस्पर्शमरूपमव्ययम्
तथारसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवम्
निचाय्य तन्मृत्युमुखात् प्रमुच्यते ॥

अर्थात् यः परमात्मा शब्दस्पर्शरूपरहितो गन्धरहितश् च तथा योऽविनाशी नित्यः अनन्तः महत्त्वातीतः सर्वथा सत्यश्च तं परमात्मानं ज्ञात्वा मनुष्यो मृत्युमुखात् सदा मुक्तो भवति। तत्रैव—

मनसैवेदमाप्तव्यं नेह नानास्ति किंचन।
मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति ॥

इदं परमात्मतत्त्वं शुद्धमनसैव प्राप्यम् अस्ति, अस्मिन् संसारे परमात्मानं विहाय नान्यः कश्चित् पदार्थोऽस्ति। अतो योऽस्मिन् जगति नानात्वं पश्यति स मनुष्यो मृत्योर् मृत्युं प्राप्नोति, अर्थाद् जननमरण-प्रसङ्गाद् मुक्तो न भवति।

मुण्डकोपनिषद्य् अपि प्रोक्तम्—

न चक्षुषा गृह्यते नापि वाचा
नान्यैर्देवैः तपसा कर्मणा वा।
ज्ञानप्रसादेन विशुद्धसत्त्वः
ततस्तु तं पश्यते निष्कलं ध्यायमानः ॥

स निर्गुणनिराकारपरब्रह्मपरमात्मा चक्षुर्वचनाभ्यां तपसा कर्मणा वा ग्रहीतुम् अशक्यः, तम् अवयवरहितं परमात्मानं तु विशुद्धान्तःकरणः साधकस् तेन विशुद्धान्तःकरणेन निरन्तरं ध्यायन् ज्ञाननिर्मलतया पश्यति। छान्दोग्योपनिषदि 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपसीत'।

अर्थात् समस्तम् इदं जगत् ब्रह्मैवास्ते, एतस्योत्पत्तिः स्थितिः प्रलयश् च तद् ब्रह्म, तद् एवेत्य् अवगत्य शान्तचित्तः सन् तदुपासनां विदध्यात्। एतावत्पर्यन्तं 'तत्त्वमसि' इति श्रुतौ तत्पदस्य निर्वचनं जातम्। अतः परं तस्याम् एव श्रुतौ त्वं-पदस्योपासनाविधिः प्रदर्श्यते।

यत् किमपि जड़चेतनात्मकं स्थावरजङ्गमात्मकं च वस्तु दृश्यते तत्सर्वं ब्रह्म, यद् ब्रह्म तद् अहम् अस्मि, अतो मनुष्यः सर्वभूतेषु स्वात्मानम् आत्मनि सर्वाणि भूतानि च पश्येत्, अर्थात् यत् किमपि दृश्यमानं तत्सर्वं मत्स्वरूपमेव एवमभ्यासकः साधकः शोकमोहाभ्यां रहितो भूत्वा विज्ञानानन्दघनब्रह्म-स्वरूपं प्राप्नोति। एतद् वस्तु गीतोपनिषदि भगवता कृष्णेन प्रतिपादितम्—

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥

अर्थात् सर्वव्यापकेऽनन्ते चेतने एकीभावेन स्थितिरूपयोगयुक्तात्मा समदृष्टिश् च योगी स्वात्मानं सर्वभूतस्थितं समस्तानि च तानि स्वात्मनि पश्यति। ईशावास्योपनिषद् अपि विषयोऽयं प्रतिपादितोऽस्ति—

यस्तु सर्वाणि भूतान्य् आत्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।
यस्मिन् सर्वाणि भूतान्य् आत्मैवाभूद्विजानतः।
तत्र को मोहः कः शोकः एकत्वमनुपश्यतः॥

परं च यो मनुष्यः समस्तान् जीवान् आत्मन्य् एव पश्यति आत्मानं च सर्वभूतेषु। अर्थात् समस्तभूतं स्वात्मानम् एवावगच्छति, पुनः स कमपि जीवं प्रति घृणां नोत्पादयति। इत्थं यदाऽऽत्मतत्त्वस्य ज्ञात्रे महात्मने सर्वः पदार्थ आत्मैव भवति तदैकात्मानुभावेन कुतो मोहः शोकश् च।

इत्थं च परमात्मनः प्राप्त्यर्थं द्विविधोपासनाया वर्णनम् उपनिषत्सु समागतम् अस्ति। तयोर् अभेदोपासनया तत्प्राप्तिः ज्ञानसाध्या। ज्ञानं च तदैव यदा वैषयिक-सुखं परित्यज्य मनः स्थिरीकृत्य गुरोः सकाशात् श्रुतीनां श्रवणं मननं निदिध्यासनं च कुर्यात्। परं चास्मिन् युगे ज्ञानं न, विवेकेन वा आधुनिकास् तत् साधयितुम् अशक्ताः। मनसश् चञ्चलत्वाद् ज्ञानं दुःशकम्। ज्ञानद्वाराऽधुना निर्गुणब्रह्म दुरापम्। अत उभयब्रह्म-प्राप्त्यर्थं कलौ भक्तिरेव समाश्रयणीया। अयं मार्गः सुलभः सर्वसाध्यश्चेत्यलम्।

स्मृति-प्रामाण्य-विमर्शः

रामनारायणत्रिपाठी*

स्मृतेः सत्ताम् उपयोगितां चाविशेषेण मन्यमाना अपि तत्-प्रमात्व-प्रमाणत्वादिषु वादिनो बहुधा विप्रवदन्ते। तत्र हि सांख्य-प्रभृति-दार्शनिका बौद्धाः शैवाश् च स्मृतेः प्रमात्वं तत्करणस्य च प्रमाणत्वं नाङ्गीकुर्वन्ति। किन्त्व् अत्रापि कतिचिन् नैयायिकाः केचन वेदान्तिनस् तत्प्रमात्वं संगिरन्ते। जैना माध्वानुयायिनश् च ऐकमत्येन तस्याः प्रामाण्यं मन्यन्ते। इति विप्रतिपत्ति-मूलक-जिज्ञासा-शान्तये स्मृति-विषये विचारकाणाम् एकैकैशो मतम् उपन्यस्य समीक्षितुकामोऽपि प्रथमतः किञ्चिद् निवेद्ये। तत्-तच्छास्त्रानुसारं तद्-विषये यत् किम् अपि वाऽस्तु, किन्तु जगति प्रत्यक्षादि-ज्ञानवत् प्रत्यक्षादि-प्रमाणवच् च स्मृत्याऽपि जन-व्यवहारः प्रचलति। जनाः स्मृतिम् अपि प्रमाणत्वेनोपस्थापयन्ति। यथार्थ-स्मृतेः प्रामाण्ये लोको मनाग् अपि न संशेते, अन्यथा स्मृति-मूलक-व्यवहारस्य विलोपापत्तिः स्यात्। अतो लोकव्यवहारानुसारेण स्मृतेः प्रमात्वं प्रमाणत्वं चाङ्गीकरणीयम् एव। यतो हि येन लोक-व्यवहारो भवति तदेव सत्यं लोके गीयते। यत्र च लोक-प्रवृत्तिः सफला तस्यैवोपयोगिता लोकव्यवहारे। स च व्यवहारः 'स घटः, सा बडवा, तत् पुस्तकम्' इत्याकारकस्मृताव् अपि सम्यग् जाघटीति। अतः स्मृतिर् अविसंवादि-व्यवहारोपयोगित्वेऽल्पम् अप्य् आत्मानं नोनयति। एवं सति तत्र प्रमात्व-व्यवहारे तत्करणेऽनुभवादौ प्रमाणत्व-व्यवहारे वा न केषाञ्चिद् अपि वादिनां काऽपि हानिः, ऋते स्व-स्व-सम्प्रदाय-मर्यादातिक्रमात्। शङ्कते चेद् यत् सर्वाः स्मृतयो न यथार्था अपित्व् अयथार्था इति, तत्र समीचीनम् अयथार्थायाः स्मृत्याभासत्वात्। प्रत्यक्षादाव् अप्य् अयथार्थत्वोपलब्धौ तदाभासत्वम् एव मन्यते।

*संस्कृतविभागः (प्राच्य), लखनऊविश्वविद्यालयः, लखनऊ।

आचार्यैः स्व-स्व-मतानुसारं प्रमायाः प्रमाणस्य चेदृशं लक्षणं प्रमाण-संख्या-नैयत्यं चेयता नियमेन व्यधायि यत्-परिधौ स्मृतेर् नावकाशः। एकं तत्प्रमात्वं निराकृत्यापि तत्-सत्तोपयोगिते अङ्गीक्रियेते। अत्र यद्यपि स्व-स्व-संप्रदाय-परम्परैव तत्प्रमात्वाऽनङ्गीकारे प्रधानतया बीजम्, तथापि जिज्ञासैवोदेति यद् अस्मिन् विषये किमर्थम् एतादृशी परम्परा? तत्र को हेतुः? परम्पराऽतिरिक्तोऽपि कश्चन हेतुर् भवितुम् अर्हति न वेति। विचारणायाम् अस्याम् एतत् समायाति बुद्धौ, यद् यत्र धर्मशास्त्रेतिवृत्तम् अपि कारणताम् आरोढुं शक्नोतीति। तद् इत्थम्—वैदिक-परम्परायां धर्मशास्त्ररूपेण श्रुतेर् एव मुख्यं प्रामाण्यं स्मृतीनां तु गौणं प्रामाण्यम् आसीत्, स्मृतीनां श्रुति-मूलकत्वेनाऽस्वतन्त्रत्वात्। इत्य् एव परम्परा मीमांसकानां समाजे चिराय प्रवहन्ती वासनारूपेण स्थिता स्मृतिरूप-ज्ञानस्याऽपि विषयेऽवतरन्ती पूर्ववृत्तानुसारेण नियमयामास यत् 'स्मृतिज्ञानस्य न स्वतन्त्रतया प्रामाण्यम् अपि तु स्मृतिकारणीभूतानुभवप्रमाणाधीनत्वम् एवेति,' अतः सा स्मृतिर् मुख्य-प्रमाण-रूपेण गणयितुम् अयोग्या जाता। मन्ये यद् एतन्मीमांसकनियमस्यैव वेदमूलक-दर्शनेषु प्रभावो, येन सर्वैर् अपि तथैवाऽऽचरितम्। एतद्-दर्शन-प्रभावाभिभूतो बौद्धोऽपि तत्सरणिम् अन्वगच्छत्। जैना एव एतद्-बन्ध-विनिर्मुक्ता दृश्यन्ते। एवं सति ममेयं प्रार्थना यद् यथा वादिनां परमत-निरसन-पूर्वकं शब्द-प्रत्यक्षाऽनुमानोपमानाऽर्थापत्त्यनुपलब्ध्यैतिह्य-संभव-चेष्टा-प्रतिभेत्यादि-रूपया उत्तरोत्तरप्रमाणसंख्या-वृद्ध्या लोकव्यवहारे सारल्यं जातम्[1], नह्य् अत्रान्तर्भावादिक्लेशोऽनुभूयते, तथैव स्मृतेः प्रामाण्येऽपि लोकानुगतं सारल्यम् उत्पद्यते। अतोऽत्र विचारकाः स्वपक्षाग्रहं विहाय स्वतन्त्रतया विचारयेयुः। एतदर्थं भवतां पुरो विभिन्न-शास्त्रीयमतान् उपन्यस्य स्मृति-प्रामाण्यं समर्थयामहे।

न्याय-वैशेषिकयोः सप्त-पदार्थान्यतम-गुण-पदार्थे बुद्धिर् अप्य् एक आत्माश्रितो[1] मनोमात्रगोचरो[2] ज्ञान-पद-व्यपदेश्यो गुणः। सा चानुभूति-स्मृति-रूपेण द्विधा। तत्र स्मृतिर् अपि आत्मनो धर्मः, आत्मनो ज्ञातृत्वात् न तु बुद्धि-धर्मो ज्ञान-विशेषस्य स्मरणस्य ज्ञानधर्मत्वाऽसंभवात्। निरात्मिका खलु बुद्धिः स्वयं धर्मो न तु धर्माऽऽश्रयो भवितुम् अर्हति। सा स्मृतिर् या भावनाख्य-संस्कार-जन्मा, भावनाख्य-संस्कारश् चानुभव-जन्यः, उपेक्षा-

१. न्या. सि. मु. ३२, ३३ श्लोकः।

२. न्या. सि मु. ५६ श्लोकः।

नात्मक-निश्चय-हेतुकः । उपेक्षात्मक-ज्ञानात् संस्कारानुत्पत्तेर् अनुभव-सिद्धत्वात् । तादृश-संस्कार आत्म-मनः-सन्निकर्षे सति प्रणिधानादिभ्यः उन्मादादिभ्यः[1] अनुभूतोद्बोधक-सामग्री-वशाच् चोद्बुद्धः[2] सन् अनुभवकर्तुः स्मृतिं जनयति ।

अनुभूतिस् तु द्विधा यथार्थाऽयथार्था च, तत्राऽऽद्या प्रत्यक्षानुमित्युपमिति-शाब्द-भेदाच् चतुर्विधा प्रमा-पद-वाच्या, तत्-करणं प्रत्यक्षानुमानोपमानशब्दैतच्चतुष्टयं प्रमाण-पद-वाच्यम् । द्वितीया अप्रमा-पदवाच्या क्वचित् संशय-विपर्यय-तर्क-भेदात् त्रिधा क्वचन च संशय-विपर्ययभेदेन द्विधा । स्मृतिर् अपि यथार्थाऽयथार्था[3] चेति द्विविधा । आद्या संस्कार-प्रमाजन्या । अर्थाल् लौकिकाऽलौकिक-सन्निकर्ष-परामर्श-सादृश्य-योग्यतादि-सामग्रीसमुद्भूत-प्रमाजन्य-संस्कारोद्बोधेन जायमानत्वाद् यथार्था । द्वितीया संस्कार-द्वारकाऽप्रमाजन्या, अर्थात् पित्त-दूरत्व-तम-इन्द्रिय-वैकल्य-मनोऽनवस्थान-मण्डूक-वसाञ्जनादिदोष-सामग्री-समुद्भूताऽप्रमाजन्य-संस्कारोद्बोधेन जायमानत्वाद् अयथार्था । उभयोः स्मृत्योर् लक्षणे संस्कार-सम्बन्धावच्छिन्नानुभव-प्रमाभ्रमनिष्ठ-जनकतानिरूपित-जन्यते बोध्ये । जागरणावस्थायाम्[4] उभयात्मिका स्मृतिः संभवति स्वप्नावस्थायां तु सर्वम् एव ज्ञानं स्मरणम् अयथार्थं च । केचित् तु स्वप्नज्ञानं[5] मानसं, ज्ञानं न तु स्मरणात्मकम्, स्वप्नान्तिकं स्मृत्या-

---

१. आत्मनः-संयोगविशेषात् संस्काराच्च स्मृतिः, वैशे. सू. ९,२–६७, लिङ्गदर्शनेच्छानुस्मरणाद्यपेक्षयात्ममनसोः सयोगविशेषात् यद्वाभ्यासादर-प्रत्ययनिताच्च संस्काराद् दृष्टश्रुतानुभूतेषु विशेषानुस्मरणेच्छाद्वेषहेतुः तदतीतविषया स्मृतिः । प्रश. भा. २।३२ पृ. ।

२. प्रणिधाननिबन्धनाभ्यास-लिङ्गलक्षणसादृश्यपरिग्रहाश्रित-संबन्धानन्तर्यविरोधैककार्यविरोधातिशयप्राप्तिव्यवधान-सुख-दुःखेच्छाद्वेषभयार्थित्व-क्रियारागधर्माधर्म-निमित्तेभ्यः । गौ. सू.।३।२।४३ ।

३. गौ. सू. ३।२।४३ भाष्यम् ।

४. भावनाख्यः संस्कारोऽनुभावेन जन्यते स्मृतिं जनयति च । संस्कारस्तूद्बुद्ध एव स्मृतिं जनयति । उद्बोधश्च सहकारिलाभः । सहकारिणश्च संस्कारसदृश-दर्शनादयः तथा चोक्तम्—सादृश्यादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः । त. भा. ३६ पृ. । स्मृतिजननाय संस्कारोद्दीपनमुद्बोधः ।

५. त० सं० १५ पृ० । ६. न्या० को० । ७. प्र० पा० भा० ।

त्मकम् इति वदन्ति। स्मृतिर् अपि संस्कार-जनिका येनोत्तरोत्तरं स्मरणं जायत इत्य् अपि केषाञ्चिद् अभिमतम्। स्मृति-जनकत्व-विषयेऽपि मतभेदः—तद् यथाऽत्र स्मृतिं संस्कारं च प्रत्य् अनुभवस्यानुभवत्वेनैव जनकत्वम्, यतो हि तत्तद्विषयक-स्मृतिं तादृश-संस्कारं च प्रति तत्तद् विषयकानुभवत्वेन हेतुता, न तु तत्तद्विषयक-ज्ञानत्वेन अनुभवत्वस्यापि जातित्वेन ज्ञानत्वापेक्षया गौरवाभावात्। न चात्र विनिगमनाविरह इति शङ्क्यम् व्याप्यधर्म-पुरस्कारेण कारणत्व-संभवे व्यापक-धर्मस्याऽन्यथासिद्धत्वाद् इति प्राञ्चः।

अनुभवस्य ज्ञानत्वेनैव स्मृतेर् जनकत्वम् तत्तद्विषयक-स्मृतिं तादृशसंस्कारं च प्रति तत्तद्-विषयक-ज्ञानत्वेनैव हेतुता, न त्व् अनुभवत्वेन संस्कारस्य फलनाश्यतया प्रथम-स्मरणेनैवानुभव-जन्य-संस्कार-नाशेन सकृद् अनुभूतस्य स्मरणोत्तरम् अस्मरण-प्रसंगाद् इति नवीनाः। स्मरामीति प्रतीत्या, स्मृति-पद-शक्यतावच्छेदकतया प्रत्यक्षानुमानाभ्यां स्मृतित्व-जातिर् अङ्गीक्रियते कैश्चित्। यथानुभवत्वं ज्ञानत्वं च जातिस् तथैव स्मृतित्वम् अपि। स्मृतौ पूर्वानुभवः समवायिकारणम्, आत्म-मनसोः संयोगोऽसमवायिकारणम्, प्रणिधानादयो हि निमित्तकारणम्, संस्कारो व्यापारः[२]। हेतूनां यौगपद्येन संभवाभावात् स्मृतेर् यौगपद्य-व्यावृत्तिः।

एवं संक्षेपेण स्मृति-स्वरूपं निरूप्य तत्प्रमाण-विषये किञ्चिद् वक्ष्मि। नैयायिकेषु स्मृतेः प्रमात्वे मत-द्वयं वर्तते। केचन अप्रमात्वम् अपरे प्रमात्वं वर्णयन्ति। तत्र यथाशक्ति तेषां मतम् उपस्थाप्यते—

आचार्यवाचस्पतिमिश्रास् तु न्यायवार्तिक-तात्पर्यटीकायां स्मृतिभिन्नज्ञानस्यैव प्रमात्वम् अङ्गीकृत्य लोक-व्यवहारोऽभावेन तस्याः प्रमात्वं निराचिपुः। 'उपलब्धिमात्रस्य अर्थाव्यभिचारिणः स्मृतेर् अन्यस्य प्रमाशब्देनाभिधानात्[३]'।

'यथार्थानुभवो मानमपेक्षतयेष्यते। मितिः सम्यक् परिच्छित्तिः तद्वत्ता च प्रमातृता'।

---

१. स्मृतेः संस्कारजनकत्वं नवीननैरुक्तम्, दीपिका० १६२ पृ०।
२. रामरुद्री ३१६ पृ०। ३. न्या० वो० ६६ पृ०।
४. ता० टी० पृ० २१। ५. का० कु० ४, १-५।

तदयोग-व्यवच्छेदः प्रामाण्यं गोतमे'[1]। कथं तर्हि स्मृतेर् व्यवच्छेदः? अनुभवत्वेनैव। यथार्थानुभवः प्रमेति प्रामाणिकाः पश्यन्ति। तत्त्वज्ञानात्, इति सूत्रणात्, अव्यभिचारि ज्ञानम् इति च। ननु स्मृतिः प्रमैव किं न स्याद् यथार्थज्ञानत्वात् प्रत्यक्षाद्यनुभूतिवद् इति चेत्, न, सिद्ध व्यवहारे निमित्तानुसरणात्। न च स्वेच्छाकल्पितेन निमित्तेन लोकव्यवहारनियमनम्, अव्यवस्थया लोक-व्यवहारविप्लव-प्रसंगात्। न च स्मृतिहेतौ प्रामाण्याभियुक्तानां महर्षीणां प्रमाण-व्यवहारोऽस्ति पृथगनुपदेशात्'[2] इत्युदयनाचार्योऽपि मिश्रपादसरणिम् अनुसृत्य स्मृतेः प्रमात्वम् अनङ्गीकृतवान्। आचार्य-शिवादित्य-मिश्रैर् अपि लक्षणमाला-ग्रन्थे 'तत्त्वानुभूतिः प्रमा' इत्यनुभूतेर् एव प्रमात्वं स्वीकृतम्। भासर्वज्ञेन 'सम्यगनुभवसाधनं प्रमाणम्' इति 'सम्यग् अनुभवः प्रमा तत्साधनं प्रमाणम्' इति निगदितम्। जयन्तभट्टो विषय-रूपार्थातिरिक्तसामग्री-समुत्पन्नत्वेन अनर्थ-जन्यत्वात् स्मृतेः प्रमात्वं निराकृतवान्। 'न स्मृतेरप्रमाणत्वं गृहीतग्राहिता-कृतम्। अपि त्व् अनर्थ-जन्यत्वं तदप्रामाण्य-कारणम्'[3]। न्यायकन्दलीकारास् तु जयन्त-भट्टोक्त-हेतुम् अपाकृत्य मीमांसक-सरण्या गृहीत-ग्राहकत्वेनैव स्मृतेर् अप्रामाण्यं स्वीकुर्वन्ति। 'ये त्वनर्थजत्वात् स्मृतेर् अप्रामाण्यम् आहुः, तेषाम् अतीता-नागतविषयस्यानुमानस्याऽप्रामाण्यं स्यादिति दूषितम्'[4] इति न्यायसिद्धान्त-मुक्तावल्यां विश्वनाथेन पूर्वाचार्याणाम् अग्र किञ्चिद् गत्वा स्मृतेः प्रमात्वं त्व् अङ्गीकृतं किन्तु प्रमाणत्वे संकोचोऽन्वभावि। तथाहि-'भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा' 'अथवा तत्प्रकारकं यज्ज्ञानं तद्वद्-विशेष्यकम् तत्प्रमा। अथवेति तद्वद्-विशेषयकत्वे सति तत्प्रकारकं ज्ञानं प्रमेत्यर्थः।' अथैवं स्मृतेर् अपि प्रमात्वं स्यात्, ततः किम् इति चेत्, तथा सति तत्करणस्य प्रमाणान्तरत्वं स्याद् इति चेन्, न; यथार्थानुभवकरणस्यैव प्रमाणत्वेन विवक्षितत्वात्' इति। एवं स्मृतेः प्रमात्वाङ्गीकारेऽपि तत्करणे प्रामाण्यं निरस्तम्। यतो हि यथार्थानुभवकरणम् एव प्रमाणम् इति प्रमाण-लक्षणस्य स्मृति-करणेऽनुभवादावप्रवृत्तः। तर्कसंग्रहे तु "तद्वति तत्प्रकार-कोऽनुभवो यथार्थः सैव प्रमेत्युच्यते' इति प्रमाण-लक्षणे अनुभवपदोपादानद्वारा स्मृतेः प्रमात्वं निराकृत्याऽपि 'स्मृतिरपि द्विविधा यथार्था अयथार्था च। प्रमाजन्या यथार्था। अप्रमाजन्या अयथार्था' इत्युक्तम्। एवं प्रमाजन्यतया याथार्थ्याऽभ्युपगमेऽपि प्रमात्वं नाऽन्वभावि इति जन्य-जनक-वैजात्ये हेतुं सुधियो विभावयन्तु।

---

१. न्या. कु. ४,१-५। २. तत्रैव ४।१। ३. न्या. मं. पृ० २३। ४. न्या. कु. पृ० २५।

योगशास्त्रानुयायिनः—पञ्चानां प्रमाण[1]-विपर्यय-विकल्प-निद्रा-स्मृतीनां चित्त-वृत्तीनां मध्ये स्मृतिः खल्व् एका चित्त-वृत्तिः, प्रमाणादिभिर् अनुभूतानां विषयाणाम् अन्तः-करणाद् अविलोपः[2], इत्य् एवंरूपेत्य् अङ्गीकुर्वन्ति। सा चेत्थं जायते—अनुभूतिस् तु सविषयैव प्रभवति न तु निर्विषया। अतो विषयोपरक्ता सा विषयम् आत्मानं च प्रकाशयन्ती स्वसमान-जातीयं संस्कारं जनयति। एवं-भूतस् तज्जः संस्कारोऽपि स्वकारणाऽनुरूपां विषयाकारां ज्ञानाकारां च स्मृतिम् उत्पादयति। सा च वृत्यन्तर-विलक्षणा स्मृतिर् वृत्यन्तर-विषयी-कृत-विषया, 'अनधिगतं विषयं सामान्य-विशेष-रूपाभ्यां भासयन्तीभ्योऽन्याभ्यः प्रमाणादि-वृत्तिभ्य आत्मानं व्यावर्तयन्ती' पूर्वानुभव-मर्यादाम् अनाक्रम्य पूर्व-विषयं तदून-विषयं प्रकाशयति न तु ततोऽधिक-विषयम्[3]। अत एव प्रमाण-विपर्यय-विकल्प-निद्रावस्था-चतुष्क-स्मृतिकर्त्री स्मृतिः। स्वात्म-विषयिकाऽपि[4] स्मृतिर् भवति। स्मृतेर् अपि स्मरण-संभवात्। सा स्मृतिर् द्विधा भवति। भावितस्मर्तव्या अभावित-स्मर्तव्या च। आद्या स्वप्नावस्थायां प्रभवति, तदानीम् एवाऽननुभूत-देश-कालादि-संबन्धस्य संभवात्। द्वितीया तु जाग्रद्-दशायां जायते।

---

१. यो० सू० १।३।

२. अनुभूतविषयासम्प्रमोषः स्मृतिः। यो० सू० १।११।

३. सर्वे प्रमाणादयोऽनधिगतमर्थं सामान्यतः प्रकारतो वाऽधिगमयन्ति, स्मृतिः पुनर्न पूर्वानुभवमर्यादामतिक्रामति, तद्-विषया तदूनविषया वा, न तु तदधिकविषया. सोऽयं वृत्यन्तराद् विशेषः स्मृतेरिति विमृशति। त० वै० १।११।

४. सर्वाः स्मृतयः प्रमाणविपर्यय-विकल्पनिद्रास्मृतीनामनुभवात् प्रभवन्ति, यो० वृ० १।११। चित्तशब्देनात्रास्मिन् दर्शनेऽन्तः करणं बुद्धिर्गृह्यते 'चित्तशब्देनान्तकरणं बुद्धिमुपलक्षयति, त. वै. १।१ ववचन मनोऽपि, यो. सू. ४।१० भाष्ये वैशारद्याञ्च। न तु कूटस्थनित्या चितिशक्तिस्तस्या अपरिणामित्वात्। बुद्धेरेव त्रिगुण-वैषम्यादनेका अवस्था अनेके धर्मा अनेकाश्च वृत्तयो भवन्ति। सा च बुद्धिर्विषयाकारेण परिणता सती विषयाकारमनापन्नायै चित्तशक्तये विषयमादर्शयति। ततः पुरुषश्चेतयते, इत्युच्यते।

अस्मिन् नये 'अनधिगततत्त्वबोधः पौरुषेयो व्यवहारहेतुः प्रमा, तत्करणं प्रमाणम्, प्रत्यक्षानुमानागमाः प्रमाणानि, इति व्यवस्थाप्य विपर्यय-विकल्प-निद्रा-स्मृतीनां प्रमात्वं तत्करणस्य च प्रामाण्यं निरस्तम्।

सांख्या अपि स्मृतेः प्रमात्वं तत्करणस्य प्रमाणत्वं च नाङ्गीकुर्वन्ति। तदुक्तं सांख्यतत्त्वकौमुद्याम्—'असन्दिग्धाविपरीतानधिगत-विषया चित्तवृत्तिः, बोधश् च पौरुषेयः फलं प्रमा, तत्साधनं प्रमाणम्, इति। एतेन संशयविपर्ययस्मृतिसाधनेष्वप्रसंगः' इति।

शैवास् तु प्रत्यक्षानुमान-शब्दानां त्रयाणाम् एव प्रमाणताम् अङ्गीकृत्य संशय-विपर्यय-स्मृति-व्यतिरिक्ता प्रमापर-पर्याया अस्मच्चिच्छक्तिर् इति प्रमाण-सामान्यलक्षणं मन्यन्ते। तदुक्तम्—

द्व्यालम्बा संशयो बुद्धिः समानाकारदर्शनात्।
विपर्ययोऽन्यथाज्ञानमतद्रूपप्रतिष्ठितम् ॥

अनुभूतार्थविषया मतिः स्मृतिरिहोच्यते।
एभिर्विहीना चिच्छक्तिः प्रमाणत्वेन कल्पिता॥

प्रत्यक्षम् अनुमानं च सह-शब्देन शाङ्करे' इति च। एतेनैव स्मृतेः प्रमात्वं निरस्तम् इति प्रतीयते। स्मृतिर् एषा च सत्त्व-रजस्तमसां साम्यावस्था प्रकृतिः, ततश्चित्तं त्रिगुणात्मकं जायते। अस्माद् एव चित्त-तत्त्वाद् उद्भूत-सत्त्वं न्यग्भूतरजस्तमस्कं बुद्धितत्त्वम् उपजायते। सा च बुद्धिः शैव-सम्प्रदाये षट्त्रिंशत्-तत्त्व-मध्ये तत्त्वम् एकम इति। सा बुद्धिर् द्विविधा अध्यवसायिनी अनध्यवसायिनी च। स्मृति-जनक-संस्काराश्रया बुद्धिर् एव। तस्या एव सात्त्विकी वृत्तिः 'स घटः' इत्याकारा स्मृतिः। धर्मज्ञानादयो हि बुद्धेर् गुणास् ते च वृत्तिपदभाजो द्वादशशत-संख्याकाः। तत्र सन्तोषार्जव-शौच-व्यवसाय-क्षमा स्मृति-सौहित्यौत्सुक्य-दान्ति-शान्त्यादयः सत्त्व-वृत्तयः[1]।

---

१. कश्चिदत्राह—स्मृतिरपि न प्रमाणं प्रमा वा, यतो हि पूर्वानुभवेन 'अयं घटः' इति वर्तमानो घटो विषयीक्रियते स्मृत्या तु पूर्वावस्था-विशिष्टः स घटः' इदानीं विषयीक्रियते तथा च पूर्वावस्थाधारत्व-विशिष्टस्य घटस्य पूर्वावस्थाधारत्व-विशिष्टतया विषयीकरणात् स्मृतिरप्रमा, अनुभवस्तु प्रमा यथार्थबोधत्वात्।

मीमांसायाम्—

भाट्टाः—अनधिगतार्थाधिगन्तृ प्रमाणम्' अर्थात् कारणादोष-बाधक-ज्ञानरहितम् अगृहीत-ग्राहि ज्ञानं प्रमाणम् इति मन्यन्ते। तत्र यत् पूर्व-विज्ञानं तस्य प्रामाण्यम् इष्यते। तदुपस्थान-मात्रेण स्मृतेः स्याच् चरितार्थता' इति श्लोकवार्तिकानुसारं गृहीत-ग्राहकत्वात् स्मृतेः प्रामाण्यं न प्रोचुः।

प्राभाकराः—अनुभूतिश्च नः प्रमाणम (बृहती १।१५) 'अनुभूतिः प्रमाणं सा स्मृतेरन्या। स्मृतिः पुनः पूर्वविज्ञान-संस्कार-मात्रजं ज्ञानम् उच्यते इत्य् एवं स्मृतेः प्रामाण्यं निराकुर्वन्।

बौद्धाः—प्रमाणम् अविसंवादि ज्ञानम् अर्थक्रियास्थितिः। इत्यनुसारम् अविसंवादः अनुभवः प्रमा इति[2]। अज्ञातार्थज्ञापकं प्रमाणम्[3] इति, लक्षणानुसारं च मीमांसकवद् गृहीत-ग्राहकत्वात् स्मृतेः प्रामाण्यं नेति संगिरन्ते। उक्तञ्च 'गृहीतग्रहणान्नेष्टं संवृत्तम्' इति। मूलबीजन्त्व् अत्र सौगत-दर्शने विकल्प-ज्ञानानाम् अप्रामाण्यात् स्मृतेर् न प्रामाण्यं, तस्या अपि विकल्परूपत्वात्।

वेदान्तिनः—प्रमात्वम् अप्रमात्वम् उभयम् अपि स्मृतेः स्वीकुर्वन्ति। उक्तञ्च वेदान्तपरिभाषायाम्—'स्मृतिव्यावृत्तं प्रमात्वम् अनधिगताबाधित-विषयज्ञानत्वम्, स्मृतिसाधारणं त्वबाधित-विषयज्ञानत्वम्' इति। मन्येऽस्मिन् मतभेदे मूलतः यथार्थानुभवो यथार्थज्ञानं वा प्रमा इति चिरन्तन-प्रवाह एव बीजम्। क्वचिद् अस्याः प्रमात्वम् एवोक्तम्—

अत्र वेदान्तिनः प्राहुः—'स्मृतिर् अपि प्रमाणम् एवेति' इति। एतेन स्मृतेः प्रमा-रूपत्वेन प्रमाकरणत्व-रूप-लक्षणाक्रान्तत्वाद् अनुभवस्यापि प्रत्यक्षादिवत् प्रमाणान्तरत्वम् इष्टम् एव। अत्र प्रमाणेन प्रमैव ग्राह्या भावे ल्युड्विधानात्। अद्वैतमते स्मृतेः संस्कारजन्यत्वं; परोक्षज्ञानत्वं, दोषाजन्यत्वम् असन्निहित-विषयत्वम् इति स्वीकृतम्।

---

१. षड्दर्श० पृ० २.९; सिद्धा० चन्द्र० पृ० २०।
२. खं० खं० खा० पृ० २५१।
३. प्रमा० समु० पृ० २१।

माध्वाचार्यानुयायिनस तु—स्मृतेः प्रामाण्यम् अङ्गीकुर्वन्ति। अत्र वादान्तर-निरसन-पूर्वकम् आनन्दतीर्थ-विरचिते प्रमाणलक्षणे स्मृतेः प्रामाण्यं साधु व्यवस्थापितं वर्तते। तन्मते स्मृतिः खलु मानस-प्रत्यक्ष-जन्या[1] न तु संस्कारजन्या। द्विविधं हि ज्ञानं मनो जनयति। तत्तदिन्द्रियाधिष्ठातृत्वेन तत्तदिन्द्रिय-विषयं ज्ञानं जनयति, स्वातन्त्र्येण स्मरणं च जनयति। संस्कारस् तु सहकारिमात्रं प्रत्यासत्तिमात्रं वा। अतीतादि-विषयक-योगि-प्रत्यक्षज्ञानवत् सन्निकर्षाभावेऽपि अतीते विषये मानस-प्रत्यक्षताऽस्ति। गृहीत-ग्राहकत्वेऽपि तस्याः स्मृतेः प्रत्यक्षादि-सिद्धार्थानुवादकस्य 'अग्निर् हिमस्य भेषजम्' इत्यादेर् इव प्रामाण्यं[2] वर्णितं। प्रमाण-लक्षणेऽन्येषां प्रमा-प्रमाण-लक्षणं दूषयन्त आनन्द-तीर्थीयाः 'याथार्थ्यम् एव प्रामाण्यम्' इति व्यवस्थापयन्तः स्मृतेः प्रामाण्ये श्रुतिम् अप्य् उदाजहुः—

स्मृतिः प्रत्यक्षम् ऐतिह्यम् अनुमानं चतुष्टयम्।
प्रमाणम् इति विज्ञेयं धर्मार्थिभिः बुभूषुभिः ॥ इति

यदि स्मृतिर् न प्रमाणं तर्ह्य अनुभूतम् अप्य् अप्रमाणं स्यात्। अनुभूतं मयेदम् इत्यत्र स्मृतिं विना प्रमाणाभावात्।

जैनास् तु प्रत्यक्ष-परोक्ष-प्रमाण-द्वय-मध्य-परोक्षान्तर्गता स्मृतिर् अपि प्रमाणम् इत्य् आमनन्ति। सा च वासनोद्बोध-हेतुका तदित्याकारा। अर्थाद् आवरणाक्षेपोपशम-सदृश-दर्शनादिसामग्री-लब्ध-प्रबोधा वासना स्मृतिं जनयति नत्व् अनुद्बुद्धौ[3]। संस्कारो वासना धारणा भावना इत्य् अनर्थान्तरम्। स घटः, सा शाटी, तत् कुण्डलम्, इत्य् उल्लेखवती मतिः स्मृतिः। तत्प्रामाण्ये चोक्तम्—

---

१. मानसप्रत्यक्षजा स्मृतिः, प्र० ल० पृ० १७।

२. अन्यत्रापि माध्वाचार्यानुयायिनस्तु स्मृतिर्मनोजन्या न तु संस्कार-जन्या, संस्कारस्तु तदर्थसन्निकर्ष एव। यथा योगीन्द्रियाणां योगजो धर्म इत्याहुः। प्र० प० पृ० ६।

३. स्मृत्यनुवादयोर्नाप्रामाण्यम्, प्र० ल० पृ० १७।

४. प्रमाणमीमांसायाम् १,१,२७९; १०,१,२,९; २,३ सूत्राणि।

"सा च स्मृतिः प्रमाणम् अविसंवादित्वात्। नन्व् अनुभूयमानस्य विषयस्याऽभावाद् निरालम्बना स्मृतिः कथं प्रमाणम् ? मैवम्, अनुभूतेनाऽर्थेन सालम्बनोपपत्तेः, यद् अनुभूतनार्थेन सालम्बनत्वेऽपि स्मृतेर् अप्रामाण्यम् आतिष्ठसे तदा प्रत्यक्षस्याऽपि किं नाप्रामाण्यं भवेत्, प्रत्यक्षस्याऽप्य् अनुभूतार्थ-विषयत्वेन निरालम्बनत्वात्। अनुभूत-विषयाऽवभासनं यथा प्रत्यक्षादि-ज्ञानेषु वर्तते तथैव स्मृताव् अप्य् अस्ति। विनष्टो विषयः कथं स्मृतेर् जनकः ? तथा चाऽर्थाजन्यत्वान् न प्रामाण्यम् अस्या इति चेन् मैवं, प्रमाणान्तराणाम् अप्य् अर्थजन्यत्वाऽभावात्। अर्थजन्यत्वाद् ज्ञानस्य प्रामाण्याभ्युपगमे मरुमरीचिकादौ जलज्ञानम् अप्य् अर्थ-जन्यत्वात् प्रमाणं स्यात्। यथैव हि प्रदीपः स्वसामग्री-बल-लब्ध-जन्मा घटादिभिर् अजनितोपि तान् प्रकाशयति तथैवावरण-क्षयोपशम-रूप्यपेक्षेन्द्रियानिन्द्रिय-बल-लब्ध-जन्य-संवेदनं विषयम् अवभासयति। योगि-ज्ञानस्यातीतानागतार्थ-गोचरस्याऽर्थाजन्यस्यापि प्रामाण्यं प्रति विप्रतिपत्तेर् अभावात्। किञ्च स्मृतेर् अप्रामाण्ये अनुमानाय दत्तो जलाञ्जलिः, स्मृत्या व्याप्तेर् अविषयीकरणे तदुत्थानायोगात्, लिंग ग्रहण-संबन्ध-स्मरण-पूर्वकम् अनुमानम् इति हि सर्ववादि सिद्धम्। ततश् च स्मृतिः प्रमाणम्"[१]।

एतान् शास्त्रीय-पक्षान् संक्षेपतोऽत्र न्यस्य विषयेऽस्मिन् कश्चन स्वकीयो विचारोऽधुना निधीयते। तद् यथा—स्मृतेर् अप्रामाण्याङ्गीकारे लोकव्यवहाराभावः, गृहीत-ग्राहकता, अनर्थजन्यत्वम् इति त्रीणि कारणानि वादिनां मुख्यरूपेण सन्ति। तत्र नैयायिकपु आचार्यमिश्रपादोदयनाचार्यौ स्मृतेः प्रमात्वानङ्गीकारे लोक-व्यवहाराभाव एव हेतुर् इति मुख्यतयाऽगादिष्टाम्। किन्तु तादृशो लोकव्यवहारोऽधुना दृष्टि-पथे नागच्छति यस्मिन् यथार्थ-

---

१. सर्वार्थसिद्धिः १,१५; विशेषावश्यकभाष्यम् पृ० १८८–९८९; प्रमाण-परीक्षा पृ० ६९; परीक्षा-मुखम् ३,३; प्रमाणनयतत्वालोकः ३,३; स्याद्वादरत्नाकरः ३,४ इत्यादि जैनतार्किकग्रन्थेषु स्मृतेः प्रमात्व-प्रामाण्यविचारे विस्तरेण पूर्वपक्षोक्तान् दोषान् सयुक्तिकं निरस्य स्वपक्षस्थापनं कृतम्। एवं न्यायाव० १ प्र० न० १,२ इत्यादिग्रन्थेषु तथैव प्रमाणलक्षणं वर्तते यस्य समन्वयो निष्प्रत्यूहं स्मृतौ भवति। अर्थात् स्मृतिप्रामाण्ये समेषां जैनदार्शनिकानाम् ऐकमत्यम् इति।

स्मृतेः सत्यतायां सन्देहः। मन्ये शास्त्रीय-परिभाषा-मर्यादान्वितो लोकः प्रमात्व-परिभाषा-परिधि-बहिर्गतत्वाच् शास्त्रीय-व्यवहारे स्मृतिं प्रमात्वेन नाङ्गीकरोतीति, किन्तु सामान्य-लोकस् त्व् अनुभव-तुल्यम् एव यथार्थ-स्मृति-स्थानं व्यवहारे मन्यते, तथैवाचरन् व्यवहार-समये शास्त्रीयापि जनोऽवलोक्यते। जयन्तभट्टेन अर्थजन्यत्वाभाव एव कारणं स्मृतेर् अप्रमात्वेऽङ्गीकृतम्। एवं सति तत्र किम् अनुमानादीन्य् अर्थजन्यानि? न सन्ति चेत् तर्हि यथा तेषाम् अर्थजन्यत्वाभावे प्रामाण्यम्, तथैव स्मृतेः प्रामाण्ये का बाधा।

मीमांसका अन्ये च गृहीत-ग्राहकत्वाद् अप्रमात्वम् अस्या मन्यन्ते। गृहीत-ग्राहकत्वे यद्यप्य् अपूर्वता कापि नास्तीति स्वीकारेपि स्मृतेर् यथार्थतायां बाधा नावलोक्यते ययाऽस्या याथार्थ्यं विहन्येत। एवं स्मृतेः सत्यत्वे सिद्धेऽपि सत्यतातिरिक्ता यदि काप्य् अन्या प्रमास्ति सा मास्तु, किन्तु सत्यतारूपा प्रमा तु वर्तत एव। अपि च न तावद् गृहीतार्थ-ग्राहकतया प्रामाण्यं न स्यात्। एवम् अनुमानस्याऽपि केनचिद् अंशेनाधिगतार्थाधिगम-संभवेन प्रामाण्यं न स्यात्। व्याप्ति-ज्ञान-प्रतिपन्ने वस्तुन्य् अनुमानं प्रवर्तत इति। एवं सति यद् अन्यत्र प्रामाण्यं तर्हि स्मृतौ का हानिः।

अन्यद् अपि विचारणीयम्—प्रत्यभिज्ञायां स्मृति-सत्त्वेपि याथार्थ्यं प्रति न केऽपि मुह्यन्ति तर्हि केवलायां स्मृतौ कथं सन्देहावसरः। यत्र स्मृतौ याथार्थ्य-सन्देहः सा न स्मृतिर् अपि तु स्मृत्याभासः प्रत्यक्षाभास इव।

वैशेषिकनये 'अदुष्टं विद्या' इति 'बुद्धयन्तर्गत-विद्या-प्रभेदस्मृतिश् च' इत्यादिना स्मृतेर् याथार्थ्यम् उपवर्णितम्। एवं विचारे क्रियमाणे सति समायात्य् एतद् यत् स्वस्वशास्त्रीय-पारिभाषिक-मर्यादां विहाय विचार-स्वातन्त्र्ये स्मृतेः प्रामाण्यं प्रमात्वं अनुमानोपयोगित्वञ्चेत्यादि निर्विवादं वर्तते।

श्रीमहात्मा गान्धी

श्रीस्वयंप्रकाशशर्मा*

महोत्सवो जन्म-शती-निमित्तको
महात्मनो यस्य महीयतेऽधुना।
स वीर-गान्धी पतितात्मपावनः!
सुखं पवित्रां गिरमातनोतु मे॥

स्वमातृभूमिं परतन्त्रतां गतां
प्रपीडितां कूटकुशासकैर्भृशम्।
विमोचयामास स सत्यमाश्रयन्
शमेन गान्धी भुवि विश्रुतो महान्॥

स्वदेश-मुक्त्यै खलु पारतन्त्र्यतः
पुनः पुनर्बन्धनमागतो मुदा।
परस्य पीडां परिहर्तुमुत्सुकः
स्वयं समुत्पीडनमालिलिङ्ग यः॥

दरिद्र-दारिद्र्य-निवृत्तये स्वयं
दरिद्र-नारायण-रूपतां गतः।
प्रपूरयेयुर् जठरानलं जना
इतीव गान्धी स सदाव्रतं दधे॥

स दण्डधारी न च दण्डदायकः
स साधुवृत्तिर्न कषाय-वस्त्रकः।
तनुं तनु बिभ्रदपि क्षमाधरो
ददर्श गान्धी समभावतो जनान्॥

---

*शास्त्री एम. ए. साहित्याचार्य, २६/५ रुड़की रोड़, कैम्प मरठ कैण्ट।

क्रतुः कृतो येन कदापि न क्वचित्
स्वयं तु तत्कृत्यमगात् क्रतु-श्रियम्।
स विश्वधर्मान् सकलानपि श्रयन्
न धर्मभेदं तिरयाञ्चकार ॥

परापरेषां गणनात् परे स्थितः
सदैव मेने वसुधां कुटुम्बकम्।
स सत्वभावात् समतां समेधयन्
रसं प्रपेदे रसिकः कविर्यथा ॥

स सत्यनौकामधिरुह्य निर्भयं
ततार विघ्नाब्धिमहोर्मिजालकान्।
भयं न भेजे बहुधा विभीषितो
जहौ च नीतिं न कदापि लोभितः ॥

मनाक् स वाचा मनसा च कर्मणा
परस्य हिंसां चकमे न कर्हिचित्।
सदा प्रजानां सुखसाधने रतो
जगाम बापूरिति विश्रुतिं भुवि ॥

जपंश्च भक्त्या हृदि रामनाम यो
जहौ मुदासूनपि न प्रणं पुनः।
स्थितः स कीर्त्या वपुषा मृतोऽपि सन्
चिराय गान्धी जयताज्जगत्त्रये ॥

कवित्वे कवित्वे ध्वनिर्ध्वनीति

शिवप्रसादोभारद्वाजः*

'कवृ वर्णे' इति धातोर् निष्पन्नस्य वर्ण-रचना-विशेष-समुपदार्शित-प्रतिभावैशिष्ट्य-प्रकल्पित-नव-निर्मिति-विचक्षणस्य[1] 'पश्य देवस्य काव्यं न ममार न जीर्यति[2] इत्य् उक्तरीत्या सम्भवाऽसम्भवोभय-विलक्षण-कृत्युत्पादन-सतत-गृहीतक्षणस्य विश्वसृजः सकर्मतया 'कविर्मनीषी परिभूः स्वयम्भूर्[3] इत्यादिभिः समान-विशेषणैर् उपबृंहित-प्रभावस्य 'कवि'-संज्ञस्य लोकोत्तर-रचना-निपुणतया[4] सम्भावितस्य प्रजापतेः सहृदयैक-समास्वाद-प्रमेय-परमार्थ-रूपायाः काव्यसृष्टेः कोऽपि महिमा तदेवंविदां काव्यविदां स्फुट एवेति नाऽत्र कश्चन संशीति-लेशाऽवकाशः।

अपरे काव्य-संसारे कविरेकः प्रजापतिः।
यथाऽस्मै रोचते विश्वं तथैतत् परिवर्तते॥[5]

इत्येवं प्रामाणिक-प्रमापित-दिशा वाङ्मयीयं काव्याऽभिधा ध्वनिमय्य् अप्य् अर्थानुरोधिनी समुपाश्रित-लक्षणाऽपि अबाधित-तात्पर्या च परिगृहीताऽलङ्कारा गुणाभिनिवेशिनी च, सार्थीकृतसकल-पदार्था चमत्कारैकग्रहिला च उपाधिशक्तिमती व्यक्त्येकपक्षपातिनी वस्तुप्रतिपादिनी रसाऽऽत्मा स्वकीयेन महिमाऽतिरेकेण परमेष्ठिनोनन्तां प्रत्यक्षां सुखदुःखादि-विविधानुभूतिभावितां भूतिमयीं कृतिम् इमां विडम्बयतीव। यथोक्तं मम्मटभट्टैः—

नियति-कृत-नियम-रहितां ह्लादैकमयीम् अनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितमादधती भारती कवेर्जयति॥[6]

---

*एम. ए. एम. ओ. एल., प्राध्यापकः वि. वै. संस्थान साधु आश्रम होशियारपुरम्।

---

१. तुलनीयम्– नियातकृतनियम-रहितां०।
२. ऋग्वेदे १,५५,५। ३. यजुर्वेदे, ४०,८। ४. काव्यप्रकाशे १ आनन्दाश्रम-संस्करणे प्रयोजन-प्रसङ्ग पृ० ६। ५. ध्वन्यालोके ३, (चौखम्बा संस्करणे) पृ० ४९। ६. काप्र० १,१।

किंकृतं चैतत् तस्या वैलक्षण्यम् इति चेत चमत्कारैकमूलम् इति ब्रूमः। चमत्कारस् तु परस्ताद् उल्लिख्यमानया जगन्नाथोक्तदिशाऽभ्युपेयः। यथा—

'लोकोत्तरत्वं चाऽऽह्लादगतश्चमत्कारत्वाऽपरपर्यायोऽनुभव-साक्षिको जाति-विशेषः[1]'।

एवम् आह्लादवर्तिनी लोकातिशायितैव चमत्कार इत्यायातम्। काव्यस्य च भावाऽनुरोधितया लोकाऽतिक्रान्त-वस्तुसतत्त्वाऽर्थविशेष-बोधाऽऽलम्बनोऽयं चमत्कारः स्यात्। तद्वशेनैव हि सततं यथावद् उपलभ्यमानोऽपि अयं काव्यलोकः 'नवो नवो भवति जायमान' इत्य् उक्तिविषयताम् आपद्यते। यदुक्तम् —

भावानचेतनानपि चेतनवच् चेतनान्यचेतनवत्[2]।
व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया॥

विलक्षणो हि काव्यमार्गो यत्र वक्र एव पन्था विदग्धैर् भावाऽभिव्यक्तये आस्थीयते। अर्थस्य सर्वथाऽभ्युपेयत्वेऽपि कोऽपि सहृदय-हृदयाऽऽह्लाद-जनकः प्रकारस् तस्याः कवि-भणितेर् विषयो यं प्रकाश्य तदीया कृतिर् अपूर्वं काव्य-व्यपदेशम् अधिगच्छति। न खलु सर्व-साधारण-सुलभो रथ्या-वृक्षायितोऽर्थः काव्ये चमत्काराऽऽवहो यं तावद् दण्डी 'कन्ये कामयमानं मां न त्वं काभयसे कथम्'[3] इत्यादिनोपहसति। परिपक्व-भावना-शालि-सहृदयमात्र-संवेद्यो नाऽतिगूढोनाऽतिस्फुटश् चार्थ-विशेषः काव्ये किमपि कामनीयकम् आनयति नाम। यथाऽभिहितम् अभियुक्तैः—

नाऽऽन्ध्रीपयोधर इवाऽतितरां प्रकाशो
नो गुर्जरी-स्तन इवाऽतितरां निगूढः।
अर्थो गिरामपिहितः पिहितश्च कश्चित्
सौभाग्यमेति मरहट्ट-वधूकुचाभः॥[4]

स हि तावद् अवगुण्ठनीकृत-चीनांशुकाऽस्फुटोपलक्ष्यमाण-ललना-वदनाऽभिरामो लक्षयतां चाकचक्यम् एवाऽऽस्पादयति कम् अप्य् आस्वादाङ्कुर सुरसिकानाम्।

---

१. रस-गङ्गाधरे (चौखम्बा-संस्करणे) पृ० १०।

२. ध्वन्या० ३, पृ० ४९८। ३. काव्यादर्शे १,६३। ४. ध्वन्यालोके दीधिति-टीकायां पृ० ७३

स चार्थः सहृदय-शिरोमणिभिः प्रतीयमान उपदिष्टः काव्य-सर्वस्वायितः। यथा—

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥[1]

सर्व-सामान्यम् आबालवृद्धं च निष्कुतूहलं लक्षितेभ्योऽवयवेभ्यः पृथग् एव विलासिनीनां तनौ रसिकजन-मात्रानुभूताऽसामान्य-चारिममय-लावण्यच्छटेव तत् प्रतीयमानं वस्तु भातीति प्रतिपादनेन तस्याऽर्थस्य व्यतिरिक्तत्वं कतिचित्सहृदयमात्रोपलक्षणीयत्वं च साधितम्।

असौ च प्रतीयमानोऽर्थः शास्त्रकारेण ध्वनिर् इति संज्ञया परिभाषितः। किंमूला चेयं संज्ञेति विचारणीये वयम् इत्थं प्रतीमः। अर्थस् तावद् बुद्धि-वेद्योऽपि सन् शब्दाश्रित इति न स्यात् कस्यचनाऽत्र विमतिः। शब्दः खलु वर्ण-निष्पन्नः, वर्णाश् च श्रुति-विषया इति तेषां ध्वनिरूपत्वं स्फुटम् एव।

ध्वनि-सिद्धान्तस्य प्रेरणा वैयाकरणानां सकाशाद् अलम्भि ध्वनिकारेणेति तेन स्वयम् एव सडिण्डिमघोषं घोषितम्[2]। महाभाष्यकृता ध्वन्यात्मकानां वर्णानां पूर्वं ध्वनिरूपेण प्रतिपत्तिर् उक्ता। पूर्वाऽपरभाविनां तेषाम् उच्चारणाऽनन्तरं विनाशितया वीचिसन्तानन्यायेनोत्तरोत्तरं श्रूयमाणैस् तैर् निष्पन्नाः शब्दाः संस्कारवशाद् अन्ततः सार्थकं शब्दं बोधयन्ति। एवंजाता शब्दात्मिका प्रत्यभिज्ञा स्फोट-संज्ञया व्यवहियते स्फुटति अस्माद् अर्थ इति स्फोट इति व्युत्पत्त्या[3]। अत्र स्फोट-शब्दः खलु ध्वनिवाचकत्वेन

---

१. ध्वन्यालोके १,४। २. प्रथमे हि विद्वांसो वैयाकरणाः व्याकरण-मूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवाऽन्यैस् तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिर् वाच्य-वाचक-संमिश्रः शब्दात्मा काव्यम् इति व्यपदेश्यो व्यञ्जकत्व-साम्याद् ध्वनिर् इत्य् उक्तः। तत्रैव पृ० १३३–३५।

३. अवस्थिता वर्णा द्रुत-मध्य-विलम्बितासु···एवं तर्हि स्फोटः शब्दः। ध्वनिः शब्दगुणः। कथम्? तद् यथा भेर्याघातो भेरीम् आहत्य कश्चिद् विंशति पदानि गच्छति कश्चित् त्रिंशत् कश्चिच् चत्वारिंशत्। स्फोटस् तावान् एव भवति। ध्वनि-कृता वृद्धिः। महाभाष्ये १,१,७०।

वर्णपरः। तथा श्रूयमाणा नादशब्दवाच्या वर्णाश् चाऽन्त्यबुद्धिग्राह्य-स्फोटाऽभिव्यञ्जका ध्वनिशब्देनोच्यन्ते। यथाऽऽह भर्तृहरिः—

यः संयोग-वियोगाभ्यां करणैरुपहन्यते।
स स्फोटः शब्दजाश् शब्दा ध्वनयोऽन्यैर् उदाहृताः॥

अल्पे महति वा शब्दे स्फोटकालो न भिद्यते।
परस्तु शब्द-सन्तानः प्रचयाऽपचयात्मकः॥

प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा।
ध्वनि-प्रकाशिते शब्दे स्वरूपमवधार्यते॥

अल्पीयसाऽपि यत्नेन शब्दमुच्चारितं मतिः।
यदि वा नैव गृह्णाति वर्णं वा सकलं स्फुटम्॥

शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर् न भिद्यते॥[1]

एताः कारिका अनुसृत्य चतुर्विधः खलु ध्वनिर् आपतति। तथाहि—प्रथमं निरन्तर-श्रूयमाण-वर्णसंस्कारवशाद् अन्ततो गृहीतः शब्दः स्फोटः। घण्टावद् अनुरणनशीलत्वात् शब्दा ध्वनय उच्यन्ते। पुनश् च घण्टानिर्ह्रादाऽनन्तरं श्रूयमाणाऽनुस्वानवत् स्फोटग्रहणानन्तरं योऽर्थो व्यङ्ग्यः सोऽपि ध्वनिर् इत्य् उच्यते। स्फोटस्य व्यञ्जका वर्णा अपि ध्वननाद् ध्वनिशब्द-व्यपदेश्याः। पुनश् च तेषु ध्वनिषु श्रूयमाणेषु वक्तुर् आलस्यादि-कृत उच्चारणव्यापाराभ्यधिकद्रुतमध्यविलम्बितभेद सोऽपि ध्वनिर् इत्युच्यते।

तत्र वैयाकरणाऽभीष्टो ध्वनिः प्रथम-तृतीय-चतुर्थ-प्रकार-पर्यवसितः। आलङ्कारिकाणां तु द्वितीयः प्रकारः प्राधान्येन भावाऽभिनिवेशितया। अस्मद्विचारेण तैर् व्यङ्ग्य-व्यञ्जकार्थे ध्वनि-प्रयोगोऽर्थसाम्याद् एव गृहीतः। तथाहि—वर्णा ध्वनय इति तु सर्वेषाम् एवेष्टम्। तैश् च संवलितैर् निष्पन्नः शब्दोऽपि स्फुटं ध्वनिशब्दवाच्यः। अन्वर्थश् चाऽयं व्यपदेशः। यथा हि घण्टा-भेर्याद्याघातानुपदं स्फुटश्रुतिर् घोषः प्रथमं सर्वैः श्रूयते। अपरक्षणे च विरते तस्मिन् तदनुसारी व्यापकोऽनुनाद-ध्वनिर् अपरुप-

---

१. वाक्यपदीय काण्डम् २।

श्रुतिर् उच्चरति, सोऽपि सर्वैर् एवाऽनुभूयते । ततश् चाऽस्माद् अपि मृदुतरः क्षीणश् च प्रतिस्वनाऽऽकारो विरलोपलक्षितः समाहितैर् एव विभाव्यते । तथैव शब्दः श्रोतृमात्रेण श्रूयते, सन्निहितया महिष्याऽपि च । तत्सहकृतोऽर्थावबोधस् तु बोद्धृणां मानवजातिसम्बद्धानाम् एव जायते न तु महिष्याः । अयं वाच्यार्थः शब्देनाऽनुस्वानितोऽपि नाऽतिप्रयत्नग्राह्यः संकेतग्रहीतृभिः प्रतिपद्यते । शब्दार्थौ काव्यम् आकलयताम् अयम् एव अभिप्रायो यथा शब्दमात्राऽभिनिवेशे न खलु काव्यत्वव्यवहारः । तत एव चित्रकाव्ये सत्याम् अपि अर्थप्रतीतौ निबद्धुर् आग्रहः शब्द-योजना-प्रकारे विद्यमान इदं निकृष्टकोटौ पातयति, आन्ध्रीपयोधरेण गुर्जरीस्तनेन चैतयोर् एव क्रमोदितयोः काव्यप्रकारयोः साम्यम् । द्वितीयायां विधायां च अर्थानुसंधानबलाद् एव काव्यत्व-व्यवहारो नाऽन्यथा । अर्थशून्यस् तु व्यापारोऽजागलस्तनवत् काव्ये निष्प्रयोजन एव ।

वाच्यार्थ-प्रतिपत्त्यनन्तरं च वृत्ते प्रतीतिपर्यवसाने तृतीय-श्रेणिगतनादाऽनुस्वान-कल्पः सम्पन्नोऽर्थबोधः काव्यचमत्कारैक-कल्पतरुः कविशिरोमणि-प्रतिभा-संरम्भ-विषयः पूर्वोक्त-प्रकार-चतुष्टय द्वितीयं स्थानं भजति । अस्य प्रतिपत्तिश् च ध्वननव्यापाराश्रितेति, ध्वनि-संवेद्येति च कृत्वाऽयं काव्य-विशेषोऽपि ध्वनि-व्यपदेशभाक् । एतत् कृत्वैवाऽभिनवेन ध्वनि-शब्दोऽत्र चतुर्धा व्युत्पादितः[1] ।

काव्य-विशेष इति वचनं चाऽत्राऽर्थस्याऽपि काव्यशरीरत्वेन स्वीकारोक्तिं पुरस्कृत्योक्तम् । अतो नाऽत्र एको न द्वाव्[2] इति व्यवहारापत्तिः कल्पनीया । अर्थावगतेर् हि शब्द-साहाय्य-पुरस्कृतत्वात् । तस्माद्

---

१. 'गाम् अश्वं पुरुषं पशुम्' इतिवत् समुच्चयोऽत्र चकारेण विनाऽपि । तेन वाच्योऽपि ध्वनिः, वाचकोऽपि शब्दो ध्वनिः, द्वयोर् अपि व्यञ्जकत्वं ध्वनतीति कृत्वा । संमिश्र्यते विभावादिसंवलनयति व्यङ्ग्योऽपि ध्वनिः ध्वन्यत इति कृत्वा । शब्दनं शब्दः शब्दव्यापारः, न चाऽसाव् अभिधादिरूपः अपि त्व् आत्मभूतः, सोऽपि ध्वननं ध्वनिः । काव्यम् इति व्यपदेश्यश् च योऽर्थः सोऽपि ध्वनिः, उक्तप्रकारध्वनिचतुष्टयमयत्वात् । इति । लोचने पृ० १३५ ।

२. तुलनीयं रसगङ्गाधरे काव्य-लक्षण-प्रघट्टकम् ।

एवं ध्वनिवादिभिर् आचार्यैः शब्दानां वाचक-लक्षक-व्यञ्जकेत्युपाधित्रय-भाक्त्वम् उक्तम्[१]।

शब्दस्य काव्यशरीरस्वीकारेऽपि कवीनाम् अर्थ-विशेष-प्रकाशन एवाऽभिनिवेशः तस्यैव चमत्कार-प्रवणत्वात् काव्य-जीवातुभूत-रस-प्रति-पत्त्याश्रयत्वाच् च। रसादिरूपो ध्वनिर् हि काव्यात्मतया प्रतिपन्नः[२]। एवं ध्वनिः काव्यस्याऽऽत्मा प्रधानभूतं प्रयोजनम् इत्य् आयातम्। वाच्यार्थश् च प्रथमकक्षाऽवगाही रस-प्रतिपत्तेः पूर्वं द्वारम्। अत एव रसस्य अभिन-वोक्तदिशा मुख्यार्थत्वेऽपि[३] तस्य मुख्यत्वेन व्यपदेशः। अनयैव सूक्ष्मे-क्षिकया तत्रभवान् आनन्दवर्धनोऽर्थं काव्यात्मतया गणयन् तं द्विधा व्यभजत्[४]। विश्वनाथस् तु तद्-आशयाऽपरिज्ञानाद् वा ईर्ष्याकषायित-मनस्कत्वाद् वा गजनिमीलिकया वा तं वृथैवाऽऽचिक्षेप[५]।

रस-ध्वनिस् त्रिरूपो वा ध्वनिः काव्यस्यात्मा

विश्वनाथः काव्य-लक्षण-निरूपणप्रसंगे 'ध्वनिः काव्यस्यात्मा' इति ध्वन्यालोक-वचने शङ्कातङ्कम् उदटङ्कयत्। तदनुसारेण रसादिरूपो ध्वनिर् एव काव्यात्मा न तु त्रिरूपः। वस्त्वलङ्काररूपं ध्वनिं विस्तरशो निरूपयन्न् अपि नासौ काव्य-कोटौ पातयति यत् सर्वथा तथाऽऽपेतं सम्प्रदाय-विरुद्धं च परम् एतत् प्रघट्टकान्तरे विचारयिष्यते। सम्प्रति त्व् एतावद् एव वक्तव्यं भवति यथा स्वयम् आनन्दवर्धनो यदा रसादि-लक्षणं ध्वनिं स-डिण्डिम-घोषं काव्य-जीवातु-भूत घोषयति तदा किं तत्र नूतनं विश्वनाथस्य

---

१. शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रितः।
एकस्य व्यञ्जकत्वे तद् अन्यस्य सहकारिता॥
अन्यच्च—स्याद् वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस् त्रिधा॥
काव्यप्रकाशे २,१।

२. रसभावतदाभासभावशान्त्यादिर् अक्रमः।
ध्वनेर् आत्माङ्गिभावेन भासमानो व्यवस्थितः॥ ध्वन्या० २,३।

३. अर्थ्यत इत्यर्थो रसः। अभिनवभारती ६
तु. मुख्यार्थहतिर्दोषो रसश् च मुख्यस् तदाश्रयाद् वाच्यः। का प्र. ७,१।

४. अर्थः सहृदय-श्लाघ्यः काव्यात्मा यो व्यवस्थितः।
वाच्य-प्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ॥ ध्वन्या १,२।

५. तु. साहित्यदर्पणे काव्यलक्षण-परीक्षा-प्रसङ्गः।

को वा तत्र शङ्का-पङ्काऽवसरः। वस्त्वलङ्काररूपो ध्वनिर् न तेन क्वचित् काव्यात्मतया प्रतिपादित इत्य् अनुक्तेऽपि तस्मिन् का नामाऽस्य अष्टादश-भाषा-वारविलासिनीभुजङ्गस्य विचिकित्साऽर्थभुजङ्गत्व-विलसितम् इदम् इति।

ध्वनिः काव्यस्याऽऽत्मा

वस्तुतोऽपि ध्वनिर् एव काव्ये चमत्काराधायकं प्राणतत्त्वं यदाश्रितं कृतीनां काव्यत्वम्। सर्वसाधारणाऽवबोध्यत्वे वाग्व्यवहार-सामान्ये च वर्तमाने को नाम विशेषो विदग्ध-प्राकृत-भाषितयोः? किंमूला वा ग्राम्यत्व-दोष-प्रसक्तिः स्यात्? कथं च लक्षणामये वक्रोक्ति-प्रयोगे काव्यकृतां साऽऽग्रहा प्रवृत्तिः?

वस्तुतः सत्यस्याऽपि स्वरूपं न तथा नग्नीकृतं चारु भासते यथा — साऽऽवरणम्। नितरां कामनीयकाऽधरीकृतसकलकमनीयतोपमानम् अपि कामिनी-वदनं निरावृतम् आवर्जयति लोकदृशः, चीनांऽशुकाऽवगुण्ठितं तु पराङ्मुखान् अपि लक्षयितुम् उत्कयत्य् एव। तथैव विवक्षितोऽर्थः पुरोभागिवाक्यवन् न स्फुटम् उक्तः प्रकारान्तरेण त्व् अवगमितो व्रजति रसिकानाम् अमन्दाऽऽनन्द-कन्दताम्। यथा ललनानाम् अवयवसंस्थान-विशेषः गौरश्यामादिवर्णश् च सर्वबोध्यो भवति परं कतिपय-शरीर-मात्रवर्ति-लावण्यविशेषस् तत्र सन्निहितोऽप्य् अतिरेकेण भासमानो विदग्धजनमात्र-वेद्यो रागातिशयं जनयति रागिणाम्। सैव स्थितिर् व्यङ्ग्यस्य, तत्प्रत्यायनेऽवबोधे च कतिपय एव कवयो विदग्धाश् च प्रभवन्ति। तस्माद् एव आनन्दवर्धनेन सत्य् अपि गणयितुम् अशक्ये कवि-समाजे द्वित्राः पञ्चधा एव वा महाकविपदभाजः उदिताः[१]। व्यास-वाल्मीकि-कालिदासाः स्वकाव्य-विषयाद् ध्वनिवैशिष्ट्याद् एव सकल-स्पृहणीयं कविकुल-शिरोमणिपदं भेजिरे। यथा—

अतिक्रान्तसुखाः कालाः पर्युपस्थित-दारुणाः।
इवः श्वः पापीयदिवसा पृथिवी-गत-यौवना॥[२]

---

१. येनाऽस्मिन्ननिविचित्रकवि-परम्परावाहिनि संसारे कालिदासप्रभृतयो द्वित्राः पञ्चधा वा महाकवय इति गण्यन्ते। ध्वन्या० पृ० ९३।

२. महाभारतात्। तु. ध्वन्या. पृ० ३५०।

अत्र बहुवचनस्य, आम्रेडितश्चः शब्दस्य यौवनशब्दस्य च लक्षणीयतया व्यङ्ग्यपर्यवसायितयैव च चमत्कारावहत्वम् ।

रविसंक्रान्तसौभाग्यस्तुषाराव्रतमण्डलः ।
निःश्वासान्ध इवादर्शश् चन्द्रमा न प्रकाशते ॥[१]

अत्र सौभाग्य-अन्ध-शब्दौ सकल जनाऽभिनन्दनीय-कामनीयकच्छायादुर्भगत्वातिशयरूपाऽऽशय-ध्वनना्द् एव चारिमाणं जनयतः । तथैव —

नीहारपरुषो लोकः पृथिवी शस्यशालिनी ।
जलान्यनुपभोग्यानि सुभगो हव्यवाहनः ॥[२]

अत्र पद्ये 'परुष-सुभग'-शब्दयोः स्थितिः व्यङ्ग्यार्थ-संस्पर्शाद् एव चारुत्वावहा ।

स्थिताः क्षण पक्ष्मसु ताडिताऽधराः
पयोधरोत्सेध-निपात-चूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
क्रमेण नाभिं प्रथमोदबिन्दवः ॥[३]

अत्र कालिदास-पद्ये वाच्यार्थवशात् प्रस्फुटस्य पर्यायालङ्कारस्य सत्य् अपि चमत्कारे न तथा सहृदय-हृदयावर्जकत्वं यथा प्रतीयमाने पार्वत्याः समाध्यवस्था-विशेषे तद्-द्वारेण च व्यज्यमाने तस्या एवाऽकल्पनीय-सौन्दर्यरूपाऽऽशये । एतद्-अर्थम् एव ध्वनि-लक्षण-प्रस्तावकानन्दवर्धनेन वाच्य-वाचकयोर् ध्वनाव् उपसर्जनीभावः स्फुटं परिभाषितः[४] ।

व्यवहारेऽपिर् लक्ष्यते यथा बहुधा वक्तुर् बोद्धुश् च प्रकरणादिवशाद् वाच्याद् अन्यत्र तात्पर्यं भवति । तच् च प्रत्यक्षतो न कस्याऽपि शब्दस्याऽर्थः शक्तिग्रहसाधनानां तत्र सङ्केते प्रयोजकत्वाऽभावात् । यथा 'निःशेषच्युत' इत्यादौ निषेधस्य विधिरूपोऽर्थो न खलु कोषव्याकरणादिबलाद् आयातोऽपि तु बोद्धव्य-वैशिष्ट्याद् एव । सैव स्थितिर् 'गतोऽस्तम् अर्कः' इत्यादाव् अपि[५] ।

---

१. रामायणे ३.१५,१३ (तु. ध्वन्या. पृ० १७२) ।
२. तत्रैव ३,१५ १५ ।
३. कुमारसम्भवे ५,१५ ।
४ यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥ ध्व. १,१३ ।
५. तु. काव्यप्रकाशे तृतीयः पञ्चमश् चोल्लासः ।

रस-ध्वनिः

रससंविदश् च ध्वनि-मात्र-संभवत्वम् अनुभवसिद्धम् । तथा हि 'क्रुद्धोऽहम्, इति बहुशो ब्रुवतोऽपि जनाद् न कोऽपि बिभेति शब्दमात्रेण तत्र कोपाऽननुभवात् । अनुक्तेऽपि तथाऽनुभावादि-बलाद् एवाऽऽश्रये कोपोदय-भाने ततश् च त्रासस्य उपस्थितिर् त्वरितम् एवोद्भवति । अत एव रसादे रसादिशब्दस्य च शब्दवाच्यत्वे दोष एवाऽभ्युपपन्नो रसाचार्यैः[1] ।

ध्वनि-विषयत्वं च रसादेर् अन्यथाऽपि सिद्धम् । तथा हि लौकिक-रसाऽसाधारण्येन काव्य-रसस्य शब्दार्थ-बोधाश्रितत्वे न कस्यचिद् आपत्तिः स्यात् प्रत्यक्षकल्पत्वात् । एवं प्रतिस्वनवद् रसादेर् अपि शब्दश्रुति-पश्चाद्-भावितया तस्याऽनुनादरूपत्वं सिद्धम् एव । अन्यच् च पारिभाषिकोऽप्य् अयं रस-शब्दः श्लिष्टः प्रतीयते । रसधातुर् हि धातुपाठे स्वदनार्थे शब्दनार्थे च पठितः[2] । अतः श्लेषवशाद् अयम् आस्वादरूपं ध्वनिरूपं चाऽर्थं बोधयति । अभिनवगुप्तोऽपि शब्दप्रादुर्भाव इति पठन् तम् एवाऽऽशयं सूचयतीति मन्ये[3] ।

पाश्चात्य-काव्यशास्त्रे ध्वनिः

न केवलं भारतीयैर् आचार्यैः पाश्चात्य-समीक्षकैर् अपि ध्वन्यर्थस्य सत्त्वं महत्त्वं चाऽभ्युपपन्नम् । यथा क्विन्टैलियन नाम्ना समीक्षकेण अर्थस्य गोपनकला (Art of concealment) काव्यस्याऽनिवार्यं तत्त्वं प्रतिपादितम् । एतच्च भारतीयमते वाच्यार्थस्योपसर्जनीभावेन सह साधु संवदति । होरेस नाम्ना समीक्षकेण नवाऽर्थ-बोधनं काव्य-सौष्ठवाऽर्थेऽपेक्षणीयम् उक्तम् । एतद् अपि वाच्याद् अन्यार्थ-बोधने ध्वनिपक्ष एवाऽऽपतति । आइ. ए. रिचर्डमहाशयश् च शब्दस्य चतुर्विधान् अर्थान् स्वीकरोति—सेन्स, फीलिंग टोन, इन्टेन्शन इति । तत्र प्रथमः खलु वाच्यार्थ एव । चतुर्थो यदि मीमांसक-दृष्ट्या तात्पर्याऽर्थोऽपि स्वीक्रियते तदाऽपि द्वितीय-तृतीयौ क्रमेण

---

१. व्यभिचारिरसस्थायिभावानां शब्दवाच्यता । काव्यप्रकाशे ७,६० ।

२. रस आस्वादन-स्नेहनयोः १९३१ । रस शब्दे ७१३ (सिद्धान्तकौमुदी बालमनोरमा धातुपाठे)।

३. अत एव शब्दप्रादुर्भाव इति शब्दो रसाः पठ्यन्त इति । अ. भारती भागः १ पृ० २६१ ।

रसध्वनि-काक्वादिवशोत्थध्वनिभ्यां संवदतः। अन्यथा चतुर्थोऽपि प्रकरणादि-वशायातो वस्त्वलङ्काररूपो ध्वनिर् एव नाऽन्यत्।

रोमाञ्चक-साहित्योदये च रहस्यभावनायाः (Mysticism) काव्य-क्षेत्रे प्रवेशे सति लक्षणामूला वक्रता तदीयकाव्यभाषाया अङ्गं समजनि प्रतीकात्मिकाया भाषायाश् च प्रयोगस् तत्राऽपरिहार्यो जातः। तद्-वशाच् च व्यञ्जनायाः प्रत्यक्षतो ग्रहणं तत्र सिद्ध्यति। सजेशन (Suggestion) एवं सजेस्टेड सैन्स (Suggested sense) इत्येतौ शब्दौ स्पष्टम् एव व्यञ्जनां व्यङ्ग्यार्थं च बोधयतः। एवञ्च ड्राइडनः तथा एवरक्रोम्बी महाशयः मूर्तपदार्थोत्प्रेक्षणशक्तिं कल्पनां संविद्बोधाय च प्रतीकात्मक-शब्द-प्रयोगं कवेर् अपरिहार्यम् उपकरणं वदन्तौ व्यङ्ग्यार्थसत्तायाः परिपोषकौ।

लौञ्जाइनस-महाशयस्य औदात्त्यसिद्धान्तस्य (Sublimity) विवेचनेऽ-र्थस्योदात्तता-निरूपणं तस्य ध्वन्यमानतायाम् एव परिणमति[1]। भारतीयाऽऽ-चार्यवद् ब्लूमफील्डनामा लेखकोऽपि प्रकरणज्ञानं विशिष्टार्थज्ञाने साधनं स्वीकुरुत एव[2]।

पाश्चात्य-सिद्धान्ते ध्वनि-समर्थकं विशिष्टतमं तत्त्वं कल्पना (Imagination and fancy) लभ्यते यां तदीयसमीक्षकाः काव्यस्याऽसाधारणीं

---

१. डा. राम अवध द्विवेदिनः साहित्य-सिद्धान्तात् (पृ० ४६-४८) साभारं गृहीतम्।

२. If we had an accurate knowledge of every speaker's situation and of every hearer's response we could simply register these two facts as the meaning of any given speeeh utterance and neatly separate our study from all other domains of knowledge.

साहित्य सिद्धान्तात् (पृ० ४८) उद्धृतम्।

शक्तिं स्वीकुर्वते। तत्साहाय्येन हि काव्यकृत् स्वकृतिषु वर्ण्य-वस्तूनां प्रकृतानाम् अप्रकृतानां वा तद्-द्वारेण च स्व-संविदां छविं रूपं वा शब्देषु प्रस्तौति। वाच्यार्थे च विरते वर्ण्य-पदार्थस्य बिम्ब-ग्रहणं ध्वनिनैव संभवतीति प्रकारान्तरेण ध्वनिसिद्धान्तस्य प्रतिपादनं सम्पद्यते। अमूर्तपदार्थानां मूर्तानाम् अपि च पुरस्तात् प्रत्यक्षकल्पत्वेन उपस्थापनं ध्वनिनैव संभवति[1]। एवं कल्पना-प्रसङ्गेन ध्वनिर् एव तैः समर्थितो भवति। अलङ्कारेषु च इनुण्ठो आयरनौ चेति द्वौ व्यञ्जनाया आश्रयौ भवतः।

सकले चाऽस्मिन् विवेचने सम्पिण्डिते निष्कर्षोऽयम् एव यया चमत्कृतिजनकतयाऽसामान्यकृताव् एव काव्यत्व-व्यवहारः सा, च चमत्कृति-जनकता ध्वन्याश्रिता। संस्कृतेतिहासस्य प्रमुखा विभूतयः, वेदाः, रामायणम्, भारतम्, कालिदासस्य बाणस्य भवभूतेश् च कृतयो ध्वनिकाव्यस्योत्तम-निदर्शनानि सन्त्य् एवोत्तमकाव्यव्यपदेशभाजः। अन्येषाम् अपि भारवि-माघ-प्रमुखानां कवीनां काव्यानां परिशीलनेन कवित्वे कवित्वे ध्वनिर् दृश्यते इतीति स्फुटं भवति।

---

१. आचार्य विश्वेश्वर कृत-भाष्य-सहिते ध्वन्यालोके नगेन्द्रलिखिता भूमिका।

नैवेह विद्यते किञ्चिद् यद् धैर्येण न साध्यते

ब्र० याज्ञवल्क्यः*

यद्यपि लोके सुखस्याऽभीष्टत्वात् सर्वत्र सर्वदा मनोवाक्-कायैर् निखिला मनुष्याः स्वेष्टोपलब्धौ प्रयतन्ते पौनःपुन्येन। तथापि सुखस्य मूलं धर्मानुष्ठानम्। नहि कश्चिद् अप्य् अन्तरेण तावद् धर्मानुष्ठानं प्राप्तुम् अर्हति स्वीयम् अभीष्टं सुखम्। नहि कस्यचन मन्दस्याप्य् आत्मनः कृते दुःखाऽवाप्तये प्रवृत्तिर् दृश्यते। इष्टप्राप्त्यनिष्टपरिहारयोः सर्वेषां समानायां प्रवृत्त्यां सत्याम् अपि केचन स्वेष्टम् अधिगच्छन्ति केचन न। केचिद् अनिष्टवारणाय कल्पन्तेऽपरे न। तत्कारणञ्च वरीवृत्यते यथा-सङ्ख्यम् इष्टप्राप्त्यनिष्टपरिहारयोर् धर्मानुष्ठानम् अधर्माऽनुष्ठानञ्च। यथा च क्षुधितस्य भोजनक्रियाम् अन्तरेणोपशाम्यति मनोरथमात्रेण बुभुक्षा। तद्वद् मनोरथमात्रेण धर्मानुष्ठानम् अन्तरेण नहि कोऽपि मनुष्यः स्वेष्टम् अधिगच्छति। तथा चाऽधर्माऽननुष्ठानेनाऽनिष्टपरिहारोऽपि सम्भवति।

धर्मानुष्ठानम् अधर्माननुष्ठानञ्च भवतो धैर्य-पूर्वकम्। धैर्यम् अन्तरेण धर्मानुष्ठानाऽधर्माननुष्ठाने कस्याऽपि व्यवस्थिता प्रवृत्तिर् न जायते तस्याधृत्य-धीनत्वात्। भगवती धृतिर् एव धार्मिकं पाति। सैव एनं धर्मतत्त्वाय कल्पयति। एषैव ब्रह्मचारिणं तत्कर्त्तव्यानुष्ठाने प्रवर्त्तयति। इयम् एव ब्रह्मनिष्ठान् तपो-व्रतान् सदसद्विवेकान् आत्मतत्त्वं प्रदर्शयति। इयम् एव मानवं मानव-कर्त्तव्य-परि-पालनाय नियोजयति। एषा हि समागतासु नाना विपत्सु भयात् त्रायते। अनेकेषु रोगेषु सत्स्व् अपि रोगिणम् इयम् एव मुनक्ति। किं बहुना यत् किम् अपि लोके विलोक्यते कार्य-सिद्धि-फलं तत्कृत्स्नम् एव धृति-माहात्म्यं विज्ञेयम्।

प्रतिपादितं च धृतिप्रभृत्यक्रोधपर्यन्तं दशकं धर्मलक्षणं भगवता मनुना। तत्र दशसु धर्म-लक्षणेषु धृति-पदस्य श्लोकादि-पाठेन धैर्य-माहात्म्यं

*वानप्रस्थाश्रमः, ज्वालापुर।

विज्ञायते। भगवतो मनुमहाराजस्याऽभिप्रायोऽयं दरीदृश्यते तावत् श्लोकादि-पाठेन धृतेर् यत् क्षमादीनि शेषधर्म-लक्षणानि धृतिम् अन्तरेण नाऽनुष्ठीयन्ते। तस्माद् धर्मं जिज्ञासमाना धृतिमन्तो भवेयुः। मनुष्य-जीवन-फलस्य धैर्येणाश्रित-त्वाद् धृति-माहात्म्य-दृढीकरणाय च प्रबन्धेऽमुस्मिन् यथामति प्रमाणपुरः-सरेण मया विचारमाला वितन्यते। तत्र 'धृञ् धारणे' भ्वादिस्थाद् धातोः 'स्त्रियां क्तिन्' इति क्तिन्प्रत्ययं सति रूपस्य सिद्धिः। ध्रियते धार्यते क्षमादिधर्म-लक्षणं यया सा धृतिः। सा चाऽन्तःकरणवृत्तिविशेषः। तथाहि यजुर्वेदे प्रोक्तम्—

यत्प्रज्ञानमुत चेतो धृतेश्च यज्ज्योतिरन्तरमृतं प्रजासु।
यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु॥[1]

सात्त्विकी राजसी तामसी इत्य् एवं धृतिर् भवति त्रिधा। तत्र सात्त्विकी श्रेष्ठा। योगाभ्यास-ज्ञानविज्ञानोपलब्धिर् जायते सात्त्विक्या धृत्या एव। तस्मात् तदुपलब्धये मुमुक्षुभिः परीक्षकैर् महाप्रयत्नैर् भवितव्यम्। तस्या धृत्याश् च भेद-त्रयं गीतासुश्रुताभ्यां व्याख्यायते—

धृत्या यया धारयते मनः-प्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी॥ १॥

यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी॥ २॥

यया स्वप्नं भयं शोकं विषादं मदमेव च।
न विमुञ्चति दुर्मेधा धृतिः सा तामसी मता[2]॥ ३॥

सात्त्विका गुणाः—आनृशंस्यं संविभागा-रुचिता तितिक्षा सत्यं धर्म आस्तिक्यं ज्ञानं बुद्धिर् मेधा स्मृतिर् धृतिर् अनभिषङ्गश् च।

राजासास् तु—दुःखबहुलताऽटनशीलताऽधृतिर् अहङ्कार आनृतिकत्वम् अकारुण्यं दम्भो मानो हर्षः कामः क्रोधश् च[3]।

---

१. यजुः ३४।३। २. गीता—१८।३३-३५। ३. सुश्रुत शारीर० १।२३-२४।

धृतिर् हि धैर्यवन्तं हितप्रद-कर्मणि नियोजयति। धैर्यवांश् च भवति परीक्षकः। यश् च खलु परीक्षको नाऽस्ति स धृतिमान् भवितुं नाऽर्हति। धैर्येण तावद् अनेके शरीर-मानसा रोगा उपशाम्यन्ति। अधैर्येण च रोगा वर्धन्ते। तथा ह्य् आयुर्वेदे प्रोक्तम् —

श्रुतं बुद्धिः स्मृतिर्दाक्ष्यं धृतिर् हितनिषेवणम्।
वाग्विशुद्धिः शमो धैर्यमाश्रयन्ति परीक्षकम् ॥ १ ॥

लौकिकं-नाश्रयन्त्येते गुणा मोहरजः-श्रितम्।
तन्मूला बहवो यान्ति रोगाः शरीरमानसाः[1] ॥ २ ॥

धृतिमान् परीक्षको हि तावद् अधिगच्छति बुद्धि-स्मृति-दाक्ष्य-शम-वाक् विशुद्धि-प्रभृतीन् सुगुणान्। धैर्यवान् नरस् तु धैर्येण शारीरान् मानसांश्चाऽऽमयान् निराकुरुते। धृति-विकले नरि मुहुर्मुहुः क्लेशा निवसन्ति। नहि धैर्येम् अन्तरेण केनाऽपि क्लेशा निवार्यन्ते। धैर्यनाशो हि भवति दुःखहेतुः। तथाहि प्रोक्तम् —

धीधृतिस्मृतिविभ्रंशः सम्प्राप्तिः कालकर्मणाम्।
असात्म्यार्थागमश्चेति ज्ञातव्या दुःखहेतवः[2] ॥ २ ॥

तदेवं श्लोकेनाऽनेन धृतिनाशो दुःखहेतुर् इत्यभिधाय धैर्यभ्रंश-लक्षणं निरूप्यते—

विषयप्रवणं सत्त्वं धृतिभ्रंशान्न शक्यते।
नियन्तुमहिताद्यर्थाद् धृतिर्हि नियमात्मिका[3] ॥

धृतिभ्रंशत्वे सति काम-क्रोध-लोभ-मोहादीनाम् आन्तरिक-शत्रूणां चोर-लुण्ठक-हिंसकादि-बाह्यरिपूणां च प्रशमनोपाया न विज्ञायन्ते। यतोहि कर्तव्याऽकर्तव्यविवेकनिर्णयोऽन्तरेण धैर्यं तावन्न सम्भवति। तस्मात् समस्त-क्लेशकारणं धृतिभ्रंशोऽभिहितः। धैर्यवान् नर एव वेदोक्त-कर्मसु प्रवर्त्तते। स एव स्वयं विद्याऽविद्या-स्वरूपं वेत्ति वेदयति चाऽन्यान् अपि। तेनैव धर्मतत्त्वं लोके प्रतन्यते। तथाहि—

---

१. चरक सूत्र० २८।३७-३८। २. चरक शारीर० १।९८।
३. चरक शारीर० १।१०२।

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु[1] ॥ १ ॥

अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ २ ॥

अन्यदेवाहुर्विद्याया अन्यदाहुरविद्यायाः ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ ३ ॥[2]

याजुषेण मन्त्रत्रयेण प्रकारान्तरेण धीराणां गौरवातिशयं प्रतिपादितम् । तत्र भवन्तो धीरा एव सम्भवाऽसम्भवविद्यासारं विदाङ्कुर्वन्तु नेतरेऽधीराः ।

इतोऽग्रे ब्रह्मचारि-गृहस्थ-वानप्रस्थ-पन्यासिभिश् चतुर्भिर् अप्य् आश्रमिभिर् धृतिमद्भिर् भवितव्यम् इति प्रदर्श्यते । धर्मस्य दशलक्षणानुष्ठानाय चत्वारोऽप्य् आश्रमिणो भगवता मनुमहाराजेन समादिष्टाः । तत्र च दशधर्म-लक्षणान्तर्गते धृति-पदस्य श्लोकादि-पाठेन धैर्यं महत्ता व्याख्याता भगवता मनुना, इति पूर्वम् एवोपन्यस्तम् । तत्त्वविदा मनुवर्येणापि व्याख्यातम्—

चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः ।
दशलक्षणको धर्मः सेवितव्यः प्रयत्नतः ॥ १ ॥

धृतिः क्षमा दमोऽस्तेयशौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥ २ ॥[3]

पूर्वतावत् 'ब्रह्मचारी भवेद् धृतिमान्' इति व्याख्यायते । शास्त्रेषु च ब्रह्मचारिणां कृते तावद् अनुष्ठीयमान-कर्त्तव्यानि वेदाध्ययन-ब्रह्मोपासन-वीर्य संरक्षणानि व्याख्यातानि । तानि सर्वाणि धृतिमता ब्रह्मचारिणा एव कर्तुं शक्यानि । तत्र साधनानुष्ठानकाले सति विपुल वितर्कबाधनभीतिर् मुहुर्मुहुश्चित्तं विकरोति । कथ तत्र धृतिम् अन्तरेणाऽपगच्छेत् तावच् चित्तविकारः ? ब्रह्मोपलब्धये च ब्रह्मचारिणा वेदाध्ययनवीर्य-संरक्षणे क्रियेते । वेदाध्ययने तावद् अस्य अनिवार्यता शिक्षादिवेदाङ्गाध्ययनस्य । तच्च धैर्यम् अन्तरेण न प्रभवति । तस्माद् वेदाध्ययने ब्रह्मचारिणा धैर्यवता भवितव्यम् । आचार्यपाणिनिस् तु स्वस्यां वर्णोच्चारणशिक्षायां धैर्यं ब्रह्मचारिणो गुणरूपेण प्राह—

---

१. यजुः ३४,३; । २. यजुः ४०।१०, १३ । ३. मनुः ६,९१-९२ ।

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥[१]

तदेवं श्लोकेनाऽनेन वेदाध्ययने धैर्यगौरवं व्याख्यातं भवति। अपि च पुरा प्राचीना आचार्याः शिष्योपनयनकाले शिष्यं परीक्षन्ते स्म। तदानीं धैर्य-सम्पन्नं विद्यार्थिनम् एव ते तावद् उपनयन्ति स्म। तथाहि—चरकसुश्रुताभ्यां प्रमाणीक्रियते—

अध्यापने कृतबुद्धिराचार्यः शिष्यमेवादितः परीक्षेत। तद्यथा—
प्रशान्तमार्यप्रकृतिकम···धृतिमन्तम् ॥ १ ॥[२]

ब्राह्मणक्षत्रियवैश्यानामन्यतममन्वयवयः-शीलशौर्यशौचाचार-
विनयशक्तिबलमेधाधृतिस्मृति० युक्तं भिषक् शिष्यमुपनयेत्।
अतो विपरीतगुणं नोपनयेत् ॥ २ ॥[३]

अपि च भगवता पतञ्जलिना व्याकरण-महाभाष्यस्य पस्पशाह्निके व्याख्यातम्—

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि ॥[४]

वेद-ज्ञानाद् ऋते ब्रह्मोपासना-पद्धृतिर् न विज्ञायते। वेदज्ञानञ्च व्याकरणम् अन्तरेण न जायते। वेदाध्ययने पदपदार्थसिद्धिर्निर्णयविवेके भूते हि मन्त्रार्थसम्भवाद् नाऽन्तरेण व्याकरणं वेदार्थप्रक्रिया सङ्गच्छते। व्याकरणञ्च नाम धृतिमन्त एव अधिजिगांसन्ते तस्य नीरसविषयत्वाद् विपुलपरिश्रमा-ऽधीनत्वाच् च। नहि धैर्य-विकलो व्याकरणाऽध्ययने तावत् सुतरां मनोवृत्तिं नियोजितुं कल्पते। यथा च सक्तु कष्टशोध्यं भवति नितरां तथा व्याकरणा-ध्ययनम् अपि। अत्र हि धीरा एव पारयन्ति पारम् इति मन्त्रार्थ-भावः।

वेदाध्ययनाय धैर्य-गौरवं प्रदर्श्य वीर्यरक्षणेऽपि धृति-माहात्म्यं प्रदर्शयामः। आयान्ति च शुक्रसंरक्षायाम् अनेके काम-क्रोध-लोभादि-वितर्काः। तद्वारणे च धैर्यवन्तो ब्रह्मचारिण एव सफलीभवन्ति। समागतेऽ-

१. पाणिनिशिक्षा। २. चरक-विमान० ८।८। ३. सुश्रुतसूत्र० २।३। ४. ऋक् १२।७१।२।

भिमुखीभावे काम-प्रवर्धक-साधनस्य कश्चन धृतिमान् एव काम-पाशैर् न पाश्यते । तथाहि महाभारतादि-ग्रन्थेषु—

कामक्रोधग्राहवतीं पञ्चेन्द्रियजलां नदीम् ।
नावं धृतिमयीं कृत्वा जन्मदुर्गाणि सन्तर ॥ १ ॥

धृत्या शिश्नोदरं रक्षेत् पाणिपादं च चक्षुषा ।
चक्षुः-श्रोत्रे च मनसा मनो वाचं च कर्मणा ॥ २ ॥[1]

धैर्येण युक्तं सततं शरीरं न विशीर्यते ।
विशोकता सुखं धत्ते धत्ते चारोग्यमुत्तमम् ।
आरोग्याच्च शरीरस्य स पुनर्विन्दते श्रियम् ॥ ३॥

ब्रह्मचर्यं तथा सत्यमनुक्रोशो धृतिः क्षमा ।
सनातनस्य धर्मस्य मूलमेतत् सनातनम् ॥ ४ ॥

शूरान्महाशूरतमोऽस्ति को वा मनोज-बाणैर् व्यथितो न यस्तु ।
प्राज्ञोऽथ धीरश्च समस्तु को वा प्राप्तो न मोहो ललनाकटाक्षैः ॥ ५ ॥[2]

कान्ताकटाक्षविशिखा न लुनन्ति यस्य चित्तं न निर्दहति कोपकृशानुतापः ।
कर्षन्ति भूरिविषयाश्च न लोभपाशैर्लोकत्रयं जयति कृत्स्नमिदं स धीरः ॥६॥[3]

उपर्युक्तेन श्लोक-विन्यासेन शुक्रसंरक्षायाम् अस्ति धैर्यस्य महत्त्व अनिवार्यतेति परिस्फुटितम् । समुपस्थितेषु कन्दर्प-साधनेषु येषां विवेक-पथपथिकानां ब्रह्म-तत्त्वनिष्ठानां मनांसि न विक्रियन्ते, ते तत्र भवन्तो नूनं धीरतमा एव भवन्ति । भगवत्या धृत्या तावत् ते सुतरां लोकत्रयं विजयन्ते ।

तदित्थं वेदाध्ययन-ब्रह्मोपासना-शुक्रसंरक्षणानुष्ठाने धैर्यमहत्तां व्याख्याय गृहस्थधर्मानुष्ठाने धृति-माहात्म्यं वितन्यते । गृहस्थाश्रमोचितानि पञ्चमहा-यज्ञादि-प्रतिपादित-कर्तव्यानि च धृतिमता गृहस्थेनैव सम्पाद्यन्ते । नह्य् अन्तरेण धैर्यम् अस्याऽनुष्ठीयमानानि कर्त्तव्यानि परिपाल्यन्ते । गृहस्थो हि भवति तावद् इतरेषु ज्येष्ठः । ज्येष्ठता चास्य पञ्चमहायज्ञेष्व् अधिकार-त्वाद् एव विज्ञायते । तस्य च कारणं भवति धृतिर् एव । तस्माद् महता

---

१. महाभारत उद्योग० ४०।२२, २४। २. शांकरः प्रश्नो० १२।
३. नीतिशतके १०६ ।

प्रयत्नेन गृहस्थैर् धैर्यवद्भिर् एव भाव्यम् । इतरथा हि धैर्यम् अन्तरेणा-ऽऽऽश्रमोऽयं नरकवद् दुःखाकुरुते । तथाहि प्रतिपादितम् :—

अनुबन्धं च सम्प्रेक्ष्य विपाकं चैव कर्मणाम् ।
उत्थानमात्मनश्चैव धीरः कुर्वीत वा न वा ॥ १ ।

सुव्याहृतानि सूक्तानि सुकृतानि ततस्ततः ।
सञ्चिन्वन् धीर आसीत शिलाहारी शिलं यथा ॥ २ ।

वश्येन्द्रियं जितात्मानं धृतदण्डं विकारिषु ।
परीक्ष्य-कारिणं धीरमत्यन्तं श्रीर्निषेवते[1] ॥ ३ ।

पुत्रैर्मित्रैर्गृहैर्दारैर्वियुक्तस्य धनेन च ।
मग्नस्य व्यसने कृच्छ्रे पुंसः श्रेयस्करी धृतिः ॥ ४ ।

व्यसने वाऽर्थकृच्छ्रे वा भवे वा जीवितान्तके ।
विमृशंश्च स्वया बुद्धया धृतिमान् नावसीदति[2] ॥ ५ ।

लोक-प्रसिद्धस्य भगवतो रामचन्द्रस्य सर्वजनप्रियत्वमूलम् अपि धृतिर् बभूव । अनेकेषु क्लेशेषु सत्स्व् अपि तस्य महाभागस्य न कदापि धैर्यगुणो ध्वंसतां गतः । स धैर्येण हिमवान् इवाऽऽसीत् ।
तथाहि रामायणे—

इक्ष्वाकुवंश-प्रभवो रामो नाम जनैः श्रुतः ।
नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी ॥ १ ।

स च सर्वगुणोपेतः कौशल्यानन्दवर्धनः ।
समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव[3] ॥ २ ।

अनेन प्रकारेण गृहस्थाश्रमधर्माऽनुष्ठाने धृति-गुणस्य महत्त्व् अनिवार्यता व्याख्याता भवति । तदनन्तरं वानप्रस्थ-सन्यासिनोः कृतेऽपि धैर्यमहत्ता निरूप्यते । वानप्रस्थाश्रमे च चित्तशोधनाय स्वाध्याय-ब्रह्म-चिन्तनानि शास्त्र-प्रतिपादि-दितानि कर्तव्यानि क्रियन्ते । तत्र साधनानुष्ठान-काले भूरिव्यवधान-सम्भवात् तावन्नाऽन्तरेण धैर्यं तद्-इष्टप्राप्तिः सम्भवति । धीराणां प्रशंसा च गीयते—

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

---

१. महाभारत उद्योग० ३४।९; ३३; ५८ । २. रामायण ।
३. रामायणम् आदि-सर्गः ।

निन्दन्तु नीति-निपुणा यदि वा स्तुवन्तु, लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात्पथः प्रविचलन्ति पदं न धीराः[1] ॥२॥

अपि च सन्यासाश्रम-साधनाऽनुष्ठानायाऽपि धैर्य-निष्ठेन सन्यासिना भवितव्यम्। तुर्योऽयम् आश्रमः। एतस्मिन् ब्रह्मसाक्षात्कार-योग्यता उत्पाद्यते। मुख्यतया ब्रह्मोपलब्धि-प्रयोजनत्वात् तदुपलब्धि-दुर्लभत्वाच् च सन्यासेऽतीव धैर्यस्याऽऽवश्यकता वरीवर्त्ति। सूक्ष्मतमोऽयं विषयः। नाऽत्र केनापि विधैर्येण किञ्चिद् अपि निश्चीयते दुर्ग-विषयत्वात्। योग एव तत्प्रवर्तको भवति। योगसाधनेषु च भगवता पतञ्जलिना धैर्यपदार्थस्य स्थाने सन्तोषः पठितोऽभिन्नार्थकत्वेन। तत्फलम् अपि तत्र व्याख्यातम् —

शौचसन्तोषतपः स्वाध्यायेश्वरप्रणिधानानि नियमाः।
सन्तोषादनुत्तमसुखलाभः[2] ॥

स भगवान् स्वयम् ईश्वरोऽपि धीरतया विलसति। तस्येश्वरस्योपासकेनापि सन्यासिना धृतिमतव भवितव्यम्। ननु चेश्वरो धीरता-विशिष्टो नामेति किम् अत्र मानम् ? तद् उच्यते—

अकामो धीरो अमृतः स्वयम्भू रसेन तृप्तो न कुतश्चनोनः।
तमेव विद्वान्न बिभाय मृत्योरात्मानं धीरमजरं युवानम्[3]।

भगवान् ईश्वरोऽस्ति धीरः। तं धृतिमान् एव समधिगन्तुम् अर्हति नाऽन्यः। तस्माद् धैर्यवान् परिव्राजको भवतु-इति मन्त्रार्थ-भावः। उपनिषत्सु च बहुधा व्याख्यातम् अस्ति यद् ब्रह्मसाक्षात्काराय धृतिमता जिज्ञासुना भवितव्यम्। तथा चोपनिषदि प्रोक्तम् —

श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः।
श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते ॥ १ ।

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति[4] ॥ २ ।

एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति।
तमात्मस्थं येनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥[5] ॥ ३ ।

---

१. नीतिशतके ६३, ८४। २. योग० २।३२; ४२। ३. अथर्व० १०।८।४४। ४. कठोपनिषत् २।२; १२। ५. कठोपनिषत् ५।१२।

आचार्यो भर्तृमित्रः

उदयवीरः*

भर्तृमित्राचार्यस्य नामनिर्देशो बहुत्र विभिन्नदार्शनिक-ग्रन्थेषु समुपलभ्यते। यामुनाचार्यो वैष्णव-सम्प्रदायाचार्य-मूर्द्धन्यः स्वनामधन्यः सिद्धित्रयाभिधायां स्वरचनायां तदुपक्रम एव भर्तृमित्र-नाम निर्दिशति। न्यायमञ्जरीकारो जयन्तभट्टः शब्दस्य नित्यानित्यत्वविवेचन-प्रसङ्गेऽनेकत्र भर्तृमित्रम् उल्लिखति।

तत्र नैयायिकनयः—शब्दोऽनित्यः, विविधैर् निमित्तैर् यथा-कालम् आत्मानं लभते। मीमांसक-मतं पुनः—नित्यः शब्दः, अनुत्पन्न एव सन् तथा-कथितैर् निमित्तैर् आत्मनोऽनभिव्यक्तिताम् अपहाय केवलम् अभिव्यज्यते। जयन्त-भट्टोऽत्र प्रसङ्गे नैयायिकानां तदितर-दार्शनिकानां च शब्दतत्त्व-विवेचनपराणि मतान्य् अभिमुखीकृत्य शब्दस्योत्पत्तिपक्षम् अभिव्यक्तिपक्षं चालक्ष्य सुविस्तृतम् अत्याकर्षकं सुरुचिपूर्णं संवादं प्रास्तौत्। अत्र मीमांसकमतं जयन्तो भर्तृमित्राचार्य-नाम्नैव प्रादर्शयत्। प्रस्तुते न्यायमञ्जरी-प्रसंगे कानिचित् कुमारिल-भट्ट-पद्यानि श्लोक-वार्तिकात् समुद्धृतान्य् उपलभ्यन्ते[1]।

कुमारिलभट्टोऽपि श्लोकवार्त्तिकोपक्रम एव दशमे पद्ये भर्तृमित्र-विषयकं कञ्चित् सैद्धान्तिकं भावम् उद्भावयति। पद्यं तद् इत्थम्—

प्रायेणैव हि मीमांसा लोके लोकायतीकृता।
तामास्तिकपथे कर्तुमयं यत्नः कृतो मया॥

---

*शास्त्री, वेदान्तसांख्याचार्यः, गाज़ियाबाद उत्तरप्रदेश।

---

१. द्रष्टव्या न्यायमञ्जरी—पृ० २१२-२२१।

श्लोकवार्त्तिक-व्याख्याकारः श्रीमान् उम्बेकभट्टः श्लोकम् इमम् एवम् अवतारयति—"ननु वेदार्थग्रहणाविस्मरणार्थम् अपि तत्तद्भर्तृमित्रादि-विरचित-तत्त्व शुद्ध्यादि-लक्षण-प्रकरणम् अस्त्य् एवेति गतार्थम् इदं वाक्यम् इत्यत आह—प्रायेणेति। मीमांसा हि सर्वास्तिक-शास्त्राणाम् अग्रणीः सर्वपुरुषार्थ-साधन-परिज्ञानस्यैतन्निबन्धनत्वात्। सैवमात्मिका अलोकायतम् एव सती बाहुल्येन लोकायतीकृता, सत्स्मृतिसदाचाराणां विना कारणेन धर्मप्रमाणत्व-निराकरणात्, विधि-निषेधयोर् इष्टानिष्टफलानभ्युपगमाच् च। प्रायेणेति। चोदनाप्रमाणको धर्म इत्येतावन्मात्रेण नास्तिक-शास्त्रादपसारिता, अन्यत् सामान्यम् एव कृतम् इत्यर्थः। ताम् इमाम् असत्-व्याख्यातृ-वशाद् असन्मार्ग-निम्नगाम् उद्धृत्यास्तिकपथे कर्तुं स्थापयितुं वार्त्तिकारम्भ-प्रयत्नः कृतो मयेति।"

अत्र कौमारिल-श्लोकेन संकेतिता भट्टोम्बक-कृतेन विवरणेन च स्पष्टी-कृता समस्या खल्व् एका सम्मुखम् आयाति। सा चेयम्— मीमांसायाः केन विधिना लोकायतीकरणं समपादि ? लोकायती-करणं च किं-रूपं संभाव्येत इति। लोकायती-करण-कर्त्ता भर्तृमित्र एवासीद् इति तु भट्टोम्बेक-कृतया प्रस्तुत-श्लोका-वतरणिकया स्पष्टम् एव ज्ञायते। परं केन प्रकारेण किं-रूपं वा लोकायतीकरणं मीमांसायाः सम्पादितवान् भर्तृमित्र इति तद्-स्वनाऽनुपलब्धौ कथम् एतन्निश्चीयेत इति महतीयं समस्या।

भट्टोम्बेक-कृतविवरणेन स्पष्टम् एतद् ज्ञायते यद् भर्तृमित्रः खलु तत्त्वशुद्धि नामकं मीमांसा-विषयकं कम् अपि ग्रन्थम् अरचयद् इति। मीमांसायां प्रचलिताः काश्चन प्रथा भर्तृमित्रोऽत्युग्रतया समालोचयद् इति सुस्पष्टं भट्टोम्बेक-विवरणरीत्या जानीमः। सम्भाव्यते ताः कट्वालोचनाः काश्चित् शास्त्रीयोपपादन-सम्बन्धिन्यः काश्चिच् च यज्ञानुष्ठान-सम्बन्धिन्यः स्युः। भर्तृमित्र-सम्पादितं मीमांसाया लोकायत-रूपं किमात्मकं भवेद् इत्य् अपि भट्टोम्बेक-विवरणं स्पष्टीकरोति। तथाहि तत्र—सत्स्मृति-सदाचाराणां भर्तृमित्र-द्वाराऽनभ्युपगमो व्यक्तीकृतः। तथैव मीमांसा-निर्दिष्टयोर् विधिनिषेधयोर् इष्टफलावाप्तिम् अपि नाभ्युपागच्छद् भर्तृमित्रः; इत्यादि प्रतिपादनं मीमांसाया लोकायती-करण-रूपं स्पष्टयति। तद् इत्थं विज्ञायताम्।

'लोकायत'-पदं हि बृहस्पत्युपज्ञान् चार्वाकोपदिष्टान् तत्-प्रचारितान् वा स्वकाले सिद्धान्तविशेषान् निर्दिशति। ते के सिद्धान्ता भवेयुर् यान् मीमांसा-याम् आरोप्य भर्तृमित्रो मीमांसाया लोकायती-करणं सम्पादितवान्। बृहस्पतिर्

आचार्यो मीमांसा-प्रतिपादितस्य यज्ञेषु पशुबलिद्वाराऽऽमिष-प्रयोगस्य श्राद्धादिकस्य चात्युग्रतया भर्त्सनाम् अकरोत्। तथाहि तद्दर्शने समुपपाद्यते—

पशुश्चेन्निहतः स्वर्गं ज्योतिष्टोमे गमिष्यति।
स्व-पिता यजमानेन तत्र कस्मान्न हिंस्यते॥

मृतानामपि जन्तूनां श्राद्धं चेत् तृप्तिकारणम्।
गच्छतामिह जन्तूनां व्यर्थं पाथेय-कल्पनम्॥

इत्यादिरूपेण तात्कालिकीं मीमांसागत-यज्ञादि-प्रक्रियां सर्वथाऽप्य् अवद्य-रूपां प्रत्यपादयद् बृहस्पतिः। प्रतीयते, भर्तृमित्रोऽप्य् आचार्यो मीमांसा-गतानाम् एवंभूतोल्लेखानां यज्ञेष्व् आमिषादि-प्रयोगभूतानां कदाचाराणां च घोरं विरोधं चकार। तांस्तांश् च मीमांसा-प्रसङ्गान् अन्यथा समुपपाद्य मीमांसाया निरामिषां वैदिकीं यज्ञादि-प्रक्रियाम् अक्षुण्णां व्यवस्थापयितुं महान्तम् उत्तमं प्रयासम् अकरोत्। सम्भाव्यते, यद् एताम् एव परिस्थितिं कुमारिलभट्टो मीमांसाया लोकायतीकरणं कथयति। वस्तुतो भर्तृमित्रस्यैतत् कार्यम् अतितरां पवित्रम् आसीत्। मीमांसायां निरामिष-यज्ञानुष्ठान-प्रक्रियायाः स्पष्टीकरणं तदुपपादनमात्रं च तत्प्रयास-प्रयोजनं शक्यतेऽभिधातुम्।

भट्टोम्बेक-संकेतितायाः कस्याश्चिद् भर्तृमित्र-रचनायाः 'तत्त्वशुद्धिः' इति नामकरणेऽवधानं दीयेत चेत्, तदा सुस्फुटम् इयं भावना अभिव्यज्यते यद् अयं ग्रन्थकारोऽवश्यं मीमांसायाः कतिचनैवंभूताः परम्पराः समशोधयत्, याः खलु अयं वस्तुगत्या मीमांसोपपादिता नामन्यत। ताः परिशोध्याऽसौ मीमांसोपपादित-तत्त्व-याथार्थ्यम् एव प्रास्तौत्। एतद् एवालक्ष्य स्वरचनायाम् तादृश-नामकरणे प्रवृत्त इति संभाव्यते।

पशुबलि-प्रभृति-विषये भर्तृमित्रस्य तादृश्य् अत्युग्रविरोधिता-संभावना याम् अयम् अपरोऽपि तर्को भवति यत् तदभिमतान् सिद्धान्तान् अभिलक्ष्य समुपलब्धे वैष्णव-साहित्ये तस्य ससम्मानं संस्मरणं दृश्यते। तद् विज्ञापयति—अयम् आचार्यः पञ्चरात्र-सम्प्रदायानुवर्ती समभूद् इति। वर्तमान-वैष्णव-सम्प्र-दायोपजीव्यभूतः किल प्राक्तनः पञ्चरात्र-सम्प्रदायः। तदनेन निसर्गप्राप्तम् एतत् सर्वथापि—यदयम् आचार्यः सर्व-विधस्यामिष-प्रयोगस्यातितरां प्रतीपः स्यात्। अनयैव रीत्या कुमारिलभट्ट-संकेतितस्य मीमांसाया भर्तृमित्रोपज्ञ-लोका-यतीकरणस्य रूपं शक्यते संभावयितुम्। इतः परं विद्वांस एवाऽत्र प्रमाणम्।

मूर्खः कः ?†

श्रीसंतकुमारमीतलः*

एकदा एको जर्मनः सोवियत-सेनायाम् अभ्यगात्। प्रवेशानन्तरं, तस्य सहयोगिभिः सैनिकैः स सूचितो यद् अत्र राजा जारः प्रतिमासं सेनाया निरीक्षणार्थम् आगच्छति प्रत्येकं नवागतांश् च प्रश्न-त्रयं पृच्छति। अत एतेषां प्रश्नानाम् उत्तराणि स्मर। तस्य प्रथमः प्रश्नो भविष्यति, तव कियद् आयुर् अस्ति ? त्वं वद—द्वाविंशति-वर्ष-वयस्कोऽस्मि इति। द्वितीयः प्रश्नो भविष्यति—त्वं सेनायां कदा प्रभृति कार्यं करोषि ? अस्य उत्तरम् इत्थम् देयम् अस्ति 'द्वाभ्यां वर्षाभ्याम्'। तृतीयः प्रश्नो भविष्यति—किं तुभ्यम् अत्रत्यम् अनुशासनं रोचते अथवा भोजन-व्यवस्था ? त्वं कथय—उभाव् एव। सोवियत-भाषाऽनभिज्ञेन नव्येन जर्मन-सैनिकेन तेन वाक्य-त्रयं रटितम्। प्रथमं द्वाविंशति वर्षाणि, द्वितीयं, द्वाभ्यां वर्षाभ्यां, तृतीयञ् च उभाव् अपि।

निर्धारित-दिवसे जारः सेनाया निरीक्षणाय समागच्छत्। प्रथानुसारेण च स इमं सैनिकम् अपृच्छत् यत् त्वं सेनायां कदाप्रभृति कार्यं करोषि ? जारोऽद्य द्वितीयं प्रश्नं पूर्वम् एव अपृच्छत्। परन्तु जर्मन-सैनिकस् तूत्तर-त्रयस्य क्रमेणाऽभ्यासं कृतवान्। अतः स झटित्य् एव उत्तरम् अददात्—द्वाविंशति वर्षाणि। एतच्छ्रुत्वा स स्तम्भित-नेत्राभ्याम् अपृच्छत्। 'तव आयुः कियद् अस्ति ? स सैनिक उत्तरम् अददात् 'वर्ष-द्वयस्य'। सम्प्रति तु जारोऽति-विस्मितोऽभूत्। सोऽकथयत्, "त्वं मूर्खोऽसि किं वा अहं मूर्खोऽस्मि"। स झटित्य् उवाच "उभाव् एव।"

---

† अग्रबन्धु मासिक पत्रिकातः (अनुडिलाकथा)।

*साहित्यरत्न, मध्यमा।

समाचाराः

विश्वसत्सङ्ग :—

दिसम्बर-मासस्य साप्ताहिक-सत्सङ्गेषु श्रीदेवदत्तशास्त्रिणः श्रीमुनीश्वरदेव-शास्त्रिणश्च मनुस्मृतिम् अधिकृत्य स्वप्रवचनान्य् अकुर्वन्। श्रीरलाराम-महोदयः श्रीस्वामिब्रह्ममुनिश्च वेदोपनिषद्-विषयकं प्रवचनम् अकुरुताम्।

जनवरी-मासे फरवरी-मासे च श्रीदेवदत्त शास्त्री, श्रीमुनीश्वरदेवशास्त्री च मनुस्मृतितो गृहस्थाश्रम-सम्बन्धिनं विषयम् अवलम्ब्य प्रवचनानि कृतवन्तौ। श्रीप्रिं० रलाराम-महाभागश्च वेद-विषये प्रवचनम् अकरोत्।

विश्वसत्सङ्गे विशिष्ट-पर्वसु जातान्य् अधिवेशनानीत्थं भवन्ति—

भगवद्ईसा-जयन्ति-गुरुगोविन्दसिंह-स्वामिश्रद्धानन्दबलिदान-दिवसाः-

२९-१२-६८ दिनाङ्के संस्थानीय-साप्ताहिक-विश्वसत्सङ्गे भगवतो यीशोः गुरुगोविन्दसिंहस्य स्वामिश्रद्धानन्दस्य बलिदानदिवसस्य माननम् अभवत्। अध्यक्षताम् चास्य प्रा० रत्नचन्द्र-महोदयः समाचरत्।

भाषणं कुर्वता श्रीमुनीश्वरदेव-शास्त्रिणा स्वामि-श्रद्धानन्दस्य निर्भीकतां कर्मठतां निमाण-शक्तिं चोपवर्णयता तस्मै स्वश्रद्धाञ्जलिर् दत्तः।

प्रां० गुरदीपसिंहो गुरु-गोविन्दसिंहस्य वीरतां तत्-कृतं बलिदानं च वर्णयन् त्याग-भावं च तस्य प्रकटयन् तद्-वीर-भाव-भरितां भारतीम् अधिकृत्य स्व-विचारान् प्राकटयत्। प्रि० रलारामः त्रयाणाम् अपि महापुरुषाणां जीवन-गत-वैशिष्ट्यं प्रतिपादयन् महापुरुषेभ्यः तेभ्यः स्व-श्रद्धाञ्जलीन् समार्पयत्।

अन्ते च सभापति-महोदयस्य भाषणम् अभूत्।

धनीरामभल्ला-जयन्ती :—

मार्च-मासस्य ९ दिनाङ्के संस्थानीय-विश्वसत्सङ्गे धनीराम-भल्ला-महाभागस्य जयन्त्या उत्सवो मानितः। ला० मिलखीरामः प्रि० रलाराम-महोदयश्च स्वर्गीय-धनीरामभल्ला-महोदयस्य सद्गुणान् अवर्णयताम्।

गणतन्त्रदिवस—

जनवरी-मासस्य २६ दिनाङ्के प्रातः ८-९० वादनसमये गणतन्त्र-दिवसस्य शुभावसरे प्रि० रलाराम-महोदयः राष्ट्रिय-ध्वजाऽऽरोहणम् अकरोत्। सारगर्भिते स्वे भाषणे महानुभावोऽसाव् एकतायाः कृते उपदिष्टवान्।

सायंकाले-विशिष्टम् आयोजनम् अभवत्। तत्र गणतन्त्र-दिवसोपलक्ष्ये श्रीत्रिलोकचन्दतुलसी-महोदयस्य प्रि० रलाराम-महाभागस्य च प्रवचने

विनोद-कणिका—

मूर्खः कः ?†

श्रीसंतकुमारमीतलः*

एकदा एको जर्मनः सोवियत-सेनायाम् अभ्यगात्। प्रवेशानन्तरं, तस्य सहयोगिभिः सैनिकैः स सूचितो यद् अत्र राजा जारः प्रतिमासं सेनाया निरीक्षणार्थम् आगच्छति प्रत्येकं नवागतांश् च प्रश्न-त्रयं पृच्छति। अत एतेषां प्रश्नानाम् उत्तराणि स्मर। तस्य प्रथमः प्रश्नो भविष्यति, तव कियद् आयुर् अस्ति ? त्वं वद—द्वाविंशति-वर्ष-वयस्कोऽस्मि इति। द्वितीयः प्रश्नो भविष्यति—त्वं सेनायां कदा प्रभृति कार्यं करोषि ? अस्य उत्तरम् इत्थम् देयम् अस्ति 'द्वाभ्यां वर्षाभ्याम्'। तृतीयः प्रश्नो भविष्यति—किं तुभ्यम् अत्रत्यम् अनुशासनं रोचते अथवा भोजन-व्यवस्था ? त्वं कथय—उभाव् एव। सोवियत-भाषाऽनभिज्ञेन नव्येन जर्मन-सैनिकेन तेन वाक्य-त्रयं रटितम्। प्रथमं द्वाविंशति वर्षाणि, द्वितीयं, द्वाभ्यां वर्षाभ्यां, तृतीयञ् च उभाव् अपि।

निर्धारित-दिवसे जारः सेनाया निरीक्षणाय समागच्छत्। प्रथानुसारेण च स इमं सैनिकम् अपृच्छत् यत् त्वं सेनायां कदाप्रभृति कार्यं करोषि ? जारोऽद्य द्वितीयं प्रश्नं पूर्वम् एव अपृच्छत्। परन्तु जर्मन-सैनिकस् तृत्तर-त्रयस्य क्रमेणाऽभ्यासं कृतवान्। अतः स झटित्य् एव उत्तरम् अददात्—द्वाविंशति वर्षाणि। एतच्छ्रुत्वा स स्तम्भित-नेत्राभ्याम् अपृच्छत्। 'तव आयुः कियद् अस्ति ? स सैनिक उत्तरम् अददात् 'वर्ष-द्वयस्य'। सम्प्रति तु जारोऽति-विस्मितोऽभूत्। सोऽकथयत्, "त्वं मूर्खोऽसि किं वा अहं मूर्खोऽस्मि"। स झटित्य् उवाच "उभाव् एव।"

---

† अग्रबन्धु मासिक पत्रिकातः (अनुडिलाकथा)।

*साहित्यरत्न, मध्यमा।

समाचाराः

विश्वसत्सङ्ग :—

दिसम्बर-मासस्य साप्ताहिक-सत्सङ्गेषु श्रीदेवदत्तशास्त्रिणः श्रीमुनीश्वरदेव-शास्त्रिणश्च मनुस्मृतिम् अधिकृत्य स्वप्रवचनान्य् अकुर्वन्। श्रीरलाराम-महोदयः श्रीस्वामिब्रह्ममुनिश्च वेदोपनिषद्-विषयकं प्रवचनम् अकुरुताम्।

जनवरी-मासे फरवरी-मासे च श्रीदेवदत्त शास्त्री, श्रीमुनीश्वरदेवशास्त्री च मनुस्मृतितो गृहस्थाश्रम-सम्बन्धिनं विषयम् अवलम्ब्य प्रवचनानि कृतवन्तौ। श्रीप्रिं० रलाराम-महाभागश्च वेद-विषये प्रवचनम् अकरोत्।

विश्वसत्सङ्गे विशिष्ट-पर्वसु जातान्य् अधिवेशनानीत्थं भवन्ति—

भगवद्ईसा-जयन्ति-गुरुगोविन्दसिंह-स्वामिश्रद्धानन्दबलिदान-दिवसाः—

२९-१२-६८ दिनाङ्के संस्थानीय-साप्ताहिक-विश्वसत्सङ्गे भगवतो यीशोः गुरुगोविन्दसिंहस्य स्वामिश्रद्धानन्दस्य बलिदानदिवसस्य माननम् अभवत्। अध्यक्षताम् चास्य प्रा० रत्नचन्द्र-महोदयः समाचरत्।

भाषणं कुर्वता श्रीमुनीश्वरदेव-शास्त्रिणा स्वामि-श्रद्धानन्दस्य निर्भीकतां कर्मठतां निमाण-शक्तिं चोपवर्णयता तस्मै स्वश्रद्धाञ्जलिर् दत्तः।

प्रां० गुरदीपसिंहो गुरु-गोविन्दसिंहस्य वीरतां तत्-कृतं बलिदानं च वर्णयन् त्याग-भावं च तस्य प्रकटयन् तद्-वीर-भाव-भरितां भारतीम् अधिकृत्य स्व-विचारान् प्राकटयत्। प्रि० रलारामः त्रयाणाम् अपि महापुरुषाणां जीवन-गत-वैशिष्ट्यं प्रतिपादयन् महापुरुषेभ्यः तेभ्यः स्व-श्रद्धाञ्जलीन् समार्पयत्।

अन्ते च सभापति-महोदयस्य भाषणम् अभूत्।

धनीरामभल्ला-जयन्ती :—

मार्च-मासस्य ९ दिनाङ्के संस्थानीय-विश्वसत्सङ्गे धनीराम-भल्ला-महाभागस्य जयन्त्या उत्सवो मानितः। ला० मिलखीरामः प्रि० रलाराम-महोदयश्च स्वर्गीय-धनीरामभल्ला-महोदयस्य सद्गुणान् अवर्णयताम्।

गणतन्त्रदिवस—

जनवरी-मासस्य २६ दिनाङ्के प्रातः ८-९० वादनसमये गणतन्त्र-दिवसस्य शुभावसरे प्रि० रलाराम-महोदयः राष्ट्रिय-ध्वजाऽऽरोहणम् अकरोत्। सारगर्भिते स्वे भाषणे महानुभावोऽसाव् एकतायाः कृते उपदिष्टवान्।

सायंकाले-विशिष्टम् आयोजनम् अभवत्। तत्र गणतन्त्र-दिवसोपलक्ष्ये श्रीत्रिलोकचन्दतुलसी-महोदयस्य प्रि० रलाराम-महाभागस्य च प्रवचने

अभवताम्। श्रीइन्द्रदत्त उनियालः श्रीदामोदरशास्त्री च स्वनिर्मिते कविते अश्रावयताम्।

शिवरात्रि (ऋषिबोध-) पर्व—

प्रि० रलाराम-महोदयस्याऽध्यक्षताया शिवरात्रि-पर्वणो माननम् अभूत्। श्रीमन्नीश्वरदेवः प्रि० रामदासश्च दयानन्द-सरस्वती-जीवनगत-वैशिष्ट्यं मानव-कल्याणाय कृतं तत्-कार्यम् विश्व-शान्त्यर्थं प्रदत्तं सन्देशं च अकथयताम्।

सारस्वत-समाजः—

प्रति-मासम् अन्तिमे शुक्र-वासरे संस्थानीय-सारस्वत-समाजस्याऽधिवेशनम् आयोज्यते। यत्र शास्त्रीयं कम् अपि विषयम् अवलम्ब्य कश्चिद् वक्त्वा व्याख्यानं करोति, निबन्धा स्वकीयं निबन्धं वा श्रावयति।

१९६८ वत्सरस्य जनवरी-मासे एकात्रिंशे दिनाङ्के सारस्वत-समाज-स्याऽधिवेशनं प्रा० जगन्नाथाग्रवाल-महोदयस्याऽध्यक्षतायां सम्पन्नम्। तत्र श्रीनत्थूराम-शास्त्रिणा 'विवाह-संस्कार'-विषयकः स्वीयो निबन्धः पठितः। तत्र श्रीदेवदतशास्त्रि-मुनीश्वरदेव-प्रभृतिभिर् उपस्थापिताः प्रश्नाः वक्तृ-महोदयेन वैदुष्येण साधीयः समाहिताः।

फरवरी-मासस्य सारस्वत-समाजाऽधिवेशने प्रा० जगन्नाथाग्रवाल-महोदस्याऽध्यक्षातायाम् (बर्कले-विश्वविद्यालय अमेरिका) संस्कृत-प्राध्यापकेन श्रीकेनिथजोंस-महोदयेन "एकोनविंश्यां शताब्द्यां हिन्दूधर्मस्य स्वरूपम्'(विशेषतः पञ्चनद-प्रदेशे) इति विषयम् अधिकृत्य भाषणम् अकारि। तत्र कीदृश्यां देश-काल-परिस्थितौ आर्यसमाज-ब्रह्म-समाजादिभिः स्व-कार्यम् अनुष्ठितम्। लाहौरनगरे काः परिस्थितयोऽभवन्। तत्र जातायां प्रगतौ लाला-हंसराज-लाजपतरायादीनां कीदृशं योग-दानम् अभूद् इत्यादि-विषयाश्च वर्णिताः।

मार्च-मासे एकविंशे दिनाङ्के जाते विशिष्टेऽधिवेशने दर्शनशास्त्रस्य प्रौढ़-विदुषा पं० उदयवीर-शास्त्रिणा सांख्यदर्शनस्य काश्चिद् समस्याः" इति विषये भाषणम् अकारि। तत्र विशेषेण सांख्यस्येतिहास-विषयकाः केचिद् प्रश्ना विवेचिताः--तत्रोपलब्ध-सांख्यषडध्यायी-सूत्राणि सांख्य-कारिकाः प्राचीनानीति पक्षस्य समर्थने कतिचन हेतव उपस्थापिताः।

मार्च-मासस्य २८ शे दिनाङ्के सम्पन्नेऽधिवेशने प्रा० जगन्नाथाग्रवाल-महोदयस्य "कालिदासस्य समयः' इति विषये डा० व्रजविहारी चौबे-महोदयस्या-ऽध्यक्षतायां भाषणम् अभूत्।

अप्रैल-मासस्य १४ श-दिनाङ्कीये विशिष्टेऽधिवेशने प्रा० नरदेव-व्याकरणा-चार्येण 'पाणिनीयं शब्दस्वरूपम्' इति विषये निबन्धः पठितः। अनन्तरं प० रामपालितादिभिर् विद्वद्भिः कृतानां शङ्कानां समाधिर् निबन्धा निपुणं विहितः।

VISHVESHVARANAND INDOLOGICAL JOURNAL

Editor : **VISHVA BANDHU**

Half-yearly Organ of the V. V. Research Institute

COVERS THE ENTIRE FIELD OF INDOLOGY

INCLUDING VEDIC & CLASSICAL SANSKRIT LNGUAGE & LITERATURE, RELIGION & PHILOSOPHY, HISTORY & ARCHAEOLOGY AND FINE ARTS

Annual Subscription : **Rs. 20/ –, Sh. 30, $ 5**

25% DISCOUNT TO MEMBERS OF THE V. V. R. I. SOCIETY WITH FREE SUPPLY OF THE HINDI MONTHLY OF THE INSTITUTE, **VISHVA JYOTI.**

membership Subscription : **Rs.12 per annum or Rs. 250/- for life**

V. V. RESEARCH INSTITUTE

P. O. Sadhu Ashram, HOSHIARPUR (Pb.),

संस्थान का सांस्कृतिक हिन्दी मासिक

विश्व-ज्योति

सह-सम्पादक—विश्वबन्धु : सन्तराम

- ★ विविध सांस्कृतिक विषयों पर रोचक लेख ।
- ★ कहानी, नाटक, कविताएँ ।
- ★ विश्व-सत्संग और एकलिपि-विस्तार के विशेष स्तम्भ ।
- ★ बालभारती में उत्तम सामग्री ।
- ★ पुस्तक परिचय, सम्पादकीय टिप्पणियां, संस्थान-समाचार और विशेष समाचार आदि ।

वार्षिक शुल्क रु० १२.००

(संस्थान सदस्यों को निःशुल्क । सदस्यता-शुल्क १० रु० वार्षिक या २५० रु० एक बार)

विश्वेश्वरानन्द वैदिक शोध संस्थान

(डा० घ०) साधु आश्रम, होशियारपुर (पं०)

विश्वेश्वरानन्दवैदिकशोधसंस्थान

क्र7

अनुपम और अमर प्रकाशन

वैदिक-पदानुक्रम-कोष

१६ खण्डों में सम्पूर्ण

सम्पादक : आचाय विश्वबन्धु

जिसमें चारों वेदों से सम्बन्धित संहिता, ब्राह्मण, आरण्यक, उपनिषद्, श्रौतसूत्र, गृह्यसूत्र, धर्मसूत्र, प्रातिशाख्य, शिक्षा, कल्प, निरुक्त, व्याकरण, ज्योतिष, छन्द, वेदान्त, मीमांसा, सांख्य-योगादिविषयक ग्रन्थों के एक-एक पद का पूरा-पूरा स्थल-संकेत, निर्वचन, पाठ-प्रमाणीकरण और अर्थ-बोध में परम-सहायक व्याकरण-परिचय दिया गया है। यह महाकोष भारतीय-विद्याओं और विशेषतः भारत-यूरोपीय भाषाविज्ञान के अध्ययन की आधार-शिला के समान है—

संहिता-भाग	६	खण्ड	२० (या)	३० (या)	४० रु.	प्रति	खण्ड
ब्राह्मण-भाग	२	,,	,,	,,	,,	,,	,,
उपनिषद्-भाग	२	,,	,,	,,	,,	,,	,,
वेदांग-भाग	४	,,	,,	,,	,,	,,	,,
सामान्य-भाग	२	,,	,,	,,	,,	,,	,,

टिप्पण—मूल्य का विकल्प कागज और जिल्द के भेद के कारण है।

विश्वेश्वरानन्द पुस्तक भण्डार

(डा० घ०) साधु आश्रम, होशिआरपुर (पं.)

नियमाः

१. विश्वसंस्कृतं त्रैमासिकं पत्रम् । (तत् फर्वरी-मई-अगस्त-नवम्बर-मासानां) प्रत्येकं १५ दिनाङ्के प्रकाशितं भविष्यति ।

२. अस्मिन् प्रकाशनार्थम् एतदीयध्येयाऽनुकूलाः सत्यः मनोहारि-पद-योगा विचार-निर्भराः शिष्ट-जनोपयोगाऽर्हाः सर्वविधा रचनाः शोध-पूर्णा आलोचनात्मका वा यात्राद्युपवर्णनात्मका वा निबन्धाः, कविताः, रूपकाणि, कथाः, हास्य-कृतयः स्वीकृताः स्युः ।

३. प्रकाशनाय प्रेष्यमाणाः कृतयो नाऽतिदीर्घाः सत्यः सुवाच्याऽक्षरैः पत्रस्यैकतो लिखिता वा टङ्किता वा स्युः ।

४. रचनानां प्राप्ति-सूचना प्राप्ति-समकालम् एव प्रहीयते । तासां प्रकाशनं तु यथावसरं परीक्ष्य पश्चाद् एव संभवेत् । अतो लेखक-महोदयाः प्रस्तोष्यमाण एवाऽङ्के स्वकृतीनां प्रकाशनाय साऽऽग्रहा न भवेयुः ।

५. अप्रकाशितायाः सत्याः स्व-कृतेः परावर्तनम् इच्छन्तः सज्जना यथापेक्षं पत्रालयीय-मुद्रिकाः प्रेषयेयुः ।

६. लेखकाः स्वनाम-धाम-निर्देशादिकं सुवाच्याक्षरैर् लिखेयुः । सति संभवे पत्रालयादि-संकेत आंग्लभाषायाम् अपि लेख्यः ।

७. पत्रस्य वार्षिकं शुल्कं भारते ८ रूप्यकाणि, विदेशेषु १२ शिलिङ्गानि च वर्तते । तच् च पूर्णम् एव पूर्वतः प्रदेयं भवति । वी. पी. द्वारा प्रेषणस्य न नियमः ।

८. वि. वै. शो. संस्थानस्य सदस्यानां कृते वार्षिकं शुल्कं रु. ६) अस्ति । एषा सदस्यता द्वि-प्रकारा भवति, जीवन-सदस्यतेति च वार्षिकसदस्यतेति च । पूर्वस्याः सकृद्-देयं शुल्कं रु. २५०) । उत्तरस्याः प्रतिवर्षं देयं शुल्कं रु. १०) । सर्वेभ्योऽपि सदस्येभ्यः संस्थानस्याऽष्ट-रूप्यक-शुल्का विश्व-ज्योतिराख्या मासिकी हिन्दी-पत्रिका निःशुल्कं, षाण्मासिकी 'विश्वेश्वरानन्द-इण्डोलोजिकल-जर्नल' इत्याख्याऽऽङ्गली पत्रिका चाऽपरा २०) रूप्यकशुल्का सती १५) रूप्यकाणि प्राप्य प्रदीयते ।

९. समालोच्य-पुस्तकानां प्रत्येकं द्वितयी प्रेषणीया ।

१०. विज्ञापन-शुल्कम्—पूर्णं पृष्ठम् (एकवारम्) ५०), (चतुर्वारम्) १७५) । पृष्ठस्य अर्धम् ३०), पृष्ठस्य तुरीयम् १६) ।

११. पत्र-व्यवहारे स्वकीया ग्राहक-संख्या सदस्य-संख्या वाऽवश्यम् उल्लेख्या ।

१२. ग्राहकाः पत्र-व्यवहारार्थम् आत्मनः स्थायि-स्थान-निर्देशं यथा-संभवम् आंग्लभाषायाम् अपि लिखेयुः । अस्थायि-स्थान-संकेतस् तु स्व-पत्रालय एव सूचनीयः ।

विश्व-संस्कृतम्

नाम

विश्वेश्वरानन्द-वैदिक-शोध-संस्थानस्य

त्रैमासिकं संस्कृत-मुख-पत्रम्

सम्पादकः

आचार्यः विश्वबन्धुः, एम. ए., शास्त्री, एम. ओ. एल्., डी. लिट्.,
केन्द्रप्रशासनिक-संस्कृत-समित्या भूतपूर्वः सदस्यः।

उप-सम्पादकौ

प्राध्यापकः इन्द्रदत्त उनियालः, एम. ए., साहित्याचार्यः, साहित्यरत्नम्।
प्राध्यापकः वीरेन्द्रशर्मा, शास्त्री, एम. ए.।

परामर्श-दातृ-मण्डलम्

(आन्तरिक-सदस्याः)

श्रीदेवदत्तः, शास्त्री, विद्याभास्करः; साधु-आश्रमः, होशिआरपुरम्।
श्री कृ. वें. शर्मा, बी एस्-सी, एम. ए.; साधु-आश्रमः, होशिआरपुरम्।
श्रीसूर्यनारायणः, शास्त्री, काव्यतीर्थः; साधु-आश्रमः, होशिआरपुरम्।

(बाह्य-सदस्याः)

डा. हरिदत्तः, शास्त्री, एम. ए., पी-एच.डी., वेदान्त-व्याकरणाचार्यः, एकादशतीर्थः, भूतपूर्वः संस्कृतविभागाऽध्यक्षः; डी. ए. वी. कालेजः, कानपुरम्।
आचार्यः जगद्रामः, शास्त्री, श्रीसनातनधर्म-संस्कृतकालेजाध्यक्षः, होशिआरपुरम्।
डा. कपिलदेवः, शास्त्री, एम. ए., पी-एच.डी., प्राध्यापकः, कुरुक्षेत्र-विश्व-विद्यालयः; कुरुक्षेत्रम्।

Vishveshvaranand Vedic Research Institute

P. O. Sadhu Ashram, Hoshiarpur (*Pb., Ind.*)

Name of owners :—

Vishveshvaranand Institute Society, Sadhu Ashram, Hoshiarpur,
Printed & Published by Shri Dev Datta Shastri on
23 December, 1969 at the V.V.R. Institute Press.
P. O. Sadhu Ashram, Hoshiarpur.

(9)

वाल्मीकिविद्यापीठपुस्तकालयः

प्रत्यावर्तनतिथिः